# मूलाविद्या–भाष्यवार्तिकविरुद्धा

लेखकः

वेदान्तशिरोमणिः, वेदान्तविशारदः, विद्यावाचस्पतिः, आस्थानविद्वान्

एम्. विट्ठलशास्त्री.

प्रकाशनस्थानम् :

अध्यात्मप्रकाशकार्यालयः, होळेनरसीपुरम्.

# The Adhyatma Prakasha Karyalaya,

( ESTABLISHED 1920 )

HOLENARSIPUR-573211. (Hassan District)

( BANGALORE BRANCH )

No. 68, II Block, Subbarama Chetty Lay-out,
THYAGARAJANAGARA — BANGALORE-560028.

An Institution to help the interpretation of Indian Culture by stimulating the study and practice of the Adhyātma Vidyā — Philosophy and Religion in its universal aspect — especially as revealed in the Upanishads and allied literature.

1. Has so far published more than ONE HUNDRED AND SIXTY BOOKS in Kannada, English and Sanskrit.

2. Arranges for frequent DISCUSSIONS, DISCOURSES and PUBLIC LECTURES; VEDANTA CLASSES in the morning form a regular feature.

3. Has a free-lending LIBRARY and a READING ROOM for the public.

4. Conducts a Kannada Monthly Magazine called the "ADHYATMA PRAKASHA", devoted to Jñāna, Bhakti and Vairāgya.

5. Maintains a VEDANTIC COLLEGE for training up model students for the dissemination of Vedantic ideas.

*For fuller information please apply to the Secretary.*

ग्रन्थावलिः

# मूलाविद्या-भाष्यवार्तिकविरुद्धा


लेखकः

शिरोमणिः, वेदान्तविशारदः, विद्यावाचस्पतिः, आस्थानविद्वान्

एस्. विट्ठलशास्त्री.


Serial No. 169


प्रकाशनस्थानम् :

अध्यात्मप्रकाशकार्यालयः, होळेनरसीपुरम्.

कर्णाटकराज्यम्.

# ग्रन्थकर्तुः कृतज्ञताविष्करणम्

मुद्रणद्रव्ये तृतीयभागं दापितेभ्यः श्रीमत्परमहंसपरिव्राजकेभ्यः श्री श्री नित्यानन्देन्द्रसरस्वतीस्वामिभ्यः प्रथमतो मम कृतज्ञतामाविष्करोमि ॥

पुस्तकं आमूलाग्रं पाठयित्वा स्वाभिप्रायप्रदर्शनपूर्वकं उपोद्घातं लिखितवतां महीशूर विश्वविद्यालये वेदान्तविभागे प्रधानाचार्याणां डाक्टर् के. बि. रामकृष्णराव् महाशयानां तथा मम हस्तलिखितग्रन्थैकदेशं मुद्रितग्रन्थं च विलोक्य अभिप्रायप्रदातृभ्यो निवृत्ततर्कप्राध्यापकेभ्यो, वेदान्ततर्कविद्भ्यो वे. ब्र. श्री हेच्. अनन्तमूर्तिशास्त्रिभ्यः, तथैव समग्रग्रन्थं मुद्रणाय सज्जीकृत्य सीसकाक्षरसंयोजनदोषांश्च संशोध्य उपकुर्वद्भ्यः अध्यात्मप्रकाशकार्यालयपण्डितेभ्यो अध्यात्मविद्याप्रवीणेभ्यो वे. ब्र. श्री हेच्. एस्. लक्ष्मीनरसिंहमूर्तिभ्यः, तथैव मुद्रितग्रन्थं हस्तलिखितग्रन्थैकदेशं च संशोध्य अभिप्रायप्रदातृभ्यो वे. ब्र. श्री वेदान्तशिरोमणि परकजे सुब्रह्मण्यभट्ट-शर्मभ्यः, बेंगळूरु अध्यात्मप्रकाशशाखाकार्यालयपण्डितेभ्यः श्री के. जि. सुब्रायशर्मभ्यश्च, तथैव मम हस्तलिखितं पुस्तकं मुद्रणालयसौकर्याय सुन्दराक्षरैर्लिखितवद्भ्यः श्री के. एस्. श्रीकण्ठय्यशर्मभ्यः तथैव मुद्रणद्रव्ये तृतीयभागं त्यक्त्वा भागद्वयं स्वीकृत्य सुन्दरं शीघ्रं मुद्रापितेभ्यः श्री वै. नरसप्पशर्मभ्यश्च मम कृतज्ञतामाविष्करोमि ॥

अस्य ग्रन्थस्य पुनर्मुद्रणादिसर्वस्वाम्यं प्रकाशकेभ्यः होळेनरसीपुरस्थ-अध्यात्मप्रकाशकार्यालयाध्यक्षेभ्यः सन्तोषेण समर्पयामि ॥

— एस्. विट्ठलशास्त्री.

# लेखनोद्देशः

श्रीमत्परमहंसपरिव्राजकाचार्याणां श्रीश्री सच्चिदानन्देन्द्रसरस्वतीस्वामिनां श्री कृष्णस्वाम्यय्यर् महाशयानां च अन्योन्यसमागमेन, परस्परवेदान्तविचारविनिमयेन च अयं मूलाविद्यावादः पञ्चपादिकाकारैरेव शाङ्करभाष्ये क्लेशेन प्रवेशितः इति निर्णयः समजनि । तदनन्तरं श्री कृष्णस्वाम्यय्यर् महाशयैः प्रचोदिताः श्रीश्री सच्चिदानन्देन्द्रसरस्वतीस्वामिनः 'मूलाविद्यानिरासः अथवा श्रीशङ्करहृदयम्' नाम पुस्तकं क्रिस्ताब्द 1927तमे संवत्सरे लिखित्वा प्रकटयामासुः । स्वाशयाविष्करणाय भरतखण्डस्थानां प्रसिद्धानां सर्वेषां विदुषां सकाशं पुस्तकानि प्रेषयामासुः । तदा वाराणसीपुरस्थाः तर्कपञ्चाननभट्टाचार्याः कांश्चिद्दोषान् प्रकल्प्य पत्रं लिलिखुः । तस्योत्तरं श्री स्वामिभिर्दत्तम् । तदा ते तर्कशास्त्रवासनावासिते मम मनसि प्रसन्नगम्भीरः शाङ्करभाष्याभिप्रायः कथं प्रविशेदिति उत्तरं दत्वा तूष्णीं बभूवुः । कुम्भकोणस्थसकलविद्यानिलयप्राध्यापकाः श्रीमन्तस्सुन्दरं ऐयर् महाशयाः, मैसूरुनगरस्थाः श्रीमन्तः डाक्टर् आर्. श्यामशास्त्रिणश्च त्रिवारं मासपत्रिकामुखेन उपरितनग्रन्थविषये दोषान् प्रकल्पयामासुः । तेनैव द्वारेण तेषामुत्तरदानानन्तरं द्वावपि तूष्णीं बभूवतुः ॥

धारवाडनगरे कीलकसंवत्सरमाघशुद्धप्रतिपदमारभ्य सप्तदिनपर्यन्तं प्रचलितब्रह्मानन्दमहाराजसद्गुरोः आराधनामहोत्सवसमये शास्त्रार्थविचारोपन्यासादीनाऽध्यक्षपदवीमलङ्कृताः श्री काशीवासस्थाः सर्वतन्त्रस्वतन्त्रशास्त्ररत्नाकर पण्डितराज पद्मभूषण श्रीराजेश्वरशास्त्रिणः मया ब्रह्माधीनाया मिथ्याज्ञानाऽकल्पिताया मूलाविद्याया ज्ञानबाध्यत्वं कथम्? (ज्ञानं तु ज्ञापकं न कारकम्) इति पृष्टाः 'भूयश्चान्ते विश्वमाया निवृत्तिः', इति शास्त्रप्रामाण्यात्तस्याः ज्ञानबाध्यत्वं भवतीति प्रत्युत्तरं ददुः ॥

इदानीं पण्डितप्रवरेत्यादिप्रशस्ति प्राप्ताः बेंगलूरु श्रृङ्गेरीशङ्करमठीयकालेज् वेदान्तप्राध्यापकाः वे. ब्र. श्री. पण्डितप्रवरेत्य... प्रशस्त्यङ्किताः श्री के. कृष्णजोयिसराख्या विद्वांस मम मित्रवर्याः मूलाविद्यानिरासाख्यग्रन्थे दोषान् प्रकल्प्य 'मूलाविद्या–भाष्यवार्तिकसंमता' इत्याख्यं पुस्तकं रचयामासुः । मम आशयप्रकटनार्थं मह्यं एकं पुस्तकं ददुः । तैः प्रकल्पिताः दोषा अत्र न संभवन्ति । मूलाविद्यावादे एव ते दोषास्सन्तीति प्रदर्शनार्थं श्री श्री स्वामिभिराज्ञप्तोऽहं इदं पुस्तकं लिखितवानस्मि । विचारदक्षा विद्वांसः सम्यग्विचार्यायुक्तं त्यक्त्वा युक्तमेव गृह्णन्तु इति प्रार्थये ॥

— एस्. विट्ठलशास्त्री.

# PREFACE

When approached by Sri Vittala Sastri of Mysore, the author of the present work, two factors dominated my mind for undertaking to write this Preface. One is the author himself, towards whom I have absolute respect. And the second is the problem he has taken up to deal with in his work. The latter is academic in character, and any one who is engaged, as I am in a teaching profession, should naturally not ignore responding. The problem, as I see, is of great importance in the field of Advaita studies, and should rouse interest universally in all those who mean serious thinking with/on Advaita.

The basic point at issue is the relevancy of the concept of '*Mūlāvidyā*' ( 'causal-ignorance' or 'root-ignorance'), which has found for itself a place in the historical tradition of the school associated with the great name of Sri S'aṅkarāchārya, viz. Advaita, but as understood through the two camps of his commentators: *Vivaraṇa* school originating from Padmapāda's *Panchapādikā* and *Bhāmati* school originating from the commentary of that name by Vāchaspati Mis'ra. It has been the tradition to study Sri S'ankara through these interpreting schools of thought, the third being the *Vārtika* school of Sures'wara. This school without diverting from Sri S'ankara either in thought or in interpretation keeps close to the Master's direct exposition. And so, the problem, as such, assumes its controversial dimension in the former two schools.

It was about half a century ago that the revered scholar and thinker, the late Sri Satchidanandendra Saraswati Swamiji of Holenarsipur, took up a significant yet challenging perspective and contended that

the original Advaita philosophy as expounded by Sri S'ankara did not contain the notion of '*Mūlāvidyā*', and its attribution to him by the two schools of Vivaraṇa and Bhāmati has been mainly responsible not only for making one mistake Sri S'ankara, but also for weakening the philosophical position of Advaita as a spiritual pursuit and a way of life. In fact it was the 'twist' of these commentators, which gave rise, incidentally, to the two formidable Vedantic schools of Vis'ishtādvaita of Sri Rāmānuja and Dvaita of Sri Madhva.

The perspective of going back to S'ankara, and his faithful interpreter, i. e. Sures'wara, to alleviate the philosophical difficulties encountered by Advaita, and to seek metaphysical solutions and spiritual realisation, has been vigourously continued in the present work by Sri Vittala Sastri, a great follower af the late revered Swamiji.

To go back to Sri S'ankara to understand Sri S'ankara and his Advaita is the soundest of the academic procedures, and however great and hoary the historical tradition may be, the great Master and Sage Sri S'ankara himself must receive due attention of all those who are after discovering the genuine springs of and insights into the truth of Non-dualism. The approach has its own redeeming features. First, we are face to face with the Master speaking to us, and second, we are freed from the complicated problems which the tradition of Advaita gathered in its developmental course, when, short of becoming a philosophical and spiritual endeavour, Advaita became a dialectical warfare mostly depending on logical wit and acuteness. Some of the most important of the difficulties that generally face a serious minded Advaitin may be enumerated thus :

*(a)* Acceptance of '*Mūlavidya*', fundamentally affects, the non-dual or absolute position of Sri S'ankara. That is, it compromises basically with the dualistic and realistic trends, which Advaita seriously contends. It has given rise even to the dual concepts of the Ultimate as Nirguṇa and Saguṇa or Impersonal and Personal Brahmans. To explain them away as means to cater to the different levels of philosophical and religious impulses, is to miss Sri S'ankara's main thesis; that is, to cut asunder life, which is an integral whole, and the Real, which is a unity.

*(b)* Not only it fails to answer the 'origin' of 'life' and the 'world of matter', but makes 'liberation' look almost impossible, as against confirmations and evidences tested and verified from an 'existential' situation like '*Sushupti*' or dreamless sleep. Further, the non-metaphysical stand of '*Mūlāvidyā*' has put the most redeeming feature of '*jeevanmukti*' to disrepute and has led to its criticism by adversaries of Advaita. No grosser damage can be done than this for a spiritual realisation here and now.

*(c)* Acceptance of the concept is so 'unnatural' to the metaphysical truth of Advaita, in that it demands purely an empirical and mundane inquiry (whose origin itself is false) into the problems of the 'locus' and 'object' of 'mūlāvidyā' and its subsidiary 'tūlāvidyā'. This demand, it could easily be seen, has made Advaita run into a dialectical quagmire or quicksand making it impossible for one who accepts it to pull himself out. One could see that it has given the problem a logical but metaphisically false status. Much of Advaita dialectics is preoccupied with the solutions of this problem to no one's satisfaction, much less of a non-advaitin. An inquisitive mind can easily see for himself that the theistic Vedantas of Vi'istādvaita and Dvaita have subjected Advaita to searching criticism on the stand it takes with regard to '*avidyā*', main and subsidiary, and finding their 'locus' and 'objects'.

Academically, or spiritually too, it is of great interest to ask, should one go on fighting a false battle, or to correct an original mistake, thus paving the way for the realization of absolute peace or liberation or freedom that is Self, which according to Advaita is the Ultimate Reality?

It is shown by the present author of the work, and his *'guru'*, the late swamiji, that the initial mistake lay in wrongly taking Sri S'ankara's use of technical terms, such as *'vidyā'*, *'avidyā'*, *'adhyāsa'* and *'māyā'*. where no doubt could arise in Sri S'ankara's definition of 'Vidyā' (cf. Adhyāsa Bhashya : *'tadvivekena vastu-svarūpāvadhāraṇam vidyāmāhuh'*), all complications arose when 'avidyā', which he defined as *'adhyāsa'* or 'mistaking the reality of its true nature', was mistaken. For Sri Sures'wara *'agrahaṇa'* is the base for *'anyathāgrahaṇa'* or 'taking a thing for what it is not'. This is exactly an error of understanding, or of non-discrimination between a thing and what it is not, or which is the same thing as a mistaken transference of characteristics of one upon the other and taking a thing for what it is not.

It should be easy to understand that this mistaken mental estimation of an object, natural in a human situation, is at the base of illegitimately foisting something on the Self that does not belong to it. It is this mental aberration which conjures up the duality and variety of names and forms, the source of which Sri S'ankara calls 'māyā' deluding us to thinking the One as many and the false as Real. To demand a further base for an 'incidental' or 'situational' non-discrimination, which is 'avidyā' or 'agrahaṇa' is to posit or institute a 'root-cause' behind these, and further

to make it co-eval with the Self is the genesis of the whole 'misadventure'.

Sri S'ankara clearly analyses the 'natural' or 'situational' problem, and shows a way out of non-discrimination or non-understanding (*agrahaṇa*), doubtful understanding (*saṁśaya*), and illegitimate transference (*adhyāsa*), all of which he calls '*avidyā*' (ignorance) which, for him is misunderstanding. The way is to stand under the lime-light of the Self or the Witness, by analysing the span of one's own experience. From this vantage position, as it were, all mental aberrations and concoctions disappear, leaving one in his original pure state of the 'non-dual' which is the basis of all existence. Sri S'ankara advocates the technique of 'listening' to 's'ruti' whose foundational validity lies in experience of '*anubhava*' of one's own being. For, ultimately what bestows validity to the authority of the 's'ruti' is the self-evident truth of all being which constitutes one's own Self in its pure or transcendental state. The **being** of the Self is its own **expression**, and s'ruti is to be understood as the confirmation of the **'inaudible expression' of one's own being.** It is being, it is luminosity, it is bliss. And what the traditionally known 's'ruti' is able to do, is to remind us that the anātman is not the Reality. The restoration is not a new creation of our being, and the awareness is not to obtain or earn a new being. Invitation is held out to any one by Advaita to this 'self-evident' 'existential' truth (not in the modern contemporary sense of the Existentialist), provided one has a desire to get out of a tutored path, and to look at himself, i.e., by turning attention inward.

The problem, it appears to me, is fundamental to philosophy and life, and it behoves all to examine the way Advaita has been made to run its course in tradition and history, and to evaluate for himself the dignity and freedom of the intuitive perspective or standpoint that Sri S'ankara took and has offered to the solution of the problem.

With this preamble, which was necessary, let us come to the present work. It originates as a 'reply' to another work, whose purport is evident by its title: " MŪLĀVIDYĀ–BHĀSHYAVĀRTIKA-SAMMATĀ " by a learned scholar in the lore, Sri K. Krishna Jois. The reply of Sri S. Vittala Sastri aims to show as the title of his work indicates : " MŪLĀVIDYĀ–BHĀSHYAVĀRTIKA-VIRUDDHĀ ".

It is one thing to say that the problems, hitherto mentioned, arose out of mistaking Sri S'ankara by his chief commentators, and quite another thing to say that Sri S'ankara (in his own works on '*Prasthāna traya*') and Sures'wara (in his Vārtikas) have themselves permitted the use of such terminology as would give rightful scope for the conception of '*Mūlāvidyā*', and that no exclusive fault could be laid at the doors of the traditionally respected commentators. Sri Jois, in his aforesaid work, has taken this latter stand, and has thus shifted the basis of any controversy in this regard to Sri S'ankara and Sures'wara themselves. This in itself is interesting. However, Sri Sastri, in his present work, counters point by point the contention of the former. He shows, by implication, that the effort at foisting the gross error (of 'mūlāvidyā') committed by Vivaraṇa and Bhāmati schools on Sri S'ankara is a case of a scholar's *adhyāsa* ! It should be

said to the credit of Sri Sastri that the entire discussion is carried on with a genuine academic spirit. He adduces proper evidences for his stand from Sri S'ankara and Sures'wara, while replying. He throws much light on several points at issue, and clarifies our understanding of the basic positions of Sri S'ankara and Sures'wara.

In keeping with the high veneration he has towards his '*guru*' for all the inspiration and light derived from him, Sri Sastri dedicated his work to the memory of the late Satchidanandendra Saraswati Swamiji.

A deep insight, such as is found in the work of Sri Sastri, is sure to have its effect on the reader to re-examine the whole Advaita dialectics in the light of Sri S'ankara. The book, it is believed, will have a far-reaching impact on the philosophical world which may still be desirous of knowing Sri S'ankara and how he presents his case. Indirectly, the work voices the authentic views on the subject of the late Swamiji, who worked and lived for understanding Sri S'ankara and none but Sri S'ankara.

*University of Mysore,*
*Mysore, 16–10–75*

**K. B. RAMAKRISHNA RAO**

# उपोद्घातः

महाविद्वांसा श्री विट्ठलशास्त्रिणः स्वरचितपुस्तकस्य उपोद्घातं 'भवद्भिर्लेखनीयम्' इति पप्रच्छुः। तदा मम मनसि द्वौ विषयौ प्रादुर्बभूवतुः। एकः ग्रन्थकर्तृविषय एव, तेषु मम अतीव गौरवमस्ति। तेषामिष्टं निराकर्तुमहमशक्तः इति। अन्यस्तु तद्ग्रन्थे तैरादृतो जिज्ञास्यो विषयः शास्त्रीयविषयः अध्ययनयोग्यः, तत्त्वविचारदृष्ट्या अतीव महत्त्वविशिष्टः, मम यथा तथा अन्येषामपि उपाध्यायवृत्तौ प्रविष्टानां एतद्विषये अनादरः नैव स्यादिति मन्ये॥

अस्मिन् पुस्तके अद्वैतसिद्धान्ताध्ययने 'मूलाविद्या' अतिमुख्या समस्या, इयं प्रक्रिया श्रीशङ्कराचार्याणां संमता वा असंमता वा इत्येव विचारः प्रचलितः। ब्रह्मसूत्रव्याख्यातारः पञ्चपादिकाविवरणाचार्याः भामतीकारा वाचस्पतिमिश्राश्च मूलाविद्याप्रक्रियाया अतीव प्रधानं स्थानं ददुः। इदानीं श्रीशङ्कराद्वैतसिद्धान्ताध्येतारः व्याख्यातॄणां पद्धतिमनुसृत्यैव व्याख्यानमूलकेनैव भाष्याध्ययनं कुर्वन्तो दृश्यन्ते। तस्मादद्वैतदर्शनचरित्रं व्याख्यात्रभिप्रायानुसारि सञ्जातम्॥

विवरणभामतीप्रक्रियाभ्यामन्या वार्तिकप्रक्रिया विराजमाना वर्तते। वार्तिककारास्सुरेश्वराचार्याः (१) बृहदारण्यक भाष्यवार्तिका. (२) तैत्तिरीय भाष्यवार्तिका – इति द्वौ ग्रन्थौ नैष्कर्म्यसिद्ध्याख्यं स्वतन्त्रग्रन्थं च विरचयामासुः। सुरेश्वराचार्यास्साक्षाच्छ्रीशङ्कराचार्यशिष्याः, शङ्करसिद्धान्तानुसारिणः मूलाविद्याप्रक्रियां नाङ्गीचक्रुः। अतः मूलाविद्याप्रक्रिया प्रथमद्वितीयव्याख्यातृभिरेवादृता वा? भाष्यानुगृहीता वा अननुगृहीता वा इति वादग्रस्ता वर्तते॥

प्रायशः अर्धशतमानात्पूर्वमेवं होळेनरसीपुरस्थाः श्रीसच्चिदानन्देन्द्रसरस्वतीस्वामिनः 'मूलाविद्या'भाष्ये वार्तिके वा नैवास्तीत्युद्घोषयामासुः। श्री स्वामिनः अद्वैततत्त्वविचारे मूलाविद्याप्रवेशस्य अवकाशो नास्ति, पञ्चपादिकाकाराः मूलाविद्याप्रक्रियां भाष्ये क्लेशेन प्रवेश्य श्रीशङ्कराचार्या एव इमां प्रक्रियां बोधयामासुः इति तेषु आरोपयामासुः इति प्रकटयामासुः॥

अनया मूलाविद्याप्रक्रियया अद्वैतसिद्धान्तस्य द्विविधा हानिरभूदिति श्रीस्वामिनः प्रकटयामासुः। एका – श्रीशङ्कराद्वैतं श्रीशङ्करग्रन्थैरेव ज्ञातुं

व्याख्यानत्रयं प्रतिबन्धकमभूत् । द्वितीया—भारतीयतत्त्वशास्त्रेषु अद्वैततत्त्वस्य एकविधमस्थिरत्वं प्रापितम् । तस्मात् श्रीशङ्करभाष्यस्य क्लेशेन अन्यार्थकल्पनैव श्रीमद्रामानुजाचार्याणां विशिष्टाद्वैतसिद्धान्तस्य, श्रीमन्मध्वाचार्याणां द्वैतसिद्धान्तस्य च प्रादुर्भावे बहुशः कारणमभूत् । श्रीस्वामिभिः स्वकीयानेकग्रन्थेषु विचारितद्वैतेतिहाससमीक्षणया इमे अंशाः प्रकटीकृताः । दीर्घकालाध्ययनसमालोचनाभ्यां परिपूर्णोऽयं श्रीस्वामिनामभिप्रायः । अद्वैतवेदान्ताध्ययनक्षेत्रे गमनार्हपरिणामं चकार । नूतनक्रान्तेराविर्भावस्य च कारणमभूत् ॥

शुद्धशास्त्रीयदृष्ट्या शाङ्करसिद्धान्तस्य यथार्थज्ञानलाभे श्रीशङ्करग्रन्था एव शरणं न व्याख्यानादिकम् इत्येतत्सर्वैरङ्गीकर्तव्यमेव भवति ॥

तत्त्वशास्त्रेतिहासे नवीनसंप्रदायपरम्पराप्राप्ता इमे मार्गा अतिमहत्त्व विशिष्टा अपि, व्याख्यातारो अनेकशास्त्रज्ञानसम्पन्ना महाविद्वांसोऽपि, तान् विहाय अनुभवगम्यां तत्त्वदृष्टिं प्रेप्सूनां आचार्यग्रन्थाः केवलं शरणं नान्यदित्यभिप्रायस्सूक्तः आदरणीयश्च । अद्वैततत्त्वं न केवलतर्कगम्यम् । किन्तु अध्यात्ममार्गगम्यम् । संस्कृतिजन्यानुभवगम्यं च । अद्वैतेतिहासे शुष्कतर्कप्राधान्येन इमे क्लेशाः प्राप्ताः । तद्यथा — इयं मूलाविद्याकल्पना श्रीशङ्करपरमार्थतत्त्वदर्शनदृष्टेर्विस्मरणेनैव सञ्जाता इति वक्तुं युज्यते मूलाविद्याङ्गीकारे परैरुद्भावितानाक्षेपान् कथं परिहरेयुरित्येतद्द्रष्टव्यम् ॥

न केवलं अद्वैतसिद्धान्तः पारमार्थिकदृष्ट्या यद्द्वैतं निराकरोत्, मूलाविद्याङ्गीकारे तदेव द्वैतमङ्गीकृतमिव भवति । किन्तु सगुणब्रह्मनिर्गुणब्रह्मेति द्वे तत्त्वे अङ्गीकृते भवतः । केचित् तत्त्वज्ञानिनां निर्गुणं ब्रह्म धार्मिकप्रवृत्तियुक्तानां सगुणं ब्रह्म इति समादधते । मूलाविद्याङ्गीकारे अद्वैतं वस्तुतः द्वैतमेव भवतीत्यस्याः समस्यायाः अयं तु परिहारो न भवति । ब्रह्म द्वैविध्यं शाङ्करसिद्धान्तस्य विरुद्धं भवति । एतेन अखण्डब्रह्मतत्त्वं ब्रह्मात्मानुभवं च खण्डितमिव भवति ॥

मूलाविद्याङ्गीकारे जीवन्मुक्तेरेव अभावः प्रसज्यते । किं च अनुभवप्रधानेषु प्रमाणभूतेषु सुषुप्त्यादिषु अनुभवगम्यं आत्मैकत्वांशं अनृतमिति ब्रूयात् । एतेन अद्वैतप्रतिपाद्या अनुभववेद्या जीवन्मुक्तिरेव मृषेति संपद्यते ।

अतो मानवानुभवस्यैव अपरिहार्यनाश एव संभवति । अद्वैतविरोधिनां इतरवेदान्तिनां तीक्ष्णाक्षेपाणां अद्वैतं एवंरीत्या लक्ष्यमेव भवति । अद्वैततत्त्वं अत्रैव ज्ञानसमकाल एव जीवत एव सिद्ध्यतीत्यस्य शाङ्करसिद्धान्तस्य एतादृशः आघातसमः अन्यो महानाघातो नास्ति ॥

मूलाविद्या अद्वैततत्त्वस्य अस्वाभाविका । मूलाविद्याकल्पनैव केवल व्यावहारिका । इयं भौतिकविचारक्रमानुसरणेन प्राप्तेति ज्ञायते । सर्वस्यापि कारणं विचिन्वती मानवप्रवृत्तिः मानवाविद्यांया अपि एकं कारणं स्यात् । तथैव अविद्याद्वयस्यापि आश्रयो विषयश्च भवेतां इति संभावयेत् । अनिर्वचनीयवस्तुभूताया मूलाविद्यायाः ज्ञानबाध्यत्वं कथम् ? अनादेरन्तवत्त्वं कथम् ? मूलाविद्या जगदुपादानकारणीभूता इत्यङ्गीकारेण तदनन्यत्वाधिकरणन्यायेन परमार्थभूता एव इयं स्यात् । श्रुत्युक्तं साक्षाद्ब्रह्मकारणत्वं बाधितं भवेत् । सृष्टेः पूर्वं अद्वितीयात्मैवाभूत् इति आत्मैकत्वप्रतिपादिकायाः श्रुतेर्बाधो भवेत् इत्याद्यानाक्षेपानुद्भाव्य तेषामुत्तरमपि तैर्दत्तम् । एतादृशप्रश्नोत्तराणि व्याख्यानपरम्परायां दृश्यन्ते । परन्तु अत्रोक्ताः परिहारा न समञ्जसाः । एतेषामाक्षेपाणां परिहारोऽसंभव इतीदृशी शोचनीया दशा अद्वैतस्य संप्राप्ता । इमां मूलाविद्यामङ्गीकुर्वन् पुरुषः पङ्के निमग्नः ततो बहिर्गन्तुमशक्तो भवतीत्येतत् सहजभूतम् ॥

नवीनसंप्रदायानुसारिणः एतेषामाक्षेपाणां यान् परिहारान् वदन्ति ते विचारपराणामद्वैतिनामेव समाधातुमशक्ताः किं पुनरन्येषाम् ?

परमार्थदृष्ट्या मूलाविद्याप्रश्न एव नोद्भवति । अविद्याश्रयविषयौ केवलव्यक्तिमात्रसंबद्धौ, सापेक्षिकौ च । तयोः सामान्यकरणं नावश्यकम्, न शक्यं च इत्यादिः श्रीशङ्कराभिप्रायो गमनार्हः । कस्येयमविद्या इति प्रश्नस्य 'यः पृच्छति तस्यैवेयं इति वदामः' इत्युत्तरं सर्वानपि प्रबोधयति । श्रुत्युक्तरीत्या अहं ब्रह्मास्मीत्यनुभवे जाते अविद्यैव नास्तीत्याचार्याणामुक्तिः तेषामद्वैतात्मनिष्ठां द्योतयति । अत्रैव जीवन्मुक्तिः साध्या इत्याचार्यैः प्रदर्शिता ॥

श्रीमदाचार्याः ब्रह्मात्मना स्थित्वा प्रपञ्चस्थितिं परीक्ष्याज्ञानामुद्धरणार्थं तस्य मुक्तिपरस्योपदेशस्य अन्यथाग्रहणमेव एतेषां वादविवादानामङ्कुरमभवत् । न कोऽपि पुरुषः शङ्करस्य अनुभवावसानमुपदेशं उपेक्षितुमर्हति । एवं स्थिते

मिथ्याभूतवादविवाद एव बुद्धिशक्तिप्रदर्शनं न्याय्यं उत पूर्वानुसृतमार्गस्थित-दोषाणां समीकरणे प्रयत्नकरणं न्याय्यम् वा इति विचारः इदानीमत्यवश्यकः खलु !

श्रीसच्चिदानन्देन्द्रसरस्वतीस्वामिभिरुक्तरीत्या अद्वैतं यथावत् ज्ञातुं श्रीशङ्करग्रन्था एव शरणं इत्युक्तिमनुसृत्य प्रस्तुतग्रन्थकर्तारः श्रीविट्ठलशास्त्रिणः ' मूलाविद्या – भाष्यवार्तिकसंमता ' इत्याख्यग्रन्थोक्तानां पूर्वपक्षाणां सदुत्तरं ददुः । महाविदुषां श्रीकृष्णजोयिसराख्यानां 'मूलाविद्या–भाष्यवार्तिकसंमता' इत्याख्यस्य ग्रन्थस्य उत्तरप्रदानरूपेण अयं ग्रन्थः समजनि ॥

श्रीशास्त्रिणः मूलाविद्याकल्पना भाष्यवार्तिकविरुद्धा इति सप्रमाणं प्रदर्शयन्ति । श्रीमतां जोयिसर् आख्यानां सर्वेषां वादानां प्रत्येकं प्रत्येकं उत्तरं दत्त्वा स्वनिर्णयं प्रख्यापयन्ति । एतद्विचारसंबद्धानमन्येषां विचाराणां आविष्करणं च चक्रिरे । एभिः प्रदर्शितातिगम्भीरा दृष्टिः विषयप्रतिपादन-सरणिश्च तत्त्वजिज्ञासूनां मनसि औत्सुक्यं जनयतः इत्यत्र न कोऽपि संदेहः ॥

अस्मिन् ग्रन्थे चर्चितो विचारः न केवलं तर्कसंबद्धः किन्तु स्वोद्धार-स्यापि कारणीभूतः । एतदध्ययनशीलानां श्रीशङ्कराद्वैतनिष्ठाप्रेप्सूनां अत्र समाधानं लभ्यते । नवीनसंप्रदायः इतिहासश्च अद्वैतसिद्धान्तस्य कीदृशं परिणामं निन्याते ? तत्त्वदृष्ट्या अयं समीचीनमार्गः किम् ? इत्येतद्विमर्श-नीयम् । अविद्यासमस्यापरिहारार्थं श्रीशङ्करैरनुभूता निष्ठा कीदृशी ? तैः प्रदर्शितस्य अपरोक्षमार्गस्य आध्यात्मिकस्वातन्त्र्यस्य च उपेक्षा युक्ता किम् ? अनयोर्विमर्शनेन अविद्यासमस्या परिहृता भवति ॥

अत्रोक्ता विचारसरणिः श्रीशङ्कराद्वैतं यथावद् ज्ञातुं श्रीशङ्कराद्वैत-प्रतिपादनार्थमेव जीवतां ब्रह्मीभूतानां श्रीसच्चिदानन्देन्द्रसरस्वतीस्वामिनां अधिकृतवाणीत्यहं मन्ये ॥

श्री विट्ठलशास्त्रिणः श्रीस्वामिनां प्रीतिपात्रानुयायिनः तेषामाशयाभिज्ञाः स्वगुरूणां सेवेयमिति ज्ञात्वा इमं ग्रन्थं रचयामासुः । अयं ग्रन्थः श्रीस्वामिनां समर्पितः सूक्त इति मन्ये । श्रीविट्ठलशास्त्रिभिर्विरचितोऽयं ग्रन्थः विचार-पराणामभिनन्दनीयो भवतीत्यहं विश्वसिमि ॥

मैसूरु
1–11–75

डा. के. बी. रामकृष्णराव्,
वेदान्तप्राध्यापकः, मानसगङ्गोत्री.

# अभिप्रायनिवेदनम् (१)

वेदान्तविशारदेत्यादिबिरुदाङ्कितैः वे. ब्र. श्री. विट्ठलशास्त्रिभिः प्रेषितः 'मूलाविद्या–भाष्यवार्तिकविरुद्धा' इति विमर्शात्मको ग्रन्थः मद्धस्तमुपगतः अवलोकितश्च । तत्र प्रथमं शाङ्कराद्वैतस्वरूपं प्रमाणोपन्यासमुखेन सविस्तरं समुपस्थापितम् मुमुक्षूणां कृते । अग्रहणाद्यविद्यात्रये प्रमाणवचनान्युदाहृतानि । तत्र अध्यासः प्रधानतया निर्दिष्टः । मायायाः अविद्याकल्पितत्वं सप्रमाणं प्रदर्शितम् । मायाऽविद्ययोरभेदे 'अविद्यात्मिका बीजशक्तिः' इत्यत्र 'अविद्यात्मिका अविद्या' इति उक्तं भवेदिति अनिष्टं प्रसञ्जितं प्रतिवादे । ब्रह्मणः जडात्मिकया मायया समाच्छादनमसंभाव्यमित्यत्र इन्धनस्य अग्निसमाच्छादनत्वमिवेति मनोहारी दृष्टान्तो दत्तः । अनादिभूतायाः मूलाविद्यायाः ज्ञानबाध्यत्वं न स्यादिति दोषोऽपि प्रतिवादिशिरसि पातितः । अविद्यामायाच्छन्नः इत्यत्र सामानाधिकरण्येन व्यपदेशः सम्यक् निराकृतः । अविद्यालक्षणा इत्यत्र 'अविद्यया लक्ष्यते' इति व्युत्पत्तिमाश्रित्य मायायाः अविद्याकृतत्वं समर्थितम् । 'कारणशरीरप्रतिषेधः' इत्यत्र अग्रहणस्यैव कारणत्वं शरीरत्वं च सम्यक् प्रदर्शितम् । अग्रहणवत् अध्यासोऽपि शरीराद्यस्तित्वभाने कारणत्वात् ज्ञाननाश्यत्वाच्च कारणम् इति शरीरम् – इति च व्यपदेशमर्हतीत्यपि वक्तुं शक्यते । स्वतन्त्रा वा ईश्वराधीना वा मूलाविद्या न अस्मदीयेन ज्ञानमात्रेण विध्वंसितुमर्हति इत्यपि गाढा युक्तिरपि योजिता । 'मम माया' इत्यत्र मायायाः स्वभूतत्वं तस्या अविद्याकल्पितत्वे एव समञ्जसं भवतीति आञ्जस्यं उपन्यस्तम् । एकविज्ञानेन सर्वविज्ञानप्रतिज्ञामादाय मूलाविद्याया तत्त्वान्तरत्वं अपनोदितम् । अनिर्वचनीयमपि वस्तुभूतं न जायते इत्येतदपि मायाविद्याप्तोपन्यासेनापि स्फुटीकृतम् । शुद्धस्यैव ब्रह्मणः जिज्ञासितव्यत्वानुसारेण ब्रह्मणः अभिन्ननिमित्तोपादानत्वनिर्वाहाय मूलाविद्याया अपि ब्रह्मणि कल्पितत्वं आगत्या आनीतम् । एतत् युक्तमेव । ब्रह्मण एव सुप्तिस्थानत्वम्, विज्ञानात्मना ब्रह्मणि सम्प्रतिष्ठितत्वं सत्सम्पत्तिः – इत्येते विषयाः विशदीकृताः ॥

एवं श्रीमन्तः शास्त्रिवर्याः प्रतिवाद्युद्भावितान् सर्वानाक्षेपप्रकारान् 'संमतवादिनः, स्वाशयः' इति सरणिमादाय समादधिरे । भाष्यैकशरणानां विविदिषूणां कृते प्रस्फुटया सरळया शैल्या ग्रन्थमिमं विरचय्य गूढान् शास्त्रीयान् विषयान् प्राकश्यमानीय महान्तमुपकारमकुर्वन् । शाङ्करसिद्धान्तजिज्ञासवः इमं ग्रन्थं पठित्वा सम्यग्विवेचनेन शङ्करभगवत्पादीयमभिप्रायं मनसि आनीय कृतकृत्या भवेयुरित्याशासे ॥

बेङ्गळूरु
15-10-75

तर्कवेदान्तविद्वान्
**होसकेरे अनन्तमूर्तिशास्त्री,**
निवृत्त तर्कप्राध्यापकः
बेङ्गळूरु चामराजेन्द्रसंस्कृतमहाविद्याशाला.

# अभिप्रायनिवेदनम् (२)

पण्डितवरेण्यैः श्री कोड्डूरु कृष्णजोयिसर् महाशयैः 'मूलाविद्या-भाष्यवार्तिकसंमता' इत्येतस्मिन् स्वनिर्मिते ग्रन्थे स्वपक्षोपपादनाय यानि भाष्यवार्तिकादिवाक्यान्युदाहृतानि, तेषु किञ्चिदपि वाक्यं मूलाविद्या-निरासकाराणां श्रीसच्चिदानन्देन्द्रसरस्वतीस्वामिपादानां विचारगोचरे अपतितं नैव विद्यते । यथा च तेषां वाक्यानां अग्रहणाद्यन्यतमरूपाविद्यापरत्वमेव, अविद्याकल्पितनामरूपात्मकमायापरत्वमेव च, न चैव तु मूलाविद्यापरत्वम्, तथा श्रीचरणैः मूलाविद्यानिरास–सुगमा–वेदान्तप्रक्रियाप्रत्यभिज्ञादि नैक-ग्रन्थेषु विस्तरशः प्रदिपादितम् । तथापि मृतमिव तं मूलाविद्याङ्गीकारपक्षं बहोः कालात्परमिदानीं पुनरुज्जीवयितुं अमृतसेकसदृशं कं वा उपायमेते संगृहीतवन्तः इति तद्ग्रन्थसमालोचनेनापि न ज्ञायते । तत्रैवं सति परप्रद्वेषकरात् तत्खण्डनात् विमुखीभूय तूष्णीमवस्थानमेव युक्तं मूलाविद्या-निरासपक्षीयाणाम् । तथापि मुमुक्षूणां परिशुद्धशाङ्कराद्वैततत्त्वजिज्ञासूनां परिशीलितभाष्यवार्तिकादिग्रन्थानामपि एतद्ग्रन्थावलोकनेन पुनरपि तेषु विरुद्धार्थप्रतिपत्त्यापत्त्या निश्रेयसात्प्रतिहतिः स्यात्, सा मा भूदित्यनुकम्पया 'वादे वादे जायते तत्त्वबोधः' इति न्यायमनुसृत्य पण्डितवरेण्याः श्री विट्ठलशास्त्रिमहोदयाः तत्प्रतिपाद्यविषये स्वाभिप्रायप्रकाशनव्याजेन तत्खण्डनेऽपि प्रवृत्ताः स्युः, स्थूणानिखननन्यायेन आक्षेपसमाधानाभ्यां प्रतिपाद्यमानो विषयः विशेषतो दृढीभवेदिति वा । एवं च पुटपाकेन सुवर्णमिव भाष्य-वार्तिकादिवाक्यार्थविवरणरूपेण स्वग्रन्थेन मूलाविद्यानिरासवादं परिशोधयितुं प्रवृत्ताः श्री कोड्डूरु कृष्णजोयिसर् महोदयाः तं वादं विशेषतो देदीप्यमानमेव कृतवन्तः इति, त एव पण्डितवरेभ्यः श्री विट्ठलशास्त्रिमहोदयेभ्योऽपि विशेषतः स्तुत्या भवन्ति । अतस्तेभ्यः सप्रणामं कृतज्ञतां निवेदयामः ॥

अध्यात्मप्रकाशकार्यालयः,
बेंगळूरु-२८
10-9-1976

विद्वज्जनविधेयः
परकजे सुब्रह्मण्यभट्टः
वेदान्तशिरोमणिः

# अभिप्रायनिवेदनम् (३)

वे. ब्र. श्रीयुक्तैः वेदान्तशिरोमणीत्यादिबिरुदाङ्कितैः विद्वच्छास्त्रिमहाशयैः विरचितमिदं पुस्तकमहम् अवलोकितवानस्मि । श्री शास्त्रिमहोदयाः ब्रह्मीभूतानां श्री परमहंससच्चिदानन्देन्द्रसरस्वतीमहास्वामिनां मुख्यशिष्याः, तेषां प्रक्रियानुयायिनश्च सन्तः श्रीशङ्करभगवत्पादीयभाष्य-व्याख्यानादि नैकवेदान्तग्रन्थाध्ययननिपुणाः भाष्यव्याख्यानप्रस्थानयोर्वैलक्षण्यविदः, नैकविद्वत्सभासु गोष्ठीषु च पण्डितानां सविधे वाक्यार्थप्रवीणाश्च वर्तन्ते । इमे पण्डितप्रकाण्डाः अध्यासवाद मूलाविद्यावादयोर्मध्ये अध्यासवादप्रक्रियैव श्रीशङ्करभगवत्पाद – सुरेश्वरादिगुरुपरम्पराप्राप्ता, अद्वैतवेदान्तसिद्धान्तावगमे द्वारभूता वर्तते, मूलाविद्यावादाङ्गीकारे द्वैतापत्तिः अद्वैतहानिश्च स्यातामित्येतानि विषयाण्यधिकृत्य इमं प्रबन्धं संमतवादिभिरुपक्षिप्ताक्षेपाणां निरसनपूर्वकं निरासकाराणामभिप्रायविवरणपूर्वकं च रचयित्वा जिज्ञासूनामुपकाराय अध्यात्मप्रकाशकार्यालयद्वारा ग्रन्थरूपेण प्रकटीकृत्य गुरुचरणारविन्दयोः समर्पितवन्तः विराजन्ते ॥

श्रीशास्त्रिमहोदयानामयं ग्रन्थः सर्वत्र विद्वद्वृन्देषु वेदान्तजिज्ञासूनां गोष्ठीषु च प्रचारमुपलभ्य भगवत्पादीयशुद्धवेदान्तप्रक्रियाज्ञाने प्रदीपवत् चिरकालं प्रकाशतां गुरुचरणानुग्रहेणेत्याशास्ते ॥

होळेनरसीपुरम्
१०-१०-१९७५

सुहृदुपासकः
हेच्. एस्. लक्ष्मीनरसिंहमूर्तिशर्मा
अध्यात्मविद्याप्रवीणः,
अध्यात्मप्रकाशकार्यालयपण्डितश्च ।

# अशुद्धिसंशोधनम्

सूचना :— दर्शनमात्रेण सूक्ष्मा दोषा उपेक्षिताः ॥

| पुटे | पंक्तौ | स्थाने | पठितव्यम् |
|---|---|---|---|
| १ | ६ | प्रतिपादयितव्यौ | प्रतिपादयितव्ये |
| २ | ३ | इत्यादि प्रतिपादितम् | इत्यादि । |
| २ | ९ | प्रादर्श्य | प्रदर्श्य |
| २ अ. | २ | सम्यज्ञानेन | सम्यग्ज्ञानेन |
| ७ | १३ | एतादृशा | एतादृशी |
| ७ | १४ | ...पुरस्सरा | ....पुरस्सरं |
| ७ | १५ | प्रतिपादितः | प्रतिपादितम् |
| ८ | ३ | अविद्या कल्पिता | अविद्याकल्पिता जगतः कारणमित्युक्तं |
| ९ | ११ | अविद्या | माया |
| ११ अ. | ७ | विमर्शयामि | विमृशामि । |
| १२ | ९ | न प्रयुक्तः | प्रयुक्तः |
| १२ | १० | 'अनेकार्थेषु न प्रयुक्तः' | (एतत् त्यक्तव्यम्) |
| १२ | १० | एव प्रयुक्तः | प्रयुक्तः |
| १२ अ. | ४ | अनर्थका | अनर्थिका |
| १४ | १० | निष्प्रयोजकत्वमेव | निष्प्रयोजनत्वमेव |
| १५ अ. | २ | 'नामरूपोपाधेश्च | (एतत् त्यक्तव्यम्) |
| १० अ. | ७ | एवम् | एव |
| २१ अ. | ११ | मूलकारणे भूत | मूलकारणीभूत |
| २२ | ७ | इति | इति वचनं तु |
| २२ अ. | ६ | प्रज्ञायै | प्रतिज्ञायै |
| २२ | ७ | ...भूद्विजा... | ....भूद्वीजा.... |
| २५ | १० | तस्मादव्याकृत... | अव्याकृत.... |
| २५ अ. | ९ | वक्तुं | वक्तुं ते |
| २५ अ. | ७ | अवधार्या | अवधार्यम् । |
| २६ | १४ | ज्ञाप्सेत | ज्ञाप्येत |
| २६ | १० | तस्मादात्मनः | तस्मादात्मव्यतिरेकेण |
| २६ | १ | 'इदानीं प्रदर्श्यते' | (एतद्वाक्यं संमतवादिनामिति मन्तव्यम्) |
| २६ | ५ | 'गूढाविद्येति' | एतदनन्तरं 'संमतवादिनो वदन्ति' इति योजितव्यम् । |

'आत्मा नास्तीति' प्रत्याख्यातुं केनचिदपि न शक्यते। कुतः प्रत्याख्यातुरेवात्मा सः सुप्रसिद्धः अपरोक्षस्वरूपः; आत्मनि शास्त्रप्रामाण्यं तु अविद्याकल्पितभेदनिवृत्तिपरत्वेनैव नान्यथा – इत्यादिप्रतिपादितम् ॥

प्रमाणसिद्धस्य प्रपंचस्य नास्तीति निषेधः कथम्? इति चेत् प्रमाणानां अविद्याप्रत्युपस्थापितत्वात् अविद्यावता दृष्टः प्रपंचः परमार्थो न भवति। उदितायां च विद्यायां प्रपञ्चस्यादर्शनात् ॥

का नाम सा अविद्या? 'अथातो ब्रह्मजिज्ञासा' इति सूत्रस्थजिज्ञासापदस्य 'ज्ञातुमिच्छा जिज्ञासा' इति विवरणं कृत्वा ज्ञानस्वरूपमपि अवगतिपर्यन्तं ज्ञानं इति प्रादर्श्य, तादृशज्ञानबाध्या अविद्या कीदृशीति प्रदर्शयितुं अध्यासभाष्यं प्रसक्तम्। तत्र आत्मानात्मनोरितरेतराध्यासलक्षणा सा। 'तमेतमेवंलक्षणमध्यासं पण्डिता अविद्येति मन्यन्ते', 'एवमयमनादिरनन्तो नैसर्गिकोऽध्यासो मिथ्याप्रत्ययरूपः कर्तृत्वभोक्तृत्वप्रवर्तकः सर्वलोकप्रत्यक्षः।' इति च प्रतिपादितम्। एवं च 'देहोऽहमिति या बुद्धिस्साऽविद्या' इत्युक्तं भवति। देहादिसंघाते आत्मबुद्धिः, आत्मनि देहबुद्धिः चतुर्मुखब्रह्मादिपिपीलिकापर्यन्तं स्वानुभवेनैव सिद्धा। इयं मिथ्याबुद्धिः नैसर्गिकी, न कारणान्तरजन्या। इमां मिथ्याबुद्धिरूपामविद्यां पुरस्कृत्य सर्वे प्रमाणप्रमेय व्यवहाराः लौकिका वैदिकाश्च प्रवृत्ताः सर्वाणि च शास्त्राणि विधिप्रतिषेध मोक्षपराणि ॥

एतादृशाविद्यावानेव खलु प्रपञ्चस्य अस्तित्वं अधिगच्छति। अविद्यावता दृष्टः प्रपञ्चः परमार्थो न भवति। विद्याभावे अभावात्। सुषुप्तौ समाधौ च इयं मिथ्याबुद्धिर्नास्ति; अत एव प्रपञ्चोऽपि तत्र न गृह्यते। जाग्रत्स्वप्नयोरियं मिथ्याबुद्धिर्वर्तते प्रपञ्चोऽपि गृह्यते। यत्सत्वे यत्सत्वं यदभावे यदभावः तत्तत्कार्यमिति न्यायेन प्रपञ्चदर्शनं एतादृशमिथ्याबुद्धिकार्यमेवेति सिद्धं भवति। किञ्च येषां ज्ञानिनां आत्मानात्मनोरितरेतराध्यासरूपमिथ्याबुद्धिः 'अहं ब्रह्मास्मि' इत्यनुभवरूपेण सम्यग्ज्ञानेन बाधिता ते खलु प्रपञ्चं न पश्यन्ति अद्वितीयं ब्रह्मैवात्मत्वेन सर्वत्र अनुपश्यन्ति ॥

तस्मात् प्रपञ्चदर्शनं आत्मानात्मनोरितरेतराध्यासकार्यं न परमार्थभूतमिति सिद्धम् ॥

तत्त्वग्रहणाभावः, अन्यथाग्रहणं संशयग्रहणम् इति अविद्या त्रिविधापि, भाष्यकारैः मिथ्याग्रहणरूपैव अनर्थकारिणीति कृत्वा सैव प्राधान्येन अविद्येति प्रतिपादिता । वार्तिककारैस्तु अग्रहणं विना मिथ्याग्रहणं न संभवतीति कृत्वा अग्रहणरूपाया एव अविद्यायाः मुख्यत्वमङ्गीकृतम् ॥

## एतस्यार्थस्य प्रतिपादकानि प्रमाणवचनानि

सूत्रभाष्ये १-३-२. देहेन्द्रियादिसंघाते आत्मबुद्धिः अविद्या; सा च आत्मन्येव आत्मबुद्ध्या निवर्तते । देहादिसंघाते आत्मबुद्धिरूपा मिथ्याबुद्धिः अविद्या आत्मयाथात्म्यज्ञाननिवर्त्या इत्युक्तम् । (बृ. ३-३ पीठिकायाम्) तद्यथा –

'यदि ज्ञानाभावः यदि संशयज्ञानं यदि विपरीतज्ञानं वा अज्ञानमित्युच्यते, सर्वं हि तत् ज्ञानेनैव निवर्त्यते' इति । अत्रापि ज्ञाननिवर्त्यमज्ञानम् अग्रहण-संशयग्रहण-मिथ्याग्रहणरूपमेव नान्यदिति सर्वशब्देन प्रकाशितम् । ज्ञाननिवर्त्यमज्ञानमेतत् त्रितयरूपमेवेत्युक्तम् ॥

भगवद्गीताभाष्येऽपि १३-२, अविद्या विपरीतग्राहकः संशयोपस्थापकः अग्रहणात्मको वा, विवेकप्रकाशभावे तदभावात् इति विवेकप्रकाशरूपज्ञानबाध्या अविद्या अग्रहणादिरूपैवेत्युक्तम् ॥

भगवद्गीतायां १८-५० श्लोकभाष्ये 'नामरूपाद्यनात्माध्यारोपणनिवृत्तिरेव कार्या' इति । अत्रापि अध्यासरूपाविद्यैव ज्ञाननिवर्त्या–इत्युक्तम् । १८-१७. श्लोकभाष्ये, 'किं च देहादिसंघाते अभिमानः अविद्यात्मकः, सम्यग्विद्यानिमित्तया आत्मनि अवगते देहादिसंघाते अहंप्रत्ययः बाध्यते' इति । अत्रापि अध्यासस्यैव ब्रह्मविद्याबाध्यत्वमुक्तम् ॥

अन्यच्च गीताभाष्ये १८-६७. श्लोकभाष्ये 'क्रियाकारकफल-भेदबुद्धिरविद्या' इति ॥

प्रश्नभाष्ये (६-८) 'अविद्यायाः विपरीतज्ञानात्........विद्याप्लावेन परं पारं तारयसि, मोहाख्यं तारयसि' इति ; अत्रापि विपरीतज्ञानरूपा ध्यासस्यैव ज्ञानबाध्यत्वमुक्तम् ॥

केनभाष्ये – प्रेत्य अमृता भवन्ति इत्यत्र । व्यावृत्तममाहंभाव-लक्षणादविद्यारूपादुपरम्य अद्वैतं आपन्नाः भवन्तीति मिथ्याज्ञानबाधानन्तरमेव अद्वैतापत्तिरुक्ता । श्रोत्राद्यात्मभावं परित्यज्य अमृता भवन्ति इत्यत्रापि अध्यासनाशादेव ब्रह्मप्राप्तिरुक्ता ॥

**वार्तिककाराः** – अज्ञानमिथ्यासंशीतिव्यतिरेकेण नापरं प्रत्यर्थिमेय-विषये मानस्येहास्ति किञ्चन । अत्रापि अग्रहण, मिथ्याग्रहण, संशय-ग्रहणान्येवाविद्या – एतत्त्रयव्यतिरिक्ता ज्ञानबाध्या अविद्या नास्ति इत्युक्तम् । अग्रहणादयः बुद्धिवृत्तयः सम्यग्ज्ञानरूपबुद्धिवृत्या बाध्यन्ते । उभयोरेकाधि-करणत्वात् अन्योन्यविरोधाच्च । एतेन प्रपञ्चस्य अध्यासकल्पितत्वात्, ज्ञानबाध्यत्वं संभवति । आत्मैकत्वं अद्वितीयत्वं अखण्डत्वं च निर्विवादं ज्ञानिभिरनुभूयत एव ॥

अविद्यामायाशब्दयोरर्थप्रतिपादने वैमत्यस्य विद्यमानत्वात्, विवरणं आवश्यकम् । अविद्या अन्तःकरणवृत्तिरूपैव ; माया तु अध्यासरूपाविद्या-कल्पिता सैव नामरूपबीजभूता जडशक्तिरिति व्यवह्रियते इति विविच्य ग्रहणार्थं भाष्यकारैरुक्तानि वाक्यानि उदाह्रियन्ते ॥

प्रपञ्चस्य मिथ्याबुद्धिकल्तितत्वात् कल्पितस्य वस्तुनः अस्तित्वाभावात् अधिष्ठानमेव तस्य स्वरूपम् । अधिष्ठानमेव उपादानकारणं निमित्तकारणं च इति कृत्वा ब्रह्मैव जगतः उपादानकारणं निमित्तकारणं च इति 'प्रकृतिश्च प्रतिज्ञा दृष्टान्तानुपरोधात्' इति सूत्रे (१-४-२३) भाष्ये च प्रतिपादितम् ॥

कार्यभूतं जगत् अनुभूयते, तस्मादस्त्येव । तस्य कारणमपि वक्तव्यम् इति वक्तॄणां अविद्यावतां समाधानार्थं मिथ्याज्ञानकल्पिता माया, नामरूपबीजात्मिका प्रपञ्चस्य कारणम् इत्युक्तम् । यदा व्यक्ताव्यक्तात्मकः प्रपञ्चः मिथ्याज्ञानकल्पितः अतः परमार्थतो नास्तीति ज्ञायते तदा प्रपञ्चोऽपि नास्ति तत्कारणमपि नास्तीति ज्ञायत एव । एतदर्थमेव प्रपञ्चस्य कारणं अविद्याकल्पिता 'माया' इत्युक्तम् । या, मा-नास्ति सा माया इत्यर्थः ॥

## मायास्वरूपप्रतिपादकवाक्यानि

१) सू. भा. २-१-१४ (२०१) 'सर्वज्ञस्य ईश्वरस्य आत्मभूते इव अविद्याकल्पिते नामरूपे तत्त्वान्यत्वाभ्यामनिर्वचनीये संसारप्रपञ्चबीजभूते सर्वज्ञस्य ईश्वरस्य माया, शक्तिः, प्रकृतिरिति च श्रुतिस्मृत्योरभिलप्येते' । अत्र स्पष्टं मायादीनामविद्याकल्पितत्वमुक्तम् ॥

२) सू.भा. २-१-२७ (२१३) 'अविद्याकल्पितेन च नामरूपलक्षणेन रूपभेदेन व्याकृताव्याकृतात्मकेन तत्त्वान्यत्वाभ्यामनिर्वचनीयेन ब्रह्म परिणामादि सर्वव्यवहारास्पदत्वं प्रतिपद्यते' ॥

[ अत्र व्याकृताव्याकृतनामरूपभेदस्यापि अविद्याकल्पितत्वं स्पष्टमुक्तम् ॥ ]

३) सू. भा. ३-२-२२ (३०४) तत्र कल्पितरूपप्रत्याख्यानेन ब्रह्मणः स्वरूपावेदनमिति निर्णीयते । रूपशब्दः मूर्तामूर्तपरः इत्येवोक्तम् ॥

[ अत्रापि मूर्तामूर्तात्मकरूपस्य कल्पितत्वमेव स्पष्टमुक्तम् । कल्पकस्तु अविद्या, अविद्यया कल्पितमिति ॥ ]

एषु स्थलेषु मायाया ज्ञानबाध्यत्वप्राप्त्यर्थं अविद्याकल्पितत्वप्रतिपादनेन अन्यत्र च अविद्यात्मिका माया, अविद्यालक्षणा माया, अविद्याप्रत्युपस्थापिता माया, अविद्याकार्या माया-इत्यादिस्थलेष्वपि मायाया अविद्याकल्पितत्वमित्येव अर्थो ग्राह्यः । मायाया एकत्वादेकत्र अविद्याकल्पिता अन्यत्र अविद्यारूपा इति वक्तुं न शक्यते ॥

४) सू. भा. १-४-३ (१४९) 'अविद्यात्मिका हि बीजशक्तिः अव्यक्तशब्दनिर्देश्या परमेश्वराश्रया मायामयी महासुप्तिः' ॥

[ अत्रापि पूर्वोक्तरीत्या अविद्याकल्पिता बीजशक्तिः इत्येव वक्तव्या नो चेद्विद्यात्मिका अविद्या इत्युक्तं भवति अद्वैतहानिश्च स्यात् ॥ ]

५) सू. भा. २-१-१४ (२०१) 'एवं अविद्याकृतनामरूपोपाध्यनुरोधी ईश्वरो भवति' ॥

[ अविद्याकृतेत्यस्य अविद्याकल्पितेत्येवार्थः ॥ ]

६) सू. भा. २-१-१४ (२०१) 'अविद्यात्मकोपाधिपरिच्छेदापेक्षमेव ईश्वरस्य ईश्वरत्वम्' ॥

[ अत्रापि अविद्याकल्पितोपाधिपरिच्छेदापेक्षं इत्येवार्थः ॥ ]

७) सू.भा. २-१-१४ (२०१) 'अविद्याप्रत्युपस्थापितनामरूपकृतकार्यकरणसंघातानुरोधिनः जीवाख्यान्' ॥

[ अत्रापि अविद्याप्रत्युपस्थापितेत्यस्य शब्दस्य अविद्याकल्पिता इत्येवार्थः ॥ ]

८) सू. भा. २-१-१४ (२००) 'अविद्यात्मकनामरूपबीजव्याकरणापेक्षत्वात्सर्वज्ञत्वस्य' ॥

[ अत्रापि नामरूपबीजस्य अविद्याकल्पितत्वमेवोक्तम् ॥ ]

९) सू. भा. ३-२-११ (३५०) 'उपाधीनां चाविद्याप्रत्युपस्थापितत्वात्' इत्यनेन सर्वोपाधीनामविद्याकल्पितत्वमुक्तम् ॥

१०) गीता ९-१० 'माया त्रिगुणात्मिका अविद्यालक्षणा प्रकृतिः' इति मायाया अविद्याकल्पितत्वमुक्तम् ॥

११) गीता १३-२३ (३११) 'प्रकृतिं च यथोक्तामविद्यालक्षणाम्' ॥

[ अत्रापि प्रकृतेरविद्याकल्पितत्वमुक्तम् ॥ ]

१२) गीता ९-८ प्रकृतिं स्वाम् = इत्यत्र भाष्ये 'अविद्यालक्षणां प्रकृतिम्' ॥

[ अत्र मूले केवलप्रकृतिशब्द एव प्रयुक्तः, भाष्यकारैस्तु अविद्यालक्षणेत्युक्तम् ।

किमर्थमिति चेत्, प्रकृतेरविद्याकल्पितत्वप्रदर्शनार्थम् । कल्पितत्वे एव ज्ञानबाध्यत्वं संभवति ॥]

१३) बृ. १–५–२ 'सर्वो ह्ययं व्यक्ताव्यक्तलक्षणः संसारः अविद्याविषयः ।' अत्रापि विषयशब्दस्य कल्पितत्वमेवार्थः ॥

१४) सू. भा. १–४–९ (१५०) 'परमेश्वरादुत्पन्ना ........ इयं अजा प्रतिपत्तव्या ।' अत्र भाष्यकारैरेव प्रकृतेर्जन्यत्वप्रतिपादनेन अनादित्वं निरस्तमेव, कल्पितत्वं प्राप्तम् ॥

१५) गीता ८–२० (१९६) 'अविद्यालक्षणादव्यक्तात्' ॥

१६. गीता ५–१४ (१३५) 'स्वाभाविका ........ अविद्यालक्षणा प्रकृतिः माया इति' । अत्रापि सर्वत्र मायाया अविद्याकल्पितत्वमेवोक्तम् ॥

तस्माच्चराचरात्मकं जगत् ब्रह्मरूपेण सर्वदा वर्तते स्वेनरूपेण कदाचिदपि नास्ति । ब्रह्मैव परमार्थं सत् इति अद्वैतं सिद्धं भवति । यदि मूलाविद्या भाष्यसंमता तर्हि अत्रैव खलु एतादृशा मूलाविद्या ज्ञानबाध्या इति मूलाविद्या लक्षणप्रमाणपुरस्सरा वक्तव्या स्यात् । अत्र सा, नोक्ता प्रत्युत सर्वानुभवसिद्धः 'अध्यास एव अविद्या' इति प्रतिपादितः अतः मूलाविद्या भाष्यसंमता इति वक्तुं न शक्यते । प्रत्युत मूलाविद्या भाष्यविरुद्धा इत्येव वक्तव्यं भवति ॥

एतादृशात्मानात्मनोरितरेतराध्यास एव सर्वव्यवहारमूलमिति सिद्धम् । अयमध्यासः अनुभवात्मकः । अतः बाधकज्ञानमपि अनुभवात्मकमेव स्यात् । आत्मैकत्वज्ञानात्पूर्वं सर्वोऽपि प्रमाणप्रमेयव्यवहारस्संततो वर्तते एव । एतादृशाध्यासबाधनार्थमेव साधनानि श्रुतिस्मृतिषु विहितानि दृश्यन्ते । आत्मैकत्वज्ञानेनायमध्यासो बाधितो भवति । बाधसमकालमेव ज्ञानमुत्पद्यते ज्ञानसमकालमेव मोक्षो भवति । तथा सति ब्रह्मकारणत्वमपि समञ्जसं भवति । अत एव निमित्तकारणं च । अध्यासेन तस्मिन् कारणत्वं जगति कार्यत्वं च कल्पितम् । कल्पितं सर्वमपि अधिष्ठानव्यतिरेकेणाभावात् जगत् परमार्थतः अधिष्ठानव्यतिरेकेण नास्त्येव । ब्रह्मैवैकं परमार्थसत्यमिति सिद्धं भवति ॥

कारणं विना कार्यं न भवति । तस्मात्कार्यभूतस्य जगतः उपादानकारणं वक्तव्यमेवेति आग्रहवतां अविद्यावतां समाधानार्थं तत्त्वान्यत्वाभ्यामनिर्वचनीया ईश्वरशक्तिरूपा अविद्या कल्पिता भाष्यकारैः । एतन्मूलकमेव ब्रह्म कारणादि-सर्वव्यवहारास्पदत्वं प्रतिपद्यते । तस्माद्ब्रह्मणः अनित्यत्वविकारित्वादिदोषाः न प्रसज्यन्ते । इयमेव अविद्याकल्पिता माया उपादानकारणमित्युच्यते । अस्याः अविद्याकल्पितत्वात् ज्ञानबाध्यत्वं सर्वथा संगच्छते ॥

मूलाविद्यावादिभिस्तु इयमविद्या ब्रह्माधीनत्वात् ज्ञानबाध्या भवतीति अस्याः कल्पनाकाले एव ज्ञानविरोधित्वेनैव कल्प्यते । ज्ञानविरोधित्वाद्वस्तु-भूतापि मूलाविद्या ज्ञानबाध्या भवति इति प्रतिपाद्यते । ज्ञानोत्तरमपि इयं यावद्देहपातं लेशरूपेण वर्तते । अतः विदेहताकालीन एव मोक्षो मुख्यः, जीवन्मुक्तेः गौणत्वमेव इति प्रतिपाद्यते ॥

पण्डितप्रकाण्डान् श्रीकृष्णजोयिसराख्यान् विदुषः इतःपरं संमत-वादिनः इति व्यवहरामि ॥

## मूलाविद्यावादिनां प्रक्रिया

'येयं श्रुतिस्मृतीतिहासपुराणेषु नामरूपम्, अव्याकृतम, माया, अविद्या, प्रकृतिः, अव्यक्तम्, अग्रहणम्, तमः, कारणम्, लयः, शक्तिः, अक्षरम् – इत्यादि च तत्र तत्र बहुधा गीयते । चैतन्यस्य स्वत एवावस्थित लक्षणब्रह्मस्वरूपतावभासं प्रतिबद्ध्य जीवत्वापादिका, विद्याकर्मपूर्वप्रज्ञासंस्कार-चित्रभित्तिः सुषुप्ते प्रकाशाच्छादनविक्षेपसंस्कारमात्ररूपस्थितिः अनादिरविद्या' (पं. पु. २०) ॥

कार्यदर्शनोन्नेयं आवरणकृत्यं विपर्ययं च आत्मनि कुर्वत् अज्ञानं भावरूपम् उभयकारणान्यथानुपपत्त्या च कल्प्यते (विवरण. पु. १५) ॥

**स्वाशयः** – श्रुतिस्मृतीतिहासपुराणेषु नामरूपम् अव्याकृतम्, अविद्या, माया, प्रकृतिः अग्रहणम् ........ इत्यादिपदानि पर्यायवाचकानि,

समानार्थकानि च इति कुत्र उक्तमिति न प्रदर्शितम् । इदानीं भाष्य-वार्तिककाराणां वाक्यानि प्रदर्शितानि खलु । भाष्ये वार्तिकेषु च अविद्या तत्त्वाग्रहण-अन्यथाग्रहण-संशयग्रहणरूपा मिथ्याबुद्धिवृत्तिरेवेत्युक्तम् ॥

माया तु मिथ्याग्रहणकल्पिता नामरूपबीजभूता जडशक्तिरित्युक्तम् । तस्मात्तयोर्भेद एवोक्तः । कथं तयोस्सामानाधिकरण्येन प्रयोगो भवेत् । किञ्च चैतन्यस्य स्वत एवावस्थितलक्षणब्रह्मस्वरूपतावभासं प्रतिबद्ध्य जीवत्वापादिका इति मूलाविद्यायाः प्रतापो वर्णितः । स कथं संगच्छते इति प्रष्टव्यास्ते । ब्रह्म तु चित्स्वरूपम् अवभासस्वरूपं च, न तु द्रव्यं तत् । तस्य जडस्वरूपया द्रव्यरूपया आवरणं कथम् ? प्रज्वलितस्याग्नेरिन्धनम् आवरणम् इत्युक्तिसमं खलु । यथा इन्धनं प्रज्वलितेन अग्निना दह्यते, तथा प्रकाशस्वरूपेण ब्रह्मणा अविद्या नाश्यत एव । 'राहुग्रस्तदिवाकरेन्दुसदृशो मायासमाच्छादनात्' इति दक्षिणामूर्तिस्तोत्रे मायासमाच्छादितत्वं ब्रह्मणः उक्तं खलु – इति चेत् शृणु ; तत्रापि यदि दिवाकरः मायासमाच्छादित एव स्यात् कथम् अन्यस्मिन् स्थले शुद्धदिवाकरस्य दर्शनम् ? दृश्यते डेल्लीनगरे राहुणा समाच्छादनम् । कल्याणनगरे तु तस्मिन्नेव समये तत् न दृश्यते, किं तु शुद्धस्यैव दिवाकरस्य दर्शनं भवति । किं द्वौ दिवाकरौ विद्येते ? नैव विद्येते ॥

तर्हि समाच्छादनत्वं कथं संपद्यते ? इति चेत्, तद्यथा – दिवाकरस्य कदापि न आच्छादनम्, अस्मद्दृष्टेरेव छाया प्रतिबन्धिका । तथा अस्माकमेव मायाच्छादनं न ब्रह्मणः इति प्रतिपत्तव्यम् । 'त्रिभिर्गुणमयैर्भावैरेभिस्सर्वमिदं जगत् । मोहितम्' इति गुणमयैः भावैर्लोको मोहितः इति भगवतैव उक्तम् । ब्रह्मस्वरूपावभासं प्रतिबद्ध्य इति ब्रह्मस्वरूपावभासप्रतिबन्धकत्वं मूलाविद्याया यदुक्तं तदसंभवम् ॥

ब्रह्मण। मायासमाच्छादनवादः श्री रामानुजाचार्यैः शतदूषणीकारैश्च खण्डितः। इति श्रीभाष्यशतदूषणीपाठकानां ज्ञात एवेति मन्ये ।

किं च, यदि मूलाविद्या जगदुपादानकारणत्वेनाङ्गीकृता तर्हि तदनन्यत्वन्यायेन उपादानकारणस्यैव सत्यत्वोक्तेः मूलाविद्या ज्ञानेन अबाध्यमाना अवतिष्ठेत तथा चाद्वैतहानिः । तस्मान्मूलाविद्यावादः केनचित् विदुषा भाष्ये प्रवेशितः सर्वथा हातव्यः श्रेयोऽर्थिभिरिति ज्ञेयम् ॥

किं च, मूलाविद्यायाः ब्रह्माधीनत्वात् ज्ञानबाध्यत्वं वदन्ति । ज्ञानं तु 'इयं मूलाविद्या ब्रह्माधीना वर्तते' इति ज्ञापयति । अधीनभूतं वस्तु ज्ञानं न बाधते इत्येतत् सुस्पष्टं सर्वैर्ज्ञातम् । किं च, मूलाविद्या अनादिभूता यदि स्यात् 'आत्मा वा इदमेकमेवाग्र आसीत् । सदेव सोम्येदमग्र आसीत्' इत्यादि सृष्टेः पूर्वं आत्मैकत्वप्रतिपादनपराणां श्रुतिवाक्यानां विरोध एव स्यात् । कदापि द्वितीयं वस्तु नास्तीत्येव खलु श्रुतिर्वदति । तस्मान्मूलाविद्याङ्गीकारे द्वैतमेव संपद्यते, नाद्वैतं श्रुतिप्रतिपादितं सिध्यति । किं च, (विवरण पु. १७) अन्यत्रापि अग्रहणमिथ्याज्ञानतत्संस्कारेभ्योऽन्यत् सकलसंसारबीजभूतं अवस्थात्रयेऽप्यनपायि आसंसारविमोक्षात् दण्डायमानं अज्ञानं नाम । **अनादिमिथ्याज्ञानसंबन्धोऽपि आत्मनि अज्ञानवत्** काल्पनिकत्वात् आकाशकार्ष्ण्यवत् आत्मनः कूटस्थतां न विहन्ति ( विवरण १७ ) इति ॥

**पञ्चपादिकाकाराः** – नामरूपबीजभूता आत्माधीना अव्यक्तादिशब्दवाच्या अग्रहणादीनामुपादानकारणीभूता मूलाविद्या इति । प्रपञ्चबीजभूतस्य अनिर्वचनीयवस्तुनः अविद्याशब्दवाच्यत्वं वदन्ति । माया, प्रकृतिः इत्यादिशब्दवाच्या अविद्या न केवलम् अग्रहणादीनामुपादानकारणीभूता, किन्तु सर्वस्य प्रपञ्चस्य उपादानकरणीभूता ईश्वराधीना, अनिर्वचनीया ज्ञानबाध्या अनादिरिति वर्णयन्ति । ब्रह्मकारणत्वं एतन्मूलकत्वमिति ज्ञेयम् – इति च वदन्ति ॥

**स्वाशयः** – अविद्या अग्रहणम् – इमे पदे अव्यक्तं माया इत्यादिपदैस्साकं पर्यायपदत्वेन कुत्रापि भाष्ये न प्रयुक्ते । ज्ञानं तु ज्ञापकं

न कारकम् इति न्यायेन यद्यकल्पिता मूलाविद्या जगतः उपादानकारणं स्यात् तर्हि तदनन्यत्वाधिकरणन्यायेन मूलाविद्यानन्यत्वं कार्यस्य स्यात् । कारणीभूता मूलाविद्या परमार्थभूतैव स्यात् ; न ज्ञानबाध्या स्यात् । मूलाविद्या अस्ति, नास्ति इति वक्तुं पूर्वमेव अध्यासोऽपेक्षितः अध्यासं विना न कोऽपि व्यवहारो दृश्यते । तस्मादध्यासकल्पितैव सा, माया प्रकृतिः इत्यादिशब्दवाच्या अविद्या न भवति । अविद्याकल्पिता माया जडशक्तिः ज्ञेयभूता, अविद्या तु मिथ्याज्ञानरूपा, तयोरैक्यं नैव संभवति ॥

श्रीमद्रामानुजाचार्याः – जगतः अचेतनस्य कारणम्, अचेतनभूता सूक्ष्मा अचित् । सा च परमेश्वराधीना परमेश्वराङ्गभूता इत्युक्त्वा तस्याः ज्ञान-बाध्यत्वं न जगुः । अत्र कथं ईश्वराधीनत्वमात्रेण ज्ञानबाध्यत्वं अनिर्वचनीय-वस्तुनः स्यात् ? तस्मान्मूलाविद्याङ्गीकारे तस्याः ज्ञानबाध्यत्वं नैव संभवति । अत एव विचारपराः विवरणाचार्याः मूलाविद्यायाः कल्पितत्वं मूलकारैः पञ्चपादिकाकारैरनुक्तमपि अङ्गीचक्रुः । कल्पितत्वाङ्गीकारात् मूलाविद्यावादो गतप्राय एव । अग्रहणादीनामुपादानकारणीभूता इति विशेषणत्यागमात्रेण अध्यासवाद एव भवतीति सुधीभिर्ज्ञेयम् ॥

किं च, नामरूपबीजभूतायाः अनिर्वचनीयवस्तुभूतायाः मूलाविद्यायाः, अग्रहण-अन्यथाग्रहण-संशयग्रहणरूपायाः बुद्धिवृत्तिरूपायाः अविद्यायाश्च एकत्वं नैव संभवतीत्येतत्सुविदितमेव । मूलाविद्यावादं सामान्येन तिरस्कृत्य इदानीं संमतवादिनां वाक्यानि विमर्शयामि ॥

(१) संमतवादिनः – भाष्ये अविद्याशब्दप्रयोगः मायाविद्ययोरैक्येन भेदेन च प्रयोगो नैकधा नैकविधेषु चार्थेषु दृश्यते । अयं च प्रयोगः क्वचिन्मुख्यया वृत्त्या कुत्रचिच्च गौण्या वृत्त्या ग्राह्यो भवति जिज्ञासूनां विवेचनं विना गृह्यमाणो व्यामोहायैव स्यात् उत्तानदृशाम् । यथा सूत्रभाष्ये अध्यासे । सूत्रभाष्ये– ‘ तमेतमेवंलक्षणमध्यासं पण्डिता अविद्येति मन्यन्ते ’ । अत्र अविद्याशब्दः मुख्यया वृत्त्या अध्यासार्थक एव ॥

**स्वाशयः –** 'तमेतमेवंलक्षणमध्यासं पण्डिता अविद्येति मन्यन्ते' इत्यत्र आत्मानात्मनोरितरेतराध्यास एव अविद्या इति भाष्यकारैः अध्यासस्य अविद्यात्वं प्रतिपादितम् । भाष्यवार्तिककारैरविद्याशब्दः अग्रहणान्यथाग्रहणसंशयग्रहणार्थकत्वेनैवोपयुक्तः; तत्रापि भाष्यकारैरन्यथाग्रहणस्यानर्थकरत्वात्प्राधान्येनान्यथाग्रहणार्थकत्वेनाविद्याशब्दः प्रयुक्तः । अग्रहणं विना अन्यथाग्रहणस्यासंभवात्प्राधान्येनाग्रहणार्थकत्वेन वार्तिककारैः प्रयुक्तः नान्यार्थेषु मुख्यया वृत्त्या अविद्याशब्द उभाभ्यामपि कुत्रापि न प्रयुक्तः । गौणवृत्त्या कर्मणि च अविद्याशब्दः प्रयुक्तः । न अनेकार्थेषु अनेकस्थलेषु नैकधा न प्रयुक्तः । संमतवादिभिरप्युक्तम् । अविद्याशब्दः मुख्यवृत्त्या अनेकार्थेषु न प्रयुक्तः । अध्यासार्थे एव प्रयुक्तः गौण्या वृत्त्या कर्मणि संसारे च प्रयुक्तः इति ॥

(२) **संमतवादिनः –** अविद्याशब्दप्रयोगः नैकधा नैकविधेषु अर्थेषु दृश्यते । 'अविद्यात्मिका हि बीजशक्तिः अव्यक्तशब्दनिर्देश्या' (सू. भा. १-४-३) इति ॥

**स्वाशयः –** अत्र अविद्याशब्दार्थविचारो नास्ति । अविद्यात्मकबीजशक्तेरर्थविचारः प्रवृत्तः । अविद्या आत्मा यस्याः बीजशक्तेः सा शक्तिः अविद्यात्मिका । तदनन्यत्वाधिकरणन्यायेन बीजशक्तिर्नास्ति, अविद्यैव सा, अविद्याकल्पितेत्यर्थः । अत्र अविद्याकल्पितबीजशक्तेरव्यक्तशब्दवाच्यत्वमुक्तम् । अविद्याशब्दार्थविचारो नास्ति । अव्यक्तशब्दनिर्दिष्टाया बीजशक्तेरविद्याकल्पितत्वोक्तेर्नाद्वैतहानिः, नो चेद् ज्ञानबाध्यत्वासंभवात् अद्वैतहानिरेव स्यात् । अविद्यात्मकशब्दस्य अविद्याकल्पितत्वार्थानङ्गीकारे 'अविद्या' 'अविद्या' इति द्विरुक्तिर्व्यर्था स्यात् । अविद्यात्मिका अविद्येति अनर्थका च स्यात् । अव्याकृतमासीदित्यत्र अव्याकृतात्मा आसीत् इत्येव अर्थः अव्याकृतोपाधिकः आत्मा इत्यर्थः । 'उपाधीनां अविद्याप्रत्युपस्थापितत्वात्' (सू. भा. ३-२-११) इत्युक्तत्वात् अविद्याऽव्याकृतयोर्भेद एव वर्णितः । अव्याकृतनामरूपात्मा

व्याकृतनामरूपात्मकोऽभवत् (सू. भा. १-४-१५)। साध्यक्षं अव्याकृतं नामरूपाभ्यां व्याक्रियत इति सूत्रभाष्येऽपि उक्तम्। बृ. (१-४-७) भाष्ये 'व्याक्रियतेति कर्मकर्तृप्रयोगात् स्वयमेव आत्मैव व्याक्रियत व्यक्तीभावमापद्यत' इति। स्वतो नित्यशुद्धबुद्धमुक्तस्वभावः स एषः अव्याकृते आत्मभूते नामरूपे व्याकुर्वन् प्रविष्टः इत्यर्थो वर्णितः ॥

(३) **संमतवादिनः** — अविद्याशब्दप्रयोगः नैकधा नैकविधेषु अर्थेषु दृश्यते। 'अविद्या ह्यव्यक्तम्' इति अविद्याशब्दः अव्यक्ताव्याकृतमायाकाशाक्षरादिपदैरुच्यमानायां परमेश्वराश्रितायां जडशक्तौ च प्रयुक्तः आनुमानिकाधिकरणे — (सू. भा. १-४-३) इति ॥

**स्वाभिप्रायः** — अत्रापि अविद्याशब्दप्रयोगः अविद्याशब्दार्थविचारार्थं न प्रयुक्तः। किं तु अव्याकृतशब्दार्थप्रदर्शनार्थं प्रयुक्तः। अत्राव्यक्तशब्देन प्रसिद्धः अध्यास एव उक्तः इति प्रदर्शयितुम् अविद्या ह्यव्यक्तम् इत्युक्तम्। जीवस्य उपाधिः अध्यासरूपाविद्यैव, न तु माया। माया तु ईश्वरस्य उपाधिरिति सर्वैर्विदितमेव। तथा च महच्छब्देन जीवपरिग्रहे तत्रोक्ताव्यक्तशब्देन अध्यासरूपाविद्यैव ग्राह्या इति प्रदर्शनार्थं अविद्या ह्यव्यक्तमित्युक्तम्। अव्यक्तशब्देन नामरूपबीजार्थपरिग्रहे जीवस्य तदुपाधिर्भवतीत्यनुभवानुसारेण अत्र अव्यक्तशब्दः अध्यासरूपाविद्यार्थकः इति प्रदर्शयितुम् अविद्या ह्यव्यक्तमित्युक्तम् ॥

काठके महतः परमव्यक्तम् इत्युक्तम्। तत्रत्य महच्छब्दस्य अर्थप्रतिपादने भाष्यकारैर्द्वौ पक्षौ आदृतौ। प्रथमपक्षे महच्छब्दस्य हिरण्यगर्भस्य तदात्मिका बुद्धिरित्यर्थः। तस्याः परत्वं अव्यक्तस्योक्तम्। अव्यक्तम्, माया, जडशक्तिः एकैव। तस्या बुद्धेरध्यासात्मकाविद्याकल्पितत्वप्रदर्शनार्थम् अविद्यात्मिकेत्युक्तम्। तत्र महच्छब्दस्यार्थविचारः कृतः न अविद्याशब्दार्थविचारः। तस्या जडशक्तेः ज्ञानबाध्यत्वयोग्यतासिध्यर्थं अविद्यात्मिकेत्युक्तम्। अविद्यात्मिकेत्यस्य अविद्याकल्पितेत्यर्थः ॥

द्वितीयपक्षे महच्छब्दस्य अर्थः जीव एवेत्युक्तः । अव्यक्ताधीनत्वाज्जीवभावस्य जीवात्परत्वमव्यक्तस्य उक्तम् । अत्रत्य अव्यक्तपदवाच्या जीवत्वोपाधिभूताध्यासात्मिकाविद्यैव इति प्रतिपादयितुम् 'अविद्या ह्यव्यक्तम्' इत्युक्तम् । अध्यासरूपाविद्यैव खलु जीवस्योपाधिः, न तु मायादिशब्दवाच्या जडशक्तिः इति अनुभवानुसारेण अव्यक्तशब्दस्य अध्यासरूपाविद्यार्थकत्वं प्रदर्शयितुम् 'अविद्या ह्यव्यक्तम्' इत्युक्तम् । अत्रापि पूर्ववत् अविद्याशब्दप्रयोगः अविद्याशब्दार्थविचारार्थं न प्रयुक्तः अविद्याशब्दार्थं अध्यासं सिद्धवत्कृत्य अव्यक्तशब्दस्य अध्यासात्मकाविद्यार्थकत्वप्रदर्शनार्थं अविद्याशब्दः प्रयुक्तः इति मन्तव्यम् ; नो चेत् प्रथमपक्षेऽपि अव्यक्तमुक्तम्, द्वितीयपक्षेऽपि अव्यक्तमेवोक्तमिति पक्षद्वयस्वीकारस्य निष्प्रयोजकत्वमेव बलादापतति । किञ्च अविद्या ह्यव्यक्तमिति द्विरुक्तिर्निरर्थिका च भवति । जीवस्य उपाधिरव्यक्तं न भवतीत्येतदपि स्मर्तव्यम् । अतः अत्रापि अविद्याशब्दार्थविचारो नास्त्येव । किञ्च, मूलाविद्यावादिभिः महच्छब्दस्य अर्थद्वयस्वीकरणे प्रयोजनमनुक्तं भवति । अतः अत्र अव्यक्तशब्दः अध्यासरूपाविद्यैव इति प्रदर्शयितुमविद्या ह्यव्यक्तमित्युक्तम् । 'अनादिमायया सुप्तः' (मां. १-१६) इत्यत्र मायाशब्दः अध्यासात्मकाविद्यार्थत्वेनैव प्रयुक्तः । 'आत्ममायाविसर्जिताः' (मां. ३-१०) इत्यत्रापि मायाशब्दः अध्यासात्मकाविद्यार्थत्वेनैव प्रयुक्तः । तद्वदिहापि अव्यक्तशब्दः अध्यासात्मकाविद्यामेव भणति इति ज्ञेयम् ॥

(४) **संमतवादिनः** – अविद्याशब्दप्रयोगः नैकधा नैकविधेषु अर्थेषु दृश्यते । एवं सूत्रभाष्ये 'अक्षरं अव्याकृतं नामरूपबीजशक्तिरूपं भूतसूक्ष्मं परमेश्वराश्रयं तस्यैव उपाधिभूतम्' (१-२-२२) इत्यत्रापि इति ॥

**स्वाशयः** – अत्र अविद्याशब्दप्रयोग एव नास्ति । अव्याकृतस्य अध्यासात्मकाविद्याकल्पितत्वं (२-१-१४) उक्तं स्मर्तव्यम् ॥

(५) **संमतवादिनः** – अविद्याशब्दप्रयोगः मायाविद्ययोरैक्येन भेदेन च प्रयोगो नैकधा नैकविधेषु चार्थेषु दृश्यते । 'अविद्याकल्पितेन च नामरूपलक्षणेन रूपभेदेन व्याकृताव्याकृतात्मकेन तत्त्वान्यत्वाभ्यामनिर्वचनीयेन' (सू. भा २–१–२७) इति नामरूपयोरविद्यया अभेदः प्रदर्शितः इति ॥

**स्वाशयः** – अत्र न केवलं व्याकृतनामरूपभेदः अविद्याकल्पितः किन्तु अव्याकृतनामरूपभेदोऽपि अविद्यया कल्पितः इति स्पष्टम् उक्तम् । नामरूपयोरविद्यया अभेदः प्रदर्शितः इत्युक्तिः असंभाव्या । कल्पिका अविद्या, कल्पितस्तु नामरूपभेदः–इति अविद्यानामरूपयोर्भेद एव प्रतिपादितः नाभेदः इति ॥

किञ्च, अत्रापि अविद्याशब्दप्रयोगः अविद्याशब्दार्थविचाराय न प्रयुक्तः । किन्तु अविद्याशब्दार्थं अध्यासं सिद्धवत्कृत्य नामरूपभेदस्य अध्यासरूपाविद्याकल्पितत्वप्रदर्शनाय प्रयुक्तः । अत्र 'अविद्याकल्पितनामरूपलक्षणेन रूपभेदेन ब्रह्म परिणामादि सर्वव्यवहारास्पदत्वं प्रतिपद्यते' इत्युक्तम् । नात्र अविद्याशब्दार्थविचारो विद्यते । किं तु नामरूपभेदस्य अविद्याकल्पितत्वमुक्तं दृश्यते ॥

(६) **संमतवादिनः** – (सूत्रभाष्ये २–१–१४). अन्यत्र च 'अविद्यात्मकोपाधिपरिच्छेदापेक्षमेव ईश्वरस्येश्वरत्वम्' इति ईश्वरोपाधौ भेदेन अविद्यापदप्रयोगः ॥

**स्वाशयः** – एतद्वाक्यात्पूर्ववाक्यम् एवं वर्तते । 'अविद्याकृतनामरूपोपाध्यनुरोधीश्वरो भवति व्योमेव घटकरकाद्युपाध्यनुरोधि' इति । एतद्वाक्यानुसारेण अविद्यात्मकोपाधिपरिच्छेदापेक्षमेवेश्वरस्येश्वरत्वम् इत्यत्रापि अविद्याकृतनामरूपोपाधिपरिच्छेदापेक्षमेव इत्यर्थः सुस्पष्टतरः । एतेन नामरूपोपाधेरविद्यायाः नामरूपोपाधेश्च भिन्नत्वं सुस्पष्टमुक्तम् । तस्मादीश्वरोपाधौ भेदेनैव अविद्यापदप्रयोगः कृतः न अभेदेन ॥

(७) संमतवादिनः – सूत्रभाष्ये २-१-१४ (२०१). अविद्या-शब्दप्रयोगः मायाविद्ययोरैक्येन च प्रयुक्तः । 'सर्वज्ञस्येश्वरस्य आत्मभूते इव अविद्याकल्पिते नामरूपे तत्त्वान्यत्वाभ्यामनिर्वचनीये संसारप्रपञ्चबीजभूते सर्वज्ञस्येश्वरस्य माया, शक्तिः, प्रकृतिरिति च श्रुतिस्मृत्योरभिलप्येते' इति अविद्ययाऽभेदेन माया निर्दिष्टा – इति ॥

स्वाशयः – अविद्याकल्पिते नामरूपे माया इति श्रुतिस्मृत्योरभिलप्येते इति मायाख्ययोर्नामरूपयोर्मुख्यवृत्त्यैव अध्यासाख्याविद्याकल्पितत्वं अत्र सुस्पष्टमुक्तम् । एवमप्यविद्यामाययोरभेदो वर्ण्यते इति चेत्, किं वक्तव्यमिति सुधीभिरेव ज्ञेयम् । किञ्च नामरूपयोरविद्याकल्पितत्वात् कूटस्थात्मैकत्वस्य हानिर्न संभवतीति तत्रैवोक्तम् । अविद्याकल्पितस्य सत्यत्वाभावात् । अविद्यामाययोरेकत्वे मायया सद्वितीयत्वमेव स्यात् नाद्वितीयत्वम् । अतः अविद्यामाययोर्भेद एव सुस्पष्टं वर्णितः इति ज्ञेयम् । अत्रापि अविद्याशब्दार्थ-विचारो नास्ति । अविद्याकल्पितनामरूपयोर्मायात्वं अव्यक्तत्वं चोक्तम् ॥

(८) संमतवादिनः – अविद्याशब्दः अव्याकृताभेदपरः प्रयुक्तः । ईशावास्यभाष्ये (१२) 'असंभूतिः प्रकृतिः कारणम् अविद्या अव्याकृताख्या ………… अदर्शनात्मिकाम्' इति प्रकृतौ साक्षादविद्यापदं प्रयुक्तम् । अदर्शनात्मकेन तमसा अज्ञानेनावृताः आच्छादिता अविद्यादोषेणात्मनः तिरस्करणात् इति प्रकृतावेव तमःपर्यायमविद्यापदम् । 'शुद्धं निर्मलं अविद्यामलवर्जितं इति कारणशरीरप्रतिषेधः' । कारणशरीरं चात्र अविद्या ॥

स्वाशयः – तत्त्वाग्रहणरूपा अविद्या प्रतिपत्तिक्रमेण कारणत्वेनोक्तः । 'अन्यथा गृह्णतः स्वप्नः निद्रा तत्त्वमजानतः' (माण्डूक्यकारिका १-१५) इत्यत्र तत्त्वग्रहणाभाव एव बीजं अन्यथाग्रहणमेव कार्यमित्युक्तम् । प्रकृतिः कारणं अविद्या अव्याकृतम् इतीमानि पदानि तत्त्वाग्रहणमेव वदन्ति, तत्त्वाग्रहणा-त्मिकाया अविद्याया एव कारणशरीरत्वम् । अनध्यस्ताव्यक्तशब्दवाच्याया

मूलाविद्याया ग्रहणे ज्ञानबाध्यत्वासंभवात् अद्वैतहानिरेव स्यात् । द्वैतापत्तिश्च भवेत् । तमश्शब्दोऽपि अग्रहणान्यथाग्रहणार्थत्वेन भाष्यकारैरेव प्रयुक्तः 'अदर्शनात्मकेन तमसा' इति । अत्रैव तमश्शब्दः अग्रहणार्थत्वेन प्रयुक्तः । गीताभाष्येऽपि (१०-११) 'अज्ञानजं तमः' इत्यत्र अज्ञानजं तमः मिथ्याप्रत्ययलक्षणं मोहान्धकारं तमः इति मिथ्याज्ञानस्य तमश्शब्दवाच्यत्वमुक्तम् । तस्मादत्र तमःपर्यायमविद्यापदं अग्रहणात्मकमेवेति सिद्धम् । कारणशरीरमपि अग्रहणात्मकमेव नान्यत्-(मां.का. १४)। निद्रा उक्ता तत्त्वाप्रतिबोधलक्षणं तमः इति (मां. का. १३) । तत्त्वाप्रतिबोधो निद्रा । सैव च विशेषप्रतिबोधप्रसवस्य बीजम् । तथैव बीजत्वमुक्तम् । तस्मादत्र मूलाविद्यायाः प्रसक्तिरेव नास्ति ॥

(९) संमतवादिनः – अत्र अविद्यामायाशब्दौ सामानाधिकरण्येन एकार्थकौ । कठभाष्ये – 'एष सर्वेषु भूतेषु गूढोऽऽत्मा न प्रकाशते' (१-३-१२) गूढः संवृतः दर्शनश्रवणकर्मा, अविद्यामायाच्छन्नः अत एव आत्मा न प्रकाशते आत्मत्वेन कस्यचित् इति माया अविद्या च ऐक्येन व्यवहृते इति ॥

आशयः – अत्र अविद्या च माया च अविद्यामाये, ताभ्यां छन्नः अविद्यामायाच्छन्नः इति । अविद्या अध्यासः माया अध्यासकल्पितनामरूपबीजम्, ताभ्यां छन्नः इत्यर्थं । अन्यथा समानार्थकशब्दद्वयस्योच्चारणं व्यर्थमेव स्यात् । अथवा अध्यासकल्पितमायाच्छन्न इत्यर्थः । अध्यासाख्याविद्यां विना मायाव्यवहारस्यैवासंभवात् अविद्याकल्पिता माया इत्यर्थस्सङ्गतो भवति । इममेवार्थं च भगवान् प्रकाशयामास 'त्रिभिर्गुणमयैर्भावैरेभिस्सर्वमिदं जगत् । मोहितं नाभिजानाति मामेभ्यः परमव्ययम् ॥' (गी. ७-१३) त्रिगुणात्मिका माया अविद्यालक्षणा इति मायायाः अध्यासरूपाविद्याकार्यत्वमुक्तम् । तस्मादविद्या माया च भिन्नत्वेनैव उक्ते ॥

(१०) **संमतवादिनः** – 'सङ्घाताः स्वप्नवत्सर्वे आत्ममाया-विसर्जिताः;' इत्यत्र आत्मनो माया अविद्या इति (गौ.का.) भाष्ये मायाविद्ययोः सामानाधिकरण्यम् उक्तम् ॥

**स्वाशयः** – घटादिस्थानीयास्तु देहादिसङ्घाताः स्वप्नदृश्यदेहादिवत् मायाविना सृष्टदेहादिवच्च आत्ममायाविसर्जिताः। आत्मनो माया अविद्या, तया प्रत्युपस्थापिताः न परमार्थतस्सन्तीत्यभिप्रायः। देहादिसङ्घातोपाधिकः जीव एव। तस्य जीवत्वोपाधिः अध्यास एव। अतः अत्र मायाशब्दस्य अनुभवानुसारेण अविद्याख्यः अध्यास एवार्थः इति प्रदर्शयितुं माया – अविद्या इत्युक्तम्। न मायाविद्ययोरेकत्वप्रदर्शनार्थम्। एकत्वस्याननुभवात्। अविद्या नाम मिथ्याबुद्धिवृत्तिः, माया तु नामरूपकल्पनाधारं मिथ्यावस्तु। तयोरैक्यं नैव संभवति। अत्रापि मायाशब्दार्थः प्रतिपादितः, न अविद्याशब्दार्थे विचारः प्रवृत्तः। यथा 'अविद्या ह्यव्यक्तम्' इत्यत्र अव्यक्तशब्दः अध्यासाख्या-विद्यार्थकत्वेन प्रयुक्तः। यथा 'अनादिमायया ....' (मां. १–१६) इत्यत्र मायाशब्दः अग्रहणान्यथाग्रहणार्थकत्वेन प्रयुक्तः, तथा अत्र मायाशब्दः अध्यासार्थकत्वेन प्रयुक्तः इति प्रदर्शयितुं माया अविद्या इत्युक्तम् ॥

(११) **संमतवादिनः** – एवं गीताभाष्ये 'स्वभावः अविद्यालक्षणा प्रकृतिः' इत्यत्र अविद्यामाययोरैक्यम् उक्तम् ॥

**स्वाशयः** – अविद्यालक्षणा – अविद्यया लक्ष्यते इति अविद्या-लक्षणा, अविद्याकल्पितेत्यर्थः। अविद्याकल्पितत्वादेव सा न विद्यते इति प्रदर्शयितुं मायाशब्दः प्रयुक्तः। अतोऽत्र अविद्यामाययोरैक्यं नोक्तम्। अविद्यायाः मायातः भेद एवोक्तः। अत्रापि अविद्याशब्दार्थविचारो न प्रकृतः प्रकृतेरविद्याकल्पितत्वप्रदर्शनार्थम् अविद्यापदप्रयोगः कृतः ॥

(१२) **संमतवादिनः** – 'अनादिमायया सुप्तः यदा जीवः प्रबुध्यते' (मां. का. १–१६) इति मायापदस्य तत्त्वाग्रहणान्यथाग्रहणे अर्थः ॥

स्वाशयः – जीवस्य उपाधिः अग्रहणान्यथाग्रहणे एवेति अनुभवानुसारेण मायाशब्दस्य तत्त्वाग्रहणान्यथाग्रहणे एव इत्यर्थ उक्तः । अत्र मायाशब्दार्थविचारः कृतः, न अविद्याशब्दार्थविचारः कृतः । संमतवादिभिस्त्वत्र मायाशब्दः तत्त्वाग्रहणान्यथाग्रहणार्थे प्रयुक्त इति सम्यगुक्तम् ॥

(१३) संमतवादिनः – 'तामसो हि प्रत्ययः आवरणात्मकत्वादविद्या, विपरीतग्राहकः संशयोपस्थापकः अग्रहणात्मको वा ' (गी. भा. १३-२) इत्यादौ अग्रहणादित्रये अविद्यापदम् ॥

स्वाशयः – इदमपि सम्यगुक्तम् । भाष्यवार्तिककारैरुक्ता अविद्या अग्रहणादिरूपैव नान्या, अत्रैव अविद्याशब्दार्थविचारः कृतः ॥

(१४) संमतवादिनः – 'विद्यां चाविद्यां च' (ईशा. भा. ११) इति मन्त्रे अविद्यापदं कर्मणि प्रयुक्तम् । तत्तु गौणम् । मुख्यतोऽपि तदविद्यापदं कर्मणि प्रयुक्तम् इति भाति । तदुपादानत्वात् कर्मण इति ॥

स्वाशयः – एतदपि भाष्योक्तरीत्यैवोक्तम् । अत्र न विवादोऽस्ति । मुख्यतोऽपि अविद्यापदं कर्मणि प्रयुक्तमिति तु न संभवतीति ज्ञेयम् । अविद्यावत एव कर्माधिकारत्वात् कर्मणि अविद्यापदं गौणार्थकमेव ॥

(१५) संमतवादिनः – मां. का. २-१९. अविद्याशब्दार्थः [illegible] दृश्यते । तत्रैवाकरे 'मायैषा तस्य देवस्य' इति । मोहजनिकायां [illegible] मायापदम् ॥

स्वाशयः – माया वैष्णवशक्तिः अव्यक्तं इति इमानि समानार्थकानि [illegible]ानि, सर्वे मायादयः अध्यासकल्पिता इत्यत्र न सन्देहः । अत्र अविद्यापदप्रयोगो नास्ति; तदर्थविचारोऽपि नास्ति । माया शक्तिः इति [illegible] ॥

(१६) संमतवादिनः – 'इन्द्रो मायाभिः' इत्यत्र मायापदं [illegible] प्रयुक्तमिति मन्तव्यम् ॥

| पुटे | पंक्तौ | स्थाने | पठितव्यम् |
|---|---|---|---|
| ३२ अ. | १३ | विसृष्टेन | विसृष्टः |
| ३५ | चरमपंक्तौ | सूक्ष्मा चिच्छब्द... | सूक्ष्मा अचिच्छब्द.... |
| ३६ | २ | हानिकरा | हानिकरी |
| ३६ | ५ | तस्या | तस्य |
| ३८ | ३ | 'माया' | (एतत्पदं त्यक्तव्यम्) |
| ३८ | १० | कारणो | कारणं |
| ४० | ६ | अभूवन् | अभूत् |
| ४३ अ. | २ | 'संमतकाराः' | (एतत्पदं त्यक्तव्यम्) |
| ४४ | १३ | भाष्वार्तिक... | भाष्यवार्तिक |
| ४५ अ. | ६ | स्फूर्तिमत्याः | स्फूर्तिशून्यायाः |
| ५५ | ४ | अध्यासरूपाविद्यया | अध्यासरूपाविद्यायाः |
| ५८ अ. | ८ | ...ङ्गीकारेशु द्ध | ....ङ्गीकारे शुद्ध |
| ६० | १० | दोषः | दोषाः |
| ६५ | ४ | 'बाधपर्यन्तं वर्तते इत्यर्थः' | (एतद्वाक्यं त्यक्तव्यम्) |
| ६६ अ. | २ | 'प्रतीचोऽत्र' | (एतत्पदद्वयं ,, ) |
| ६७ | १३ | विद्यमानत्वात् | विद्यमानमनुभूतम् |
| ६९ अ. | ६ | प्रसङ्गात् | प्रसङ्गः |
| ७४ | ६ | बीजभावं | बीजभावस्तु |
| ७४ अ. | ७ | शक्नोति | शक्येत |
| ७४ ,, | ६ | 'कथम्' इत्यादिकमेवं विपरिणमयेत् 'कथमननुभूता दुर्विवेकविभाग-शक्तिरूपा मूलाविद्या तत्राविद्यमानत्वेनाङ्गीक्रियेत ? | |
| ७५ | १४ | सम्यग्ज्ञायते | सम्यग्ज्ञायेत |
| ७५ अ. | ८ | अनुभूयात् | अनुभूयेत । |
| ७५ अ. | ७ | श्रुतिविरुद्धः | श्रुतिविरोधः |
| ७६ | ९ | अविद्याकल्पितताया | अविद्याकल्पितता |
| ७६ | २ | अस्त्यवान्तर... | अस्त्येवावान्तर.... |
| ८१ | ९ | नास्तीत्युक्तं | नास्तीत्यत्र |
| ८३ | ११ | मात्रप्रयोगेण | प्रयोगमात्रेण |
| ८४ | ६ | गौडपादास्तु | शङ्करभगवत्पादास्तु |

॥ ॐ ॥

# मूलाविद्या–भाष्यवार्तिकविरुद्धा

## पीठिका

श्रीमत्परमहंसपरिव्राजकाचार्येभ्यो गुरुभ्यः सच्चिदानन्देन्द्रसरस्वतीस्वामिभ्यः तथा श्रीकृष्णस्वामय्यराख्येभ्यश्च नमः ॥

श्रीमद्भिः पण्डितप्रवरेत्यादिप्रशस्त्यङ्कितैः कृष्णजोयिसराख्यैर्विद्वद्भिः स्वाशयप्रकटनाय – " मूलाविद्या–भाष्यवार्तिकसंमता " – इत्याख्यं पुस्तकं मह्यं दत्तम् । मया च समग्रमवलोकितम् । ममाशयप्रकटनात्पूर्वं श्रीशांकराद्वैतस्वरूपं मूलाविद्यावादश्च संग्रहेण प्रतिपादयितव्यौ इति मत्वा आदौ श्रीशांकराद्वैतस्वरूपं यथामति विवृणोमि ॥

### शाङ्कराद्वैतस्वरूपम्

'सदेव सोम्येदमग्र आसीत् । एकमेवाद्वितीयम्' (छां. ६–२–१), 'अयमात्मा ब्रह्म सर्वानुभूः' (बृ. २–५–१९) इत्यादिश्रुत्याधारेण श्रीशंकरभगवत्पूज्यपादैः सृष्टेः पूर्वं अद्वितीयं अखण्डं सदेवासीत् । इदानीमपि सदेव अद्वितीयं वर्तते, भविष्यत्कालेऽपि । सत्, ब्रह्म, आत्मा, अक्षरम्, परा देवता इत्यादिपदानि समानार्थकानि । इदं ब्रह्म प्रत्यगात्मैव, आत्मव्यतिरिक्तं किंचन नासीत् नास्ति न भविष्यति च इति स्पष्टमेव ॥

कथं ज्ञातुः स्वात्मभूतस्य ब्रह्मणस्सतोऽप्यग्रहणम् ? अविद्यमानस्य प्रपञ्चस्यैव ग्रहणम् ? इत्याक्षेपे कृते तैरुक्तम् । आत्मा तु द्रष्टा श्रोता मन्ता विज्ञाता; न तु सः दृश्यः । तस्मान्नेन्द्रियग्राह्यः । इन्द्रियाणां मनसश्च ग्रहीता सः । तं अनात्मतिरस्कारपूर्वकं आत्मरूपेणैव स्थित्वा ज्ञातुं शक्यते ।

'आत्मा नास्तीति' प्रत्याख्यातुं केनचिदपि न शक्यते। कुतः प्रत्याख्यातुरेवात्मा सः सुप्रसिद्धः अपरोक्षस्वरूपः ; आत्मनि शास्त्रप्रामाण्यं तु अविद्याकल्पितभेदनिवृत्तिपरत्वेनैव नान्यथा – इत्यादिप्रतिपादितम् ॥

प्रमाणसिद्धस्य प्रपंचस्य नास्तीति निषेधः कथम्? इति चेत् प्रमाणानां अविद्याप्रत्युपस्थापितत्वात् अविद्यावता दृष्टः प्रपंचः परमार्थो न भवति। उदितायां च विद्यायां प्रपञ्चस्यादर्शनात् ॥

का नाम सा अविद्या? 'अथातो ब्रह्मजिज्ञासा' इति सूत्रस्थजिज्ञासापदस्य 'ज्ञातुमिच्छा जिज्ञासा' इति विवरणं कृत्वा ज्ञानस्वरूपमपि अवगतिपर्यन्तं ज्ञानं इति प्रादर्श्य, तादृशज्ञानबाध्या अविद्या कीदृशीति प्रदर्शयितुं अध्यासभाष्यं प्रसक्तम्। तत्र आत्मानात्मनोरितरेतराध्यासलक्षणा सा। 'तमेतमेवंलक्षणमध्यासं पण्डिता अविद्येति मन्यन्ते', 'एवमयमनादिरनन्तो नैसर्गिकोऽध्यासो मिथ्याप्रत्ययरूपः कर्तृत्वभोक्तृत्वप्रवर्तकः सर्वलोकप्रत्यक्षः।' इति च प्रतिपादितम्। एवं च 'देहोऽहमिति या बुद्धिस्साऽविद्या' इत्युक्तं भवति। देहादिसंघाते आत्मबुद्धिः, आत्मनि देहबुद्धिः चतुर्मुखब्रह्मादिपिपीलिकापर्यन्तं स्वानुभवेनैव सिद्धा। इयं मिथ्याबुद्धिः नैसर्गिकी, न कारणान्तरजन्या। इमां मिथ्याबुद्धिरूपामविद्यां पुरस्कृत्य सर्वे प्रमाणप्रमेय व्यवहाराः लौकिका वैदिकाश्च प्रवृत्ताः सर्वाणि च शास्त्राणि विधिप्रतिषेध मोक्षपराणि ॥

एतादृशाविद्यावानेव खलु प्रपञ्चस्य अस्तित्वं अधिगच्छति। अविद्यावता दृष्टः प्रपञ्चः परमार्थो न भवति। विद्याभावे अभावात्। सुषुप्तौ समाधौ च इयं मिथ्याबुद्धिर्नास्ति ; अत एव प्रपञ्चोऽपि तत्र न गृह्यते। जाग्रत्स्वप्नयोरियं मिथ्याबुद्धिर्वर्तते प्रपञ्चोऽपि गृह्यते। यत्सत्त्वे यत्सत्वं यदभावे यदभावः तत्तत्कार्यमिति न्यायेन प्रपञ्चदर्शनं एतादृशमिथ्याबुद्धिकार्यमेवेति सिद्धं भवति। किञ्च येषां ज्ञानिनां आत्मानात्मनोरितरेतराध्यासरूपमिथ्याबुद्धिः 'अहं ब्रह्मास्मि' इत्यनुभवरूपेण सम्यग्ज्ञानेन बाधिता ते खलु प्रपञ्चं न पश्यन्ति अद्वितीयं ब्रह्मैवात्मत्वेन सर्वत्र अनुपश्यन्ति ॥

तस्मात् प्रपञ्चदर्शनं आत्मानात्मनोरितरेतराध्यासकार्यं न परमार्थभूतमिति सिद्धम् ॥

तत्त्वग्रहणाभावः, अन्यथाग्रहणं संशयग्रहणम् इति अविद्या त्रिविधापि, भाष्यकारैः मिथ्याग्रहणरूपैव अनर्थकारिणीति कृत्वा सैव प्राधान्येन अविद्येति प्रतिपादिता । वार्तिककारैस्तु अग्रहणं विना मिथ्याग्रहणं न संभवतीति कृत्वा अग्रहणरूपाया एव अविद्यायाः मुख्यत्वमङ्गीकृतम् ॥

## एतस्यार्थस्य प्रतिपादकानि प्रमाणवचनानि

सूत्रभाष्ये १-३-२. देहेन्द्रियादिसंघाते आत्मबुद्धिः अविद्या ; सा च आत्मन्येव आत्मबुद्ध्या निवर्तते । देहादिसंघाते आत्मबुद्धिरूपा मिथ्याबुद्धिः अविद्या आत्मयाथात्म्यज्ञाननिवर्त्या इत्युक्तम् । (बृ. ३-३ पीठिकायाम्) तद्यथा –

'यदि ज्ञानाभावः यदि संशयज्ञानं यदि विपरीतज्ञानं वा अज्ञानमित्युच्यते, सर्वं हि तत् ज्ञानेनैव निवर्त्यते' इति । अत्रापि ज्ञाननिवर्त्यमज्ञानम् अग्रहण-संशयग्रहण-मिथ्याग्रहणरूपमेव नान्यदिति सर्वशब्देन प्रकाशितम् । ज्ञाननिवर्त्यमज्ञानमेतत् त्रितयरूपमेवेत्युक्तम् ॥

भगवद्गीताभाष्येऽपि १३-२, अविद्या विपरीतग्राहकः संशयोपस्थापकः अग्रहणात्मको वा, विवेकप्रकाशभावे तदभावात् इति विवेकप्रकाशरूपज्ञानबाध्या अविद्या अग्रहणादिरूपैवेत्युक्तम् ॥

भगवद्गीतायां १८-५० श्लोकभाष्ये 'नामरूपाद्यनात्माध्यारोपणनिवृत्तिरेव कार्या' इति । अत्रापि अध्यासरूपाविद्यैव ज्ञाननिवर्त्या—इत्युक्तम् । १८-६७. श्लोकभाष्ये, 'किं च देहादिसंघाते अभिमानः अविद्यात्मकः, भगविद्याविधिश्रुत्या आत्मनि अवगते देहादिसंघाते अहंप्रत्ययः बाध्यते' इति । अत्रापि अध्यासस्यैव ब्रह्मविद्याबाध्यत्वमुक्तम् ॥

अन्यच्च गीताभाष्ये १८-६७. श्लोकभाष्ये 'क्रियाकारकफल-भेदबुद्धिरविद्या' इति ॥

प्रश्नभाष्ये (६-८) 'अविद्यायाः विपरीतज्ञानात्........विद्याप्लवेन परं पारं तारयसि, मोहाख्यं तारयसि' इति ; अत्रापि विपरीतज्ञानरूपाध्यासस्यैव ज्ञानबाध्यत्वमुक्तम् ॥

केनभाष्ये – प्रेत्य अमृता भवन्ति इत्यत्र । व्यावृत्तममाहंभाव-लक्षणादविद्यारूपादुपरम्य अद्वैतं आपन्नाः भवन्तीति मिथ्याज्ञानबाधानन्तरमेव अद्वैतापत्तिरुक्ता । श्रोत्राद्यात्मभावं परित्यज्य अमृता भवन्ति इत्यत्रापि अध्यासनाशादेव ब्रह्मप्राप्तिरुक्ता ॥

**वार्तिककाराः** – अज्ञानमिथ्यासंशीतिव्यतिरेकेण नापरं प्रत्यर्थगेय-विषये मानस्येहास्ति किञ्चन । अत्रापि अग्रहण, मिथ्याग्रहण, संशय-ग्रहणान्येवाविद्या – एतत्त्रयव्यतिरिक्ता ज्ञानबाध्या अविद्या नास्ति इत्युक्तम् । अग्रहणादयः बुद्धिवृत्तयः सम्यग्ज्ञानरूपबुद्धिवृत्त्या बाध्यन्ते । उभयोरेकाधि-करणत्वात् अन्योन्यविरोधाच्च । एतेन प्रपञ्चस्य अध्यासकल्पितत्वात्, ज्ञानबाध्यत्वं संभवति । आत्मैकत्वं अद्वितीयत्वं असङ्गत्वं च निर्विवादं ज्ञानिभिरनुभूयत एव ॥

अविद्यामायाशब्दयोरर्थप्रतिपादने वैमत्यस्य विभागगतत्वात्, विवरणं आवश्यकम् । अविद्या अन्तःकरणवृत्तिरूपैव ; माया तु अध्यासरूपाविद्या-कल्पिता सैव नामरूपबीजभूता जडशक्तिरिति व्यवह्रियते इति विविच्य ग्रहणार्थं भाष्यकारैरुक्तानि वाक्यानि उदाह्रियन्ते ॥

प्रपञ्चस्य मिथ्याबुद्धिकल्पितत्वात् कल्पितस्य वस्तुनः अस्तित्वाभावात् अधिष्ठानमेव तस्य स्वरूपम् । अधिष्ठानमेव उपादानकारणं निमित्तकारणं च इति कृत्वा ब्रह्मैव जगतः उपादानकारणं निमित्तकारणं च इति 'प्रकृतिश्च प्रतिज्ञा दृष्टान्तानुपरोधात्' इति सूत्रे (१-४-२३) भाष्ये च प्रतिपादितम् ॥

कार्यभूतं जगत् अनुभूयते, तस्मादस्त्येव । तस्य कारणमपि वक्तव्यम् इति वक्तृणां अविद्यावतां समाधानार्थं मिथ्याज्ञानकल्पिता माया, नामरूप-बीजात्मिका प्रपञ्चस्य कारणम् इत्युक्तम् । यदा व्यक्ताव्यक्तात्मकः प्रपञ्चः मिथ्याज्ञानकल्पितः अतः परमार्थतो नास्तीति ज्ञायते तदा प्रपञ्चोऽपि नास्ति तत्कारणमपि नास्तीति ज्ञायत एव । एतदर्थमेव प्रपञ्चस्य कारणं अविद्या-कल्पिता 'माया' इत्युक्तम् । या, मा-नास्ति सा माया इत्यर्थः ॥

## मायास्वरूपप्रतिपादकवाक्यानि

१) सू. भा. २-१-१४ (२०१) 'सर्वज्ञस्य ईश्वरस्य आत्मभूते इव अविद्याकल्पिते नामरूपे तत्त्वान्यत्वाभ्यामनिर्वचनीये संसारप्रपञ्च-बीजभूते सर्वज्ञस्य ईश्वरस्य माया, शक्तिः, प्रकृतिरिति च श्रुतिस्मृत्यो-रभिलप्येते' । अत्र स्पष्टं मायादीनामविद्याकल्पितत्वमुक्तम् ॥

२) सू.भा. २-१-२७ (२१३) 'अविद्याकल्पितेन च नामरूप-लक्षणेन रूपभेदेन व्याकृताव्याकृतात्मकेन तत्त्वान्यत्वाभ्यामनिर्वचनीयेन ब्रह्म परिणामादि सर्वव्यवहारास्पदत्वं प्रतिपद्यते' ॥

[ अत्र व्याकृताव्याकृतनामरूपभेदस्यापि अविद्याकल्पितत्वं स्पष्टमुक्तम् ॥ ]

३) सू. भा. ३-२-२२ (३०४) तत्र कल्पितरूपप्रत्याख्यानेन ब्रह्मणः स्वरूपावेदनमिति निर्णीयते । रूपशब्दः मूर्तामूर्तपरः इत्यत्रैवोक्तम् ॥

[ अत्रापि मूर्तामूर्तात्मकरूपस्य कल्पितत्वमेव स्पष्टमुक्तम् । कल्पकस्तु अविद्या, रूपद्वयं कल्पितमिति ॥ ]

एषु स्थलेषु मायाया ज्ञानबाध्यत्वप्राप्त्यर्थं अविद्याकल्पितत्वप्रतिपादनेन अन्यत्र च अविद्यात्मिका माया, अविद्यालक्षणा माया, अविद्याप्रत्युपस्थापिता माया, अविद्याकार्या माया—इत्यादिस्थलेष्वपि मायाया अविद्याकल्पितत्वमित्येव अर्थो वक्तव्यः । मायाया एकत्वादेकत्र अविद्याकल्पिता अन्यत्र अविद्यारूपा इति वक्तुं न शक्यते ॥

४) सू. भा. १–४–३ (१४९) 'अविद्यात्मिका हि बीजशक्तिः अव्यक्तशब्दनिर्देश्या परमेश्वराश्रया मायामयी महासुप्तिः' ॥

[ अत्रापि पूर्वोक्तरीत्या अविद्याकल्पिता बीजशक्तिः इत्येव वक्तव्या नो चेद्विद्यात्मिका अविद्या इत्युक्तं भवति अद्वैतहानिश्च स्यात् ॥ ]

५) सू. भा. २–१–१४ (२०१) 'एवं अविद्याकृतनामरूपोपाध्यनुरोधी ईश्वरो भवति' ॥

[ अविद्याकृतेत्यस्य अविद्याकल्पितेत्येवार्थः ॥ ]

६) सू. भा. २–१–१४ (२०१) 'अविद्यात्मकोपाधिपरिच्छेदापेक्षमेव ईश्वरस्य ईश्वरत्वम्' ॥

[ अत्रापि अविद्याकल्पितोपाधिपरिच्छेदापेक्षं इत्येवार्थः ॥ ]

७) सू.भा. २–१–१४ (२०१) 'अविद्याप्रत्युपस्थापितनामरूपकृतकार्यकरणसंघातानुरोधिनः जीवाख्यान्' ॥

[ अत्रापि अविद्याप्रत्युपस्थापितेत्यस्य शब्दस्य अविद्याकल्पिता इत्येवार्थः ॥ ]

८) सू. भा. २–१–१४ (२००) 'अविद्यात्मकनामरूपबीजव्याकरणापेक्षत्वात्सर्वज्ञत्वस्य' ॥

[ अत्रापि नामरूपबीजस्य अविद्याकल्पितत्वमेवोक्तम् ॥ ]

९) सू. भा. ३–२–११ (३५०) 'उपाधीनां चाविद्याप्रत्युपस्थापितत्वात्' इत्यनेन सर्वोपाधीनामविद्याकल्पितत्वमुक्तम् ॥

१०) गीता ९–१० 'माया त्रिगुणात्मिका अविद्यालक्षणा प्रकृतिः' इति मायाया अविद्याकल्पितत्वमुक्तम् ॥

११) गीता १३–२३ (३११) 'प्रकृतिं च यथोक्तामविद्यालक्षणाम्' ॥

[ अत्रापि प्रकृतेरविद्याकल्पितत्वमुक्तम् ॥ ]

१२) गीता ९–८ प्रकृतिं स्वाम् = इत्यत्र भाष्ये 'अविद्यालक्षणां प्रकृतिम्' ॥

[ अत्र मूले केवलप्रकृतिशब्द एव प्रयुक्तः, भाष्यकारैस्तु अविद्यालक्षणेत्युक्तम् ।

किमर्थमिति चेत्, प्रकृतेरविद्याकल्पितत्वप्रदर्शनार्थम् । कल्पितत्वे एव ज्ञानबाध्यत्वं संभवति ॥]

१३) बृ. १–५–२ 'सर्वो ह्ययं व्यक्ताव्यक्तलक्षणः संसारः अविद्याविषयः ।' अत्रापि विषयशब्दस्य कल्पितत्वमेवार्थः ॥

१४) सू. भा. १–४–९ (१५०) 'परमेश्वरादुत्पन्ना ........ इयं अजा प्रतिपत्तव्या ।' अत्र भाष्यकारैरेव प्रकृतेर्जन्यत्वप्रतिपादनेन अनादित्वं निरस्तमेव, कल्पितत्वं प्राप्तम् ॥

१५) गीता ८–२० (१९६) 'अविद्यालक्षणादव्यक्तात्' ॥

१६. गीता ५–१४ (१३५) 'स्वाभाविका........ अविद्यालक्षणा प्रकृतिः माया इति' । अत्रापि सर्वत्र मायाया अविद्याकल्पितत्वमेवोक्तम् ॥

तस्माच्चराचरात्मकं जगत् ब्रह्मरूपेण सर्वदा वर्तते स्वेनरूपेण कदाचिदपि नास्ति । ब्रह्मैव परमार्थं सत् इति अद्वैतं सिद्धं भवति । यदि मूलाविद्या भाष्यसंमता तर्हि अत्रैव खलु एतादृशा मूलाविद्या ज्ञानबाध्या इति मूलाविद्या लक्षणप्रमाणपुरस्सरा वक्तव्या स्यात् । अत्र सा, नोक्ता प्रत्युत सर्वानुभवसिद्धः 'अध्यास एव अविद्या' इति प्रतिपादितः अतः मूलाविद्या भाष्यसंमता इति वक्तुं न शक्यते । प्रत्युत मूलाविद्या भाष्यविरुद्धा इत्येव वक्तव्यं भवति ॥

एतादृशात्मानात्मनोरितरेतराध्यास एव सर्वव्यवहारमूलमिति सिद्धम् । अयमध्यासः अनुभवात्मकः । अतः बाधकज्ञानमपि अनुभवात्मकमेव स्यात् । आत्मैकत्वज्ञानात्पूर्वं सर्वोऽपि प्रमाणप्रमेयव्यवहारस्संततो वर्तते एव । एतादृशाध्यासबाधनार्थमेव साधनानि श्रुतिस्मृतिषु विहितानि दृश्यन्ते । आत्मैकत्वज्ञानेनायमध्यासो बाधितो भवति । बाधसमकालमेव ज्ञानमुत्पद्यते तत्समकालमेव मोक्षो भवति । तथा सति ब्रह्मकारणत्वमपि समञ्जसं भवति । ब्रह्म निर्विकारि अखण्डं च । अध्यासेन तस्मिन् कारणत्वं जगति कार्यत्वं च कल्पितम् । कल्पितं सर्वमपि अधिष्ठानव्यतिरेकेणाभावात् जगत् परमार्थतः आत्मव्यतिरेकेण नास्त्येव । ब्रह्मैवैकं परमार्थसत्यमिति सिद्धं भवति ॥

कारणं विना कार्यं न भवति । तस्मात्कार्यभूतस्य जगतः उपादानकारणं वक्तव्यमेवेति आग्रहवतां अविद्यावतां समाधानार्थं तत्त्वान्यत्वाभ्यामनिर्वचनीया ईश्वरशक्तिरूपा अविद्या कल्पिता भाष्यकारैः । एतन्मूलकमेव ब्रह्म कारणादि-सर्वव्यवहारास्पदत्वं प्रतिपद्यते । तस्माद्ब्रह्मणः अनित्यत्वविकारित्वादिदोषाः न प्रसज्यन्ते । इयमेव अविद्याकल्पिता माया उपादानकारणमित्युच्यते । अस्याः अविद्याकल्पितत्वात् ज्ञानबाध्यत्वं सर्वथा संगच्छते ॥

मूलाविद्यावादिभिस्तु इयमविद्या ब्रह्माधीनत्वात् ज्ञानबाध्या भवतीति अस्याः कल्पनाकाले एव ज्ञानविरोधित्वेनैव कल्प्यते । ज्ञानविरोधित्वाद्वस्तु-भूतापि मूलाविद्या ज्ञानबाध्या भवति इति प्रतिपाद्यते । ज्ञानोत्तरमपि इयं यावद्देहपातं लेशरूपेण वर्तते । अतः विदेहताकालीन एव मोक्षो मुख्यः, जीवन्मुक्तेः गौणत्वमेव इति प्रतिपाद्यते ॥

पण्डितप्रकाण्डान् श्रीकृष्णजोयिसराख्यान् विदुषः इतःपरं संमत-वादिनः इति व्यवहरामि ॥

## मूलाविद्यावादिनां प्रक्रिया

'येयं श्रुतिस्मृतीतिहासपुराणेषु नामरूपम्, अव्याकृतम्, माया, अविद्या, प्रकृतिः, अव्यक्तम्, अग्रहणम्, तमः, कारणम्, लयः, शक्तिः, अक्षरम् – इत्यादि च तत्र तत्र बहुधा गीयते । चैतन्यस्य स्वत एवावस्थित लक्षणब्रह्मस्वरूपतावभासं प्रतिबद्ध्य जीवत्वापादिका, विद्याकर्मपूर्वप्रज्ञासंस्कार-चित्रभित्तिः सुषुप्ते प्रकाशाच्छादनविक्षेपसंस्कारमात्ररूपस्थितिः अनादिरविद्या' (पं. पु. २०) ॥

कार्यदर्शनोन्नेयं आवरणकृत्यं विपर्ययं च आत्मनि कुर्वत् अज्ञानं भावरूपम् उभयकारणान्यथानुपपत्त्या च कल्प्यते (विवरण. पु. १५) ॥

**स्वाशयः –** श्रुतिस्मृतीतिहासपुराणेषु नामरूपम् अव्याकृतम्, अविद्या, माया, प्रकृतिः अग्रहणम् ........ इत्यादिपदानि पर्यायवाचकानि,

समानार्थकानि च इति कुत्र उक्तमिति न प्रदर्शितम्। इदानीं भाष्य-वार्तिककाराणां वाक्यानि प्रदर्शितानि खलु। भाष्ये वार्तिकेषु च अविद्या तत्त्वाग्रहण-अन्यथाग्रहण-संशयग्रहणरूपा मिथ्याबुद्धिवृत्तिरेवेत्युक्तम् ॥

माया तु मिथ्याग्रहणकल्पिता नामरूपबीजभूता जडशक्तिरित्युक्तम्। तस्मात्तयोर्भेद एवोक्तः। कथं तयोस्सामानाधिकरण्येन प्रयोगो भवेत्। किञ्च चैतन्यस्य स्वत एवावस्थितलक्षणब्रह्मस्वरूपतावभासं प्रतिबद्ध्य जीवत्वापादिका इति मूलाविद्यायाः प्रतापो वर्णितः। स कथं संगच्छते इति प्रष्टव्यास्ते। ब्रह्म तु चित्स्वरूपम् अवभासस्वरूपं च, न तु द्रव्यं तत्। तस्य जडस्वरूपया द्रव्यरूपया आवरणं कथम्? प्रज्वलितस्याग्नेरिन्धनम् आवरणम् इत्युक्तिसमं खलु। यथा इन्धनं प्रज्वलितेन अग्निना दह्यते, तथा प्रकाशस्वरूपेण ब्रह्मणा अविद्या नाश्यत एव। 'राहुग्रस्तदिवाकरेन्दुसदृशो मायासमाच्छादनात्' इति दक्षिणामूर्तिस्तोत्रे मायासमाच्छादितत्वं ब्रह्मणः उक्तं खलु – इति चेत् शृणु; तत्रापि यदि दिवाकरः मायासमाच्छादित एव स्यात् कथम् अन्यस्मिन् स्थले शुद्धदिवाकरस्य दर्शनम्? दृश्यते डेल्लीनगरे राहुणा समाच्छादनम्। कल्याणनगरे तु तस्मिन्नेव समये तत् न दृश्यते, किं तु शुद्धस्यैव दिवाकरस्य दर्शनं भवति। किं द्वौ दिवाकरौ विद्येते? नैव विद्येते ॥

तर्हि समाच्छादनत्वं कथं संपद्यते? इति चेत्, तद्यथा – दिवाकरस्य कदापि न आच्छादनम्, अस्मद्दृष्टेरेव छाया प्रतिबन्धिका। तथा अस्माकमेव मायाच्छादनं न ब्रह्मणः इति प्रतिपत्तव्यम्। 'त्रिभिर्गुणमयैर्भावैरेभिस्सर्वमिदं जगत्। मोहितम्' इति गुणमयैः भावैर्लोको मोहितः इति भगवतैव उक्तम्। तस्माद्ब्रह्मस्वरूपावभासं प्रतिबद्ध्य इति ब्रह्मस्वरूपावभासप्रतिबन्धकत्वं मूलाविद्याया यदुक्तं तदसंभवम् ॥

ब्रह्मणः मायासमाच्छादनवादः श्री रामानुजाचार्यैः शतदूषणीकारैश्च भाष्यशश्छिन्नः इति श्रीभाष्यशतदूषणीपाठकानां ज्ञात एवेति मन्ये।

किं च, यदि मूलाविद्या जगदुपादानकारणत्वेनाङ्गीकृता तर्हि तदनन्यत्वन्यायेन उपादानकारणस्यैव सत्यत्वोक्तेः मूलाविद्या ज्ञानेन अबाध्यमाना अवतिष्ठेत तथा चाद्वैतहानिः । तस्मान्मूलाविद्यावादः केनचित् विदुषा भाष्ये प्रवेशितः सर्वथा हातव्यः श्रेयोऽर्थिभिरिति ज्ञेयम् ॥

किं च, मूलाविद्यायाः ब्रह्माधीनत्वात् ज्ञानबाध्यत्वं वदन्ति । ज्ञानं तु 'इयं मूलाविद्या ब्रह्माधीना वर्तते' इति ज्ञापयति । अधीनभूतं वस्तु ज्ञानं न बाधते इत्येतत् सुस्पष्टं सर्वैर्ज्ञातम् । किं च, मूलाविद्या अनादिभूता यदि स्यात् 'आत्मा वा इदमेकमेवाग्र आसीत् । सदेव सोम्येदमग्र आसीत्' इत्यादि सृष्टेः पूर्वं आत्मैकत्वप्रतिपादनपराणां श्रुतिवाक्यानां विरोध एव स्यात् । कदापि द्वितीयं वस्तु नास्तीत्येव खलु श्रुतिर्वदति । तस्मान्मूलाविद्याङ्गीकारे द्वैतमेव संपद्यते, नाद्वैतं श्रुतिप्रतिपादितं सिध्यति । किं च, (विवरण पु. १७) अन्यत्रापि अग्रहणमिथ्याज्ञानतत्संस्कारेभ्योऽन्यत् सकलसंसारबीजभूतं अवस्थात्रयेऽप्यनपायि आसंसारविमोक्षात् दण्डायमानं अज्ञानं नाम । **अनादिमिथ्याज्ञानसंबन्धोऽपि आत्मनि अज्ञानवत्** काल्पनिकत्वात् आकाशकार्ष्ण्यवत् आत्मनः कूटस्थतां न विहन्ति ( विवरण १७ ) इति ॥

**पञ्चपादिकाकाराः** – नामरूपबीजभूता आत्माधीना अव्यक्तादिशब्दवाच्या अग्रहणादीनामुपादानकारणीभूता मूलाविद्या इति । प्रपञ्चबीजभूतस्य अनिर्वचनीयवस्तुनः अविद्याशब्दवाच्यत्वं वदन्ति । माया, प्रकृतिः इत्यादिशब्दवाच्या अविद्या न केवलम् अग्रहणादीनामुपादानकारणीभूता, किन्तु सर्वस्य प्रपञ्चस्य उपादानकरणीभूता ईश्वराधीना, अनिर्वचनीया ज्ञानबाध्या अनादिरिति वर्णयन्ति । ब्रह्मकारणत्वं एतन्मूलकत्वमिति ज्ञेयम् – इति च वदन्ति ॥

**स्वाशयः** – अविद्या अग्रहणम् – इमे पदे अव्यक्तं माया इत्यादिपदैस्साकं पर्यायपदत्वेन कुत्रापि भाष्ये न प्रयुक्ते । ज्ञानं तु ज्ञापकं

न कारकम् इति न्यायेन यद्यकल्पिता मूलाविद्या जगतः उपादानकारणं स्यात् तर्हि तदनन्यत्वाधिकरणन्यायेन मूलाविद्यानन्यत्वं कार्यस्य स्यात् । कारणीभूता मूलाविद्या परमार्थभूतैव स्यात् ; न ज्ञानबाध्या स्यात् । मूलाविद्या अस्ति, नास्ति इति वक्तुं पूर्वमेव अध्यासोऽपेक्षितः अध्यासं विना न कोऽपि व्यवहारो दृश्यते । तस्मादध्यासकल्पितैव सा, माया प्रकृतिः इत्यादिशब्दवाच्या अविद्या न भवति । अविद्याकल्पिता माया जडशक्तिः ज्ञेयभूता, अविद्या तु मिथ्याज्ञानरूपा, तयोरैक्यं नैव संभवति ॥

**श्रीमद्रामानुजाचार्याः** – जगतः अचेतनस्य कारणम्, अचेतनभूता सूक्ष्मा अचित् । सा च परमेश्वराधीना परमेश्वराङ्गभूता इत्युक्त्वा तस्याः ज्ञान-बाध्यत्वं न जगुः । अत्र कथं ईश्वराधीनत्वमात्रेण ज्ञानबाध्यत्वं अनिर्वचनीय-वस्तुनः स्यात् ? तस्मान्मूलाविद्याङ्गीकारे तस्याः ज्ञानबाध्यत्वं नैव संभवति । अत एव विचारपराः विवरणाचार्याः मूलाविद्यायाः कल्पितत्वं मूलकारैः पञ्चपादिकाकारैरनुक्तमपि अङ्गीचक्रुः । कल्पितत्वाङ्गीकारात् मूलाविद्यावादो गतप्राय एव । अग्रहणादीनामुपादानकारणीभूता इति विशेषणत्यागमात्रेण अध्यासवाद एव भवतीति सुधीभिर्ज्ञेयम् ॥

किं च, नामरूपबीजभूतायाः अनिर्वचनीयवस्तुभूतायाः मूलाविद्यायाः, अग्रहण-अन्यथाग्रहण-संशयग्रहणरूपायाः बुद्धिवृत्तिरूपायाः अविद्यायाश्च एकत्वं नैव संभवतीत्येतत्सुविदितमेव । मूलाविद्यावादं सामान्येन तिरस्कृत्य इदानीं संमतवादिनां वाक्यानि विमर्शयामि ॥

(१) **संमतवादिनः** – भाष्ये अविद्याशब्दप्रयोगः मायाविद्ययोरैक्येन भेदेन च प्रयोगो नैकधा नैकविधेषु चार्थेषु दृश्यते । अयं च प्रयोगः क्वचिन्मुख्यया वृत्त्या कुत्रचिच्च गौण्या वृत्त्या ग्राह्यो भवति जिज्ञासूनां विवेचनं विना गृह्यमाणो व्यामोहायैव स्यात् उत्तानदृशाम् । यथा सूत्रभाष्ये इत्यादि । सूत्रभाष्ये– ‘ तमेतमेवंलक्षणमध्यासं पण्डिता अविद्येति मन्यन्ते ’ । अत्र अविद्याशब्दः मुख्यया वृत्त्या अध्यासार्थक एव ॥

**स्वाशयः** – 'तमेतमेवंलक्षणमध्यासं पण्डिता अविद्येति मन्यन्ते' इत्यत्र आत्मानामनोरितरेतराध्यास एव अविद्या इति भाष्यकारैः अध्यासस्य अविद्यात्वं प्रतिपादितम् । भाष्यवार्तिककारैरविद्याशब्दः अग्रहणान्यथाग्रहणसंशयग्रहणार्थकत्वेनैवोपयुक्तः ; तत्रापि भाष्यकारैरन्यथाग्रहणस्यानर्थकरत्वात्प्राधान्येनान्यथाग्रहणार्थकत्वेनाविद्याशब्दः प्रयुक्तः । अग्रहणं विना अन्यथाग्रहणस्यासंभवात्प्राधान्येनाग्रहणार्थकत्वेन वार्तिककारैः प्रयुक्तः नान्यार्थेषु मुख्यया वृत्त्या अविद्याशब्द उभाभ्यामपि कुत्रापि न प्रयुक्तः । गौणवृत्त्या कर्मणि च अविद्याशब्दः प्रयुक्तः । न अनेकार्थेषु अनेकस्थलेषु नैकधा न प्रयुक्तः । संमतवादिभिरप्युक्तम् । अविद्याशब्दः मुख्यवृत्त्या अनेकार्थेषु न प्रयुक्तः । अध्यासार्थे एव प्रयुक्तः गौण्या वृत्त्या कर्मणि संसारे च प्रयुक्तः इति ॥

**(२) संमतवादिनः** – अविद्याशब्दप्रयोगः नैकधा नैकविधेषु अर्थेषु दृश्यते । 'अविद्यात्मिका हि बीजशक्तिः अव्यक्तशब्दनिर्देश्या' (सू. भा. १-४-३) इति ॥

**स्वाशयः** – अत्र अविद्याशब्दार्थविचारो नास्ति । अविद्यात्मकबीजशक्तेरर्थविचारः प्रवृत्तः । अविद्या आत्मा यस्याः बीजशक्तेः सा शक्तिः अविद्यात्मिका । तदनन्यत्वाधिकरणन्यायेन बीजशक्तिर्नास्ति, अविद्यैव सा, अविद्याकल्पितेत्यर्थः । अत्र अविद्याकल्पितबीजशक्तेरव्यक्तशब्दवाच्यत्वमुक्तम् । अविद्याशब्दार्थविचारो नास्ति । अव्यक्तशब्दनिर्दिष्टाया बीजशक्तेरविद्याकल्पितत्वोक्तेर्नाद्वैतहानिः, नो चेद् ज्ञानबाध्यत्वासंभवात् अद्वैतहानिरेव स्यात् । अविद्यात्मकशब्दस्य अविद्याकल्पितत्वार्थानङ्गीकारे 'अविद्या' 'अविद्या' इति द्विरुक्तिर्व्यर्था स्यात् । अविद्यात्मिका अविद्येति अनर्थका च स्यात् । अव्याकृतमासीदित्यत्र अव्याकृतात्मा आसीत् इत्येव अर्थः अव्याकृतोपाधिकः आत्मा इत्यर्थः । 'उपाधीनां अविद्याप्रत्युपस्थापितत्वात्' (सू. भा. ३-२-११) इत्युक्तत्वात् अविद्याऽव्याकृतयोर्भेद एव वर्णितः । अव्याकृतनामरूपात्मा

व्याकृतनामरूपात्मकोऽभवत् (सू. भा. १-४-१५) । साध्यक्षं अव्याकृतं नामरूपाभ्यां व्याक्रियत इति सूत्रभाष्येऽपि उक्तम् । बृ. (१-४-७) भाष्ये 'व्याक्रियतेति कर्मकर्तृप्रयोगात् स्वयमेव आत्मैव व्याक्रियत व्यक्तीभावमापद्यत' इति । स्वतो नित्यशुद्धबुद्धमुक्तस्वभावः स एषः अव्याकृते आत्मभूते नामरूपे व्याकुर्वन् प्रविष्टः इत्यर्थो वर्णितः ॥

(३) **संमतवादिनः** – अविद्याशब्दप्रयोगः नैकधा नैकविधेषु अर्थेषु दृश्यते । 'अविद्या ह्यव्यक्तम्' इति अविद्याशब्दः अव्यक्ताव्याकृतमायाकाशाक्षरादिपदैरुच्यमानायां परमेश्वराश्रितायां जडशक्तौ च प्रयुक्तः आनुमानिकाधिकरणे – (सू. भा. १-४-३) इति ॥

**स्वाभिप्रायः** – अत्रापि अविद्याशब्दप्रयोगः अविद्याशब्दार्थविचारार्थं न प्रयुक्तः । किं तु अव्याकृतशब्दार्थप्रदर्शनार्थं प्रयुक्तः । अत्राव्यक्तशब्देन प्रसिद्धः अध्यास एव उक्तः इति प्रदर्शयितुम् अविद्या ह्यव्यक्तम् इत्युक्तम् । जीवस्य उपाधिः अध्यासरूपाविद्यैव, न तु माया । माया तु ईश्वरस्य उपाधिरिति सर्वैर्विदितमेव । तथा च महच्छब्देन जीवपरिग्रहे तत्रोक्ताव्यक्तशब्देन अध्यासरूपाविद्यैव ग्राह्या इति प्रदर्शनार्थं अविद्या ह्यव्यक्तमित्युक्तम् । अव्यक्तशब्देन नामरूपबीजार्थपरिग्रहे जीवस्य तन्नोपाधिर्भवतीत्यनुभवानुसारेण अत्र अव्यक्तशब्दः अध्यासरूपाविद्यार्थकः इति प्रदर्शयितुम् अविद्या ह्यव्यक्तमित्युक्तम् ॥

काठके महतः परमव्यक्तम् इत्युक्तम् । तत्रत्य महच्छब्दस्य अर्थप्रतिपादने भाष्यकारैर्द्वौ पक्षौ आदृतौ । प्रथमपक्षे महच्छब्दस्य हिरण्यगर्भस्य जडात्मिका बुद्धिरित्यर्थः । तस्याः परत्वं अव्यक्तस्योक्तम् । अव्यक्तम्, माया, जडशक्तिः एकैव । तस्या बुद्धेरध्यासात्मकाविद्याकल्पितत्वप्रदर्शनार्थम् अविद्यात्मिकेत्युक्तम् । तत्र महच्छब्दस्यार्थविचारः कृतः न अविद्याशब्दार्थविचारः । तस्या जडशक्तेः ज्ञानबाध्यत्वयोग्यतासिध्यर्थं अविद्यात्मिकेत्युक्तम् । अविद्यात्मिकेत्यस्य अविद्याकल्पितेत्यर्थः ॥

द्वितीयपक्षे महच्छब्दस्य अर्थः जीव एवेत्युक्तः। अव्यक्ताधीनत्वा-ज्जीवभावस्य जीवात्परत्वमव्यक्तस्य उक्तम्। अत्रत्य अव्यक्तपदवाच्या जीवत्वोपाधिभूताध्यासात्मिकाविद्यैव इति प्रतिपादयितुम् 'अविद्या ह्यव्यक्तम्' इत्युक्तम्। अध्यासरूपाविद्यैव खलु जीवस्योपाधिः, न तु मायादिशब्दवाच्या जडशक्तिः इति अनुभवानुसारेण अव्यक्तशब्दस्य अध्यासरूपाविद्यार्थकत्वं प्रदर्शयितुम् 'अविद्या ह्यव्यक्तम्' इत्युक्तम्। अत्रापि पूर्ववत् अविद्याशब्दप्रयोगः अविद्याशब्दार्थविचारार्थं न प्रयुक्तः अविद्याशब्दार्थं अध्यासं सिद्धवत्कृत्य अव्यक्तशब्दस्य अध्यासात्मकाविद्यार्थकत्वप्रदर्शनार्थं अविद्याशब्दः प्रयुक्तः इति मन्तव्यम्; नो चेत् प्रथमपक्षेऽपि अव्यक्तमुक्तम्, द्वितीयपक्षेऽपि अव्यक्तमेवोक्तमिति पक्षद्वयस्वीकारस्य निष्प्रयोजकत्वमेव बलादापतति। किञ्च अविद्या ह्यव्यक्तमिति द्विरुक्तिर्निरर्थिका च भवति। जीवस्य उपाधिरव्यक्तं न भवतीत्येतदपि स्मर्तव्यम्। अतः अत्रापि अविद्याशब्दार्थविचारो नास्त्येव। किञ्च, मूलाविद्यावादिभिः महच्छब्दस्य अर्थद्वयस्वीकरणे प्रयोजनमनुक्तं भवति। अतः अत्र अव्यक्तशब्दः अध्यासरूपाविद्यैव इति प्रदर्शयितुमविद्या ह्यव्यक्तमित्युक्तम्। 'अनादिमायया सुप्तः' (मां. १-१६) इत्यत्र मायाशब्दः अध्यासात्मकाविद्यार्थत्वेनैव प्रयुक्तः। 'आत्ममाया-विसर्जिताः' (मां. ३-१०) इत्यत्रापि मायाशब्दः अध्यासात्मकाविद्यार्थ-त्वेनैव प्रयुक्तः। तद्वदिहापि अव्यक्तशब्दः अध्यासात्मकाविद्यामेव भणति इति ज्ञेयम्॥

(४) **संमतवादिनः** – अविद्याशब्दप्रयोगः नैकधा नैकविधेषु अर्थेषु दृश्यते। एवं सूत्रभाष्ये 'अक्षरं अव्याकृतं नामरूपबीजशक्तिरूपं भूतसूक्ष्मं परमेश्वराश्रयं तस्यैव उपाधिभूतम्' (१-२-२२) इत्यत्रापि इति॥

**स्वाशयः** – अत्र अविद्याशब्दप्रयोग एव नास्ति। अव्याकृतस्य अध्यासात्मकाविद्याकल्पितत्वं (२-१-१४) उक्तं स्मर्तव्यम्॥

(५) **संमतवादिनः** – अविद्याशब्दप्रयोगः मायाविद्ययोरैक्येन भेदेन च प्रयोगो नैकधा नैकविधेषु चार्थेषु दृश्यते । 'अविद्याकल्पितेन च नामरूपलक्षणेन रूपभेदेन व्याकृताव्याकृतात्मकेन तत्त्वान्यत्वाभ्यामनिर्वचनीयेन' (सू. भा २-१-२७) इति नामरूपयोरविद्यया अभेदः प्रदर्शितः इति ॥

**स्वाशयः** – अत्र न केवलं व्याकृतनामरूपभेदः अविद्याकल्पितः किन्तु अव्याकृतनामरूपभेदोऽपि अविद्यया कल्पितः इति स्पष्टम् उक्तम् । नामरूपयोरविद्यया अभेदः प्रदर्शितः इत्युक्तिः असंभाव्या । कल्पिका अविद्या, कल्पितस्तु नामरूपभेदः–इति अविद्यानामरूपयोर्भेद एव प्रतिपादितः नाभेदः इति ॥

किञ्च, अत्रापि अविद्याशब्दप्रयोगः अविद्याशब्दार्थविचाराय न प्रयुक्तः । किन्तु अविद्याशब्दार्थं अध्यासं सिद्धवत्कृत्य नामरूपभेदस्य अध्यासरूपाविद्याकल्पितत्वप्रदर्शनाय प्रयुक्तः । अत्र 'अविद्याकल्पितनामरूपलक्षणेन रूपभेदेन ब्रह्म परिणामादि सर्वव्यवहारास्पदत्वं प्रतिपद्यते' इत्युक्तम् । नात्र अविद्याशब्दार्थविचारो विद्यते । किं तु नामरूपभेदस्य अविद्याकल्पितत्वमुक्तं दृश्यते ॥

(६) **संमतवादिनः** – (सूत्रभाष्ये २-१-१४). अन्यत्र च 'अविद्यात्मकोपाधिपरिच्छेदापेक्षमेव ईश्वरस्येश्वरत्वम्' इति ईश्वरोपाधौ चैक्येन अविद्यापदप्रयोगः ॥

**स्वाशयः** – एतद्वाक्यात्पूर्ववाक्यम् एवं वर्तते । 'अविद्याकृतनामरूपोपाध्यनुरोधीश्वरो भवति व्योमेव घटकरकाद्युपाध्यनुरोधि' इति । एतद्वाक्यानुसारेण अविद्यात्मकोपाधिपरिच्छेदापेक्षमेवेश्वरस्येश्वरत्वम् इत्यत्रापि अविद्याकृतनामरूपोपाधिपरिच्छेदापेक्षमेव इत्यर्थः सुस्पष्टतरः । एतेन नामरूपोपाधेरविद्यायाः नामरूपोपाधेश्च भिन्नत्वं सुस्पष्टमुक्तम् । तस्मादीश्वरोपाधौ भेदेनैव अविद्यापदप्रयोगः कृतः न अभेदेन ॥

(७) **संमतवादिनः** – सूत्रभाष्ये २-१-१४ (२०१). अविद्या-शब्दप्रयोगः मायाविद्ययोरैक्येन च प्रयुक्तः । 'सर्वज्ञस्येश्वरस्य आत्मभूते इव अविद्याकल्पिते नामरूपे तत्त्वान्यत्वाभ्यामनिर्वचनीये संसारप्रपञ्चबीजभूते सर्वज्ञस्येश्वरस्य माया, शक्तिः, प्रकृतिरिति च श्रुतिस्मृत्योरभिलप्येते' इति अविद्ययाऽभेदेन माया निर्दिष्टा – इति ॥

**स्वाशयः** – अविद्याकल्पिते नामरूपे माया इति श्रुतिस्मृत्योरभिलप्येते इति मायाख्ययोर्नामरूपयोर्मुख्यवृत्त्यैव अध्यासाख्याविद्याकल्पितत्वं अत्र सुस्पष्टमुक्तम् । एवमप्यविद्यामाययोरभेदो वर्ण्यते इति चेत्, किं वक्तव्यमिति सुधीभिरेव ज्ञेयम् । किञ्च नामरूपयोरविद्याकल्पितत्वात् कूटस्थात्मैकत्वस्य हानिर्न संभवतीति तत्रैवोक्तम् । अविद्याकल्पितस्य सत्यत्वाभावात् । अविद्यामाययोरेकत्वे मायया सद्वितीयत्वमेव स्यात् नाद्वितीयत्वम् । अतः अविद्यामाययोर्भेद एव सुस्पष्टं वर्णितः इति ज्ञेयम् । अत्रापि अविद्याशब्दार्थ-विचारो नास्ति । अविद्याकल्पितनामरूपयोर्मायात्वं अव्यक्तत्वं चोक्तम् ॥

(८) **संमतवादिनः** – अविद्याशब्दः अव्याकृताभेदपरः प्रयुक्तः । ईशावास्यभाष्ये (१२) 'असंभूतिः प्रकृतिः कारणम् अविद्या अव्याकृताख्या ............ अदर्शनात्मिकाम्' इति प्रकृतौ साक्षादविद्यापदं प्रयुक्तम् । अदर्शनात्मकेन तमसा अज्ञानेनावृताः आच्छादिता अविद्यादोषेणात्मनः तिरस्करणात् इति प्रकृतावेव तमःपर्यायमविद्यापदम् । 'शुद्धं निर्मलं अविद्यामलवर्जितं इति कारणशरीरप्रतिषेधः' । कारणशरीरं चात्र अविद्या ॥

**स्वाशयः** – तत्त्वाग्रहणरूपा अविद्या प्रतिपत्तिक्रमेण कारणत्वेनोक्तः । 'अन्यथागृह्णतः स्वप्नः निद्रा तत्त्वमजानतः' (माण्डूक्यकारिका १-१५) इत्यत्र तत्त्वग्रहणाभाव एव बीजं अन्यथाग्रहणमेव कार्यमित्युक्तम् । प्रकृतिः कारणं अविद्या अव्याकृतम् इतीमानि पदानि तत्त्वाग्रहणमेव वदन्ति, तत्त्वाग्रहणा-त्मिकाया अविद्याया एव कारणशरीरत्वम् । अनध्यस्ताव्यक्तशब्दवाच्याया

मूलाविद्याया ग्रहणे ज्ञानबाध्यत्वासंभवात् अद्वैतहानिरेव स्यात् । द्वैतापत्तिश्च भवेत् । तमश्शब्दोऽपि अग्रहणान्यथाग्रहणार्थत्वेन भाष्यकारैरेव प्रयुक्तः 'अदर्शनात्मकेन तमसा' इति । अत्रैव तमश्शब्दः अग्रहणार्थत्वेन प्रयुक्तः । गीताभाष्येऽपि (१०-११) 'अज्ञानजं तमः' इत्यत्र अज्ञानजं तमः मिथ्याप्रत्ययलक्षणं मोहान्धकारं तमः इति मिथ्याज्ञानस्य तमश्शब्दवाच्यत्वमुक्तम् । तस्मादत्र तमःपर्यायमविद्यापदं अग्रहणात्मकमेवेति सिद्धम् । कारणशरीरमपि अग्रहणात्मकमेव नान्यत्-(मां.का. १४)। निद्रा उक्ता तत्त्वाप्रतिबोधलक्षणं तमः इति (मां. का. १३) । तत्त्वाप्रतिबोधो निद्रा । सैव च विशेषप्रतिबोधप्रसवस्य बीजम् । तथैव बीजत्वमुक्तम् । तस्मादत्र मूलाविद्यायाः प्रसक्तिरेव नास्ति ॥

(९) **संमतवादिनः** – अत्र अविद्यामायाशब्दौ सामानाधिकरण्येन एकार्थकौ । कठभाष्ये – 'एष सर्वेषु भूतेषु गूढोऽऽत्मा न प्रकाशते' (१-३-१२) गूढः संवृतः दर्शनश्रवणकर्मा, अविद्यामायाच्छन्नः अत एव आत्मा न प्रकाशते आत्मत्वेन कस्यचित् इति माया अविद्या च ऐक्येन व्यवहृते इति ॥

**स्वाशयः** – अत्र अविद्या च माया च अविद्यामाये, ताभ्यां च्छन्नः अविद्यामायाच्छन्नः इति । अविद्या अध्यासः माया अध्यासकल्पितनामरूपबीजम्, ताभ्यां च्छन्नः इत्यर्थः । अन्यथा समानार्थकशब्दद्वयस्योच्चारणं व्यर्थमेव स्यात् । अथवा अध्यासकल्पितमायाच्छन्न इत्यर्थः । अध्यासाख्याविद्यां विना मायाव्यवहारस्यैवासंभवात् अविद्याकल्पिता माया इत्यर्थस्सङ्गतो भवति । इममेवार्थं च भगवान् प्रकाशयामास 'त्रिभिर्गुणमयैर्भावैरेभिस्सर्वमिदं जगत् । मोहितं नाभिजानाति मामेभ्यः परमव्ययम् ॥' (गी. ७-१३) त्रिगुणात्मिका माया अविद्यालक्षणा इति मायायाः अध्यासरूपाविद्याकल्पितत्वमुक्तम् । तस्मादविद्या माया च भिन्नत्वेनैव उक्ते ॥

(१०) **संमतवादिनः** – 'सङ्घाताः स्वप्नवत्सर्वे आत्ममाया-विसर्जिताः;' इत्यत्र आत्मनो माया अविद्या इति (गौ.का.) भाष्ये मायाविद्ययोः सामानाधिकरण्यम् उक्तम् ॥

**स्वाशयः** – घटादिस्थानीयास्तु देहादिसङ्घाताः स्वप्नदृश्यदेहादिवत् मायाविना सृष्टदेहादिवच्च आत्ममायाविसर्जिताः। आत्मनो माया अविद्या, तया प्रत्युपस्थापिताः न परमार्थतस्सन्तीत्यभिप्रायः। देहादिसङ्घातोपाधिकः जीव एव। तस्य जीवत्वोपाधिः अध्यास एव। अतः अत्र मायाशब्दस्य अनुभवानुसारेण अविद्याख्यः अध्यास एवार्थः इति प्रदर्शयितुं माया – अविद्या इत्युक्तम्। न मायाविद्ययोरेकत्वप्रदर्शनार्थम्। एकत्वस्याननुभवात्। अविद्या नाम मिथ्याबुद्धिवृत्तिः, माया तु नामरूपकल्पनाधारं मिथ्यावस्तु। तयोरैक्यं नैव संभवति। अत्रापि मायाशब्दार्थः प्रतिपादितः, न अविद्याशब्दार्थे विचारः प्रवृत्तः। यथा 'अविद्या ह्यव्यक्तम्' इत्यत्र अव्यक्तशब्दः अध्यासाख्या-विद्यार्थकत्वेन प्रयुक्तः। यथा 'अनादिमायया ....' (मां. १–१६) इत्यत्र मायाशब्दः अग्रहणान्यथाग्रहणार्थकत्वेन प्रयुक्तः, तथा अत्र मायाशब्दः अध्यासार्थकत्वेन प्रयुक्तः इति प्रदर्शयितुं माया अविद्या इत्युक्तम् ॥

(११) **संमतवादिनः** – एवं गीताभाष्ये 'स्वभावः अविद्यालक्षणा प्रकृतिः' इत्यत्र अविद्यामाययोरैक्यम् उक्तम् ॥

**स्वाशयः** – अविद्यालक्षणा – अविद्यया लक्ष्यते इति अविद्या-लक्षणा, अविद्याकल्पितेत्यर्थः। अविद्याकल्पितत्वादेव सा न विद्यते इति प्रदर्शयितुं मायाशब्दः प्रयुक्तः। अतोऽत्र अविद्यामाययोरैक्यं नोक्तम्। अविद्यायाः मायातः भेद एवोक्तः। अत्रापि अविद्याशब्दार्थविचारो न प्रकृतः प्रकृतेरविद्याकल्पितत्वप्रदर्शनार्थम् अविद्यापदप्रयोगः कृतः ॥

(१२) **संमतवादिनः** – 'अनादिमायया सुप्तः यदा जीवः प्रबुध्यते' (मां. का. १–१६) इति मायापदस्य तत्त्वाग्रहणान्यथाग्रहणे अर्थः ॥

स्वाशयः – जीवस्य उपाधिः अग्रहणान्यथाग्रहणे एवेति अनुभवानुसारेण मायाशब्दस्य तत्त्वाग्रहणान्यथाग्रहणे एव इत्यर्थ उक्तः। अत्र मायाशब्दार्थविचारः कृतः, न अविद्याशब्दार्थविचारः कृतः। संमतवादिभिरप्यत्र मायाशब्दः तत्त्वाग्रहणान्यथाग्रहणार्थे प्रयुक्त इति सम्यगुक्तम् ॥

(१३) संमतवादिनः – 'तामसो हि प्रत्ययः आवरणात्मकत्वादविद्या, विपरीतग्राहकः संशयोपस्थापकः अग्रहणात्मको वा' (गी. भा. १३–२) इत्यादौ अग्रहणादित्रये अविद्यापदम् ॥

स्वाशयः – इदमपि सम्यगुक्तम्। भाष्यवर्तिककारैरुक्ता अविद्या अग्रहणादिरूपैव नान्या, अत्रैव अविद्याशब्दार्थविचारः कृतः ॥

(१४) संमतवादिनः – 'विद्यां चाविद्यां च' (ईशा. भा. ११) इति मन्त्रे अविद्यापदं कर्मणि प्रयुक्तम्। तत्तु गौणम्। मुख्यतोऽपि तदविद्यापदं कर्मणि प्रयुक्तम् इति भाति। तदुपादानत्वात् कर्मण इति ॥

स्वाशयः – एतदपि भाष्योक्तरीत्यैवोक्तम्। अत्र न विवादोऽस्ति। मुख्यतोऽपि अविद्यापदं कर्मणि प्रयुक्तमिति तु न संभवतीति ज्ञेयम्। अविद्यावत एव कर्माधिकारत्वात् कर्मणि अविद्यापदं गौणार्थकमेव ॥

(१५) संमतवादिनः – मां. का. २–१९. अविद्याशब्दार्थः बहुधा दृश्यते। तत्रैवाकरे 'मायैषा तस्य देवस्य' इति। मोहजनिकायां वैष्णवशक्तौ मायापदम् ॥

स्वाशयः – माया वैष्णवशक्तिः अव्यक्तं इति इमानि समानार्थकानि पर्यायपदानि, सर्वे मायादयः अध्यासकल्पिता इत्यत्र न सन्देहः। अत्र अविद्यापदप्रयोगो नास्ति; तदर्थविचारोऽपि नास्ति। माया शक्तिः इति पर्यायपदे ॥

(१६) संमतवादिनः – 'इन्द्रो मायाभिः' इत्यत्र मायापदं अविद्याकृतप्रज्ञासु प्रयुक्तमिति द्रष्टव्यम् ॥

**स्वाशयः** – अत्र अविद्यापदप्रयोगो नास्ति । मायाभिः इत्यस्य अर्थः इन्द्रियप्रज्ञाभिरिति । अविद्यारूपाभिः अविद्याकल्पिताभिरित्यर्थः । अत्रैव मायाभिरित्यस्य अभूतार्थप्रतिपादकेन मायाशब्देनेत्युक्तत्वात् । अविद्यारूपाभिरित्यस्य अविद्याकल्पिताभिरित्येव अर्थः संबध्यते । अविद्याकल्पितस्य अभूतार्थत्वसंभवात् । यदि मायाशब्देन मूलाविद्या गृह्यते मूलाविद्या अभूता नास्तीत्येवार्थो भवति । अत्राविद्याशब्दार्थविचारो नास्त्येव ॥

भाष्यकारेभ्यो वार्तिककारेभ्यश्च अर्वाचीनाः खलु मूलाविद्यावादिनः पञ्चपादिकाकारादयः । तस्माद्भाष्ये वार्तिकेषु वा मूलाविद्यापदं द्रष्टुं नैव शक्यम् । तदेव गमकं मूलाविद्यावादः भाष्यवार्तिकाऽसंमतः इति वक्तुम् । मूलाविद्यास्वरूपबोधकवाक्यानि विद्यन्ते वा न वा भाष्ये वार्तिकेषु वा इति विचारः कर्तव्य एव । एतावत्पर्यन्तं मूलाविद्याबोधकवाक्यानि न प्रदर्शितानि । मायाशब्ददर्शनमात्रेण मूलाविद्या न सिध्यति ॥

ब्रह्मसिद्धिकारैरविद्योपादानकारणवादिनः परमृष्टाः । तेष्वेकः पण्डितश्रेष्ठः अविद्योपादानकारणत्वं भाष्यकारैरेव प्रतिपादितमिति प्रदर्शितं चेदविद्योपादानकारणवादो जीवति, नो चेन्न जीवतीति कृत्वा भाष्यवाक्येष्वेव स्ववादं योजयामास – इत्यभ्यूहितुमवकाशोऽस्ति ॥

श्रीमद्रामानुजाचार्यैश्शतदूषणीकारैश्च मूलाविद्यावादे अनेके दोषा उद्घाटिता वर्तन्ते । तस्मान्मूलाविद्यावादः भाष्यवार्तिकासंमत एवम् ॥

ईशावास्योक्तप्रकृतिशब्दस्तु न मूलाविद्यां अप्रकृतामनुक्तां प्रकाशयति । किन्तु मिथ्याज्ञानस्य निमित्तभूतामग्रहणात्मिकामविद्यां प्रतिपादयतीति द्रष्टव्यम् । प्रतिपत्तिक्रमेण अध्यासस्य कारणं अग्रहणमेवेति कृत्वा तस्यैव अग्रहणस्य कारणशरीरत्वमुक्तमिति ज्ञेयम् । तस्मात्कारणशरीरमिति शब्दमात्रादेव मूलाविद्या स्वीकृता इति नैव वाच्यम् । मूलाविद्यायाः प्रसक्तिरेव अत्र नास्ति ॥

(१७) संमतवादिनः – अविद्येति तत्पुरुषसमासेन विद्याविरोधि किञ्चिद्वस्तु भाति सामान्यतः समेषाम् ॥

स्वाशयः – विद्याविरोधि किञ्चिद्वस्तु भातीत्येतन्न समीचीनम् । वस्तु ज्ञानविरोधि न भवति । ज्ञानं तु वस्तु यथा वर्तते, तथा बोधयति । ज्ञानं तु ज्ञापकं न कारकमिति भाष्यकारैरुक्तम् । यदि वस्तु मिथ्याज्ञान-कल्पितं स्यात् तर्हि सम्यग्ज्ञानेन बाध्यते, न केवलं मिथ्याज्ञानम्, किन्तु मिथ्याज्ञानकल्पितमपि बाध्यते इत्येतत दृष्टम् । मिथ्याज्ञानाकल्पिताया मूलाविद्याया विद्याविरोधित्वं नैव संभवति ॥

(१८) संमतवादिनः – उक्ते अर्थत्रये अविद्यापदं मुख्यमेव संसारव्यवहारमूलभूते चाध्यासे विशेषतो मुख्यत एव प्रयुक्तं भाष्यकृता – 'तमेतमेवंलक्षणमध्यासं पण्डिता अविद्येति मन्यन्ते' (सू.भा. पीठिका) इति ॥

एवमेव '·प्रकृतिः कारणं अविद्या अव्याकृताख्या ........ तामदर्श-नात्मिकम्' इति । ईशावास्यभाष्ये प्रकृतौ प्रयुक्तमविद्यापदं मुख्यमेव । परन्तु अदर्शनरूपाया मूलकारणे भूतजडप्रकृतेः सूक्ष्मरूपाया एव ग्रहणं युक्तम् । अविद्याकल्पिते नामरूपे इत्यर्थस्तु गौणो भवेत् ॥

स्वाशयः – अविद्याकल्पिते नामरूपे माया, शक्तिः अक्षरम्–इत्येतै-श्शब्दैरभिलप्येते इति मायास्वरूपवर्णनार्थं प्रवृत्तस्थले अविद्याकल्पितयोरेव नामरूपयोर्मायात्वप्रतिपादनवाक्यं कथं गौणं भवेत् । सर्वथा अविद्याकल्पित-नामरूपयोर्मायात्वं यदुक्तं तन्मुख्यमेव । अत्रापि अविद्याशब्दार्थविचारो नास्ति । स्वाभ्यूहितमायाया अविद्याकल्पितत्वमनभिमतमिति कृत्वा गौणो भवतीत्युक्तिरसंबद्धैव । स्वाभ्यूहमात्रशरीराया अनादिभूताया जडशक्तेर्मायात्वं बुभुत्सेत तर्हि सन्तोषो भवेत् । परं तु मायायाः अविद्याकल्पितत्वं स्पष्ट-मुक्तम् । इदं तु मायाया स्वरूपप्रतिपादनपरं वाक्यम् । तस्मान्मुख्यमेव न गौणम् ॥

(१९) **संमतवादिनः** – मुख्यत एव व्याकृतप्रक्रियायां बृहदारण्यके वार्तिके च आत्माश्रितविषयायाः अनादिभूतायाः अविद्याया एव वक्ष्यमाणरीत्या च ग्रहणात् । मायाप्रकृत्यादिवाच्याया एव अविद्याया ज्ञानदाह्यबीजत्वोक्तेश्च (अनुवादभाष्ये) मुख्यत एव मायादावविद्यापदं प्रयुक्तम् । अध्यासरूपाविद्याकल्पिताया अपि प्रकृतेरुक्तमुख्यार्थस्य बाधाभावात् ॥

**स्वाशयः** – अविद्यापदस्य अध्यासः मुख्योऽर्थः इति । उक्त्वापि तत्कल्पितनामरूपोऽपि मुख्यार्थ इति तु असङ्गतम् । अविद्याकल्पितनामरूपयोरविद्यापदवाच्यत्वं नैव संभवति । अविद्यापदस्य अव्यक्तं अक्षरं माया इत्याद्यर्थः कुत्रापि न प्रयुक्तः । अध्यासरूपाविद्याकल्पितनामरूपबीजस्य माया अक्षरादिपदवाच्यत्वमुक्तम् । ईशावास्येऽपि अग्रहणरूपाविद्यैव कारणमित्युक्तम्, न तु सूक्ष्मा जडप्रकृतिः कारणमित्युक्तम् । अविद्याकल्पितनामरूपयोर्मायाशब्दवाच्यत्वमेवोक्तम्, न तु अविद्याशब्दवाच्यत्वम् ॥

ज्ञानबाध्याविद्या तु अग्रहण-अन्यथाग्रहणात्मिकाविद्यैवेति प्रथमत एव भाष्यवाक्यानि दर्शितानि । मायाव्यक्तादीनां अध्यासकल्पितानां ज्ञानेन अध्यासरूपाज्ञानबाधादेव बाधः उक्तः । तस्मादविद्यापदं मायाद्यर्थे नोक्तमेव ॥

किञ्च ईशावास्यभाष्ये – मूलाविद्याग्रहणे ईशावास्यमिदं सर्वमिति प्रदर्शनं असंभवं भवतीति ज्ञेयम् । मूलाविद्याया ईशव्यतिरिक्तायास्सत्वात् ॥

(२०) **संमतवादिनः** – सोऽयमेक एवालं मूलाविद्या भाष्यवार्तिकसंमता इति प्रज्ञायै ' तद्धेदं तर्ह्यव्याकृतमासीत् ........ तदुत्तरमेव ........ परामृश्यते ॥

भाष्यम् – यदेतद्व्याकृतं जगत् संसारः, अथैतस्यैव साध्यसाधनलक्षणस्य व्याकृतस्य जगतो व्याकरणात् प्राक् या बीजावस्था तां निर्दिदिक्षति । अङ्कुरादिकार्यानुमितामिव वृक्षस्य । कर्मबीजोऽविद्याक्षेत्रो ह्यसौ संसारवृक्षः समूल उद्धर्तव्य इति । तदुद्धरणे हि पुरुषार्थसमाप्तिः । यदर्थस्सर्वशास्त्रारंभः,

यस्मिन् अविद्यया स्वाभाविक्या क्रियाकारकफलाध्यारोपणा कृता, यः कारणं सर्वस्य जगतः, यदात्मके नामरूपे सलिलादिव स्वच्छात् मलमिव फेनं अव्याकृते व्याक्रियेते इति ॥

भाष्यभावप्रकाशकानि वार्तिकवचनानि –

अथैतस्य यथोक्तस्य साध्यसाधनरूपिणः ।
जगतो व्याकृतस्याभूद्द्विजावस्था विनश्वरी ॥ १६७ ॥

तन्निर्दिदिक्षया यत्नात् प्रवृत्तैषा परा श्रुतिः ।
संसृत्यनर्थस्य यतो निदानं सैव नापरम् ।
अतो मूलमनर्थानामात्माज्ञानं जगत्यपि ॥ १६८ ॥

तद् ध्वंसादेव निश्शेषपुमर्थाप्तिरतो भवेत् ।
आत्मन्यध्यासरूपोऽयं संसारः प्रतिपादितः ।
अध्यासश्च विना हेतुं न लोक उपपद्यते ॥ १६९ ॥

तस्माद्धेतूपदेशाय यः कारणमितीर्यते ।
यस्मिन्नविद्ययेत्येवं ननु कारणमीरितम् ॥ ४७६ ॥

प्रधानवादमाशङ्क्य यस्माद्भूयोऽपि भण्यते ।
अज्ञात आत्मा जगतः कारणं न गुणत्रयम् ॥ ४८० ॥

श्रुतितो युक्तितश्चापि स्वयमेव प्रवक्ष्यति ।
उदर्के इममेवार्थं नातोऽन्यत्कारणं भवेत् ॥ ४८१ ॥

यदात्मके नामरूपे इत्यज्ञातात्मतात्तयोः ।
प्रथते वैश्वरूपेण यतोऽविद्यैव सर्वथा ।
अविद्यामात्रयाथात्म्यादतस्तद्धेदमुच्यते ॥ ४८२ ॥

इति ॥

**स्वाशयः** – संमतवादिनस्तु अज्ञातात्मा अथवा आत्माज्ञानमेव मूलाविद्या इति विदितवन्तः इति गम्यते । इदं तु भ्रान्तिमात्रमेव । अज्ञातात्मा इत्यस्य अग्रहणरूपाविद्योपाधिकः आत्मा । आत्मा आत्मरूपेणैव वर्तते; किं तु स न ज्ञातः इत्येव अर्थः । आत्मनः अज्ञानं इत्यत्रापि आत्मानात्मनोर्विवेकाग्रहणरूपमेव, न तु अन्यादृशी अविद्या । अग्रहणरूपा-विद्यैव अध्यासरूपाविद्यायाः कारणं प्रतिपत्तिक्रमेण, एवमेव प्रदर्शितं

भाष्यकारेण अध्यासभाष्ये इतरेतराविवेकेन अध्यस्य इति । इतरेतराविवेकस्तु अध्यासस्य कारणम् इत्यर्थः ॥

किञ्च, भाष्यकारैः सूत्रभाष्ये (१–४–१३) द्वितीयपक्षे अव्यक्तशब्देन अध्यासरूपाविद्यैवोक्ता इतीयं स्मर्तव्या । अतः अव्यक्तशब्दमात्रप्रयोगस्थलेषु मूलाविद्यैवोक्ता इत्येतत्सर्वथा असांप्रतं अशब्दितं च ॥

इममेवार्थं भाष्यकाराः भगवद्गीताभाष्ये (१३–२, १३–२६) क्षेत्रक्षेत्रज्ञयोर्विषयविषयिणोः भिन्नस्वभावयोरितरेतरतद्धर्माध्यासलक्षणः संयोगः क्षेत्रक्षेत्रज्ञस्वरूपविवेकाभावनिबन्धनः इति । अध्यासस्य विवेकग्रहणाभावमेव कारणमिति प्रतिपादयामासुः ॥

श्रीमद्गौडपादाश्च वैतथ्यप्रकरणे (१७) भाष्ये जीवकल्पना सर्वकल्पनामूलमित्युक्तं सैव जीवकल्पना किं निमित्ता इति ? विशुद्धविज्ञप्तिमात्रसत्ताद्वयरूपेण अनिश्चितत्वाज्जीवादिभेदैरात्मा विकल्पितः इत्येषः सर्वोपनिषदां सिद्धान्तः । एतैर्वचनैस्संसारकारणीभूताध्यासस्य मिथ्याज्ञानरूपस्य आत्मानात्मनोरितरेतरविवेकग्रहणाभाव एव निमित्तः इति स्पष्टं ज्ञायते । एतेन विवेकग्रहणाभावोपाधिकः अज्ञातात्मा । आत्मनः अज्ञानं इत्यत्रापि आत्मनः अग्रहणमेव अज्ञानमिति स्पष्टोऽर्थः । एतादृशाज्ञानमेव अन्यथाग्रहणरूपस्य जगतः कारणं वैश्वरूपेण प्रथनस्यापि कारणमित्यर्थः ॥

भाष्यवाक्यम् (४०७) 'जगदिदं व्याकृतं अव्याकृतं इत्यभेदविवक्षायां आत्मानात्मनोर्भवति व्यपदेशः' इति ॥

अत्र भाष्यकृद्भिः आत्मानात्मनोरुभयोरपि व्याकृताव्याकृतशब्देन ग्रहणं दृष्टान्तपूर्वकं प्रदर्शितम् । अव्याकृतशब्देन अज्ञातात्मा उच्यते इति । अविद्याशब्दप्रयोगमात्रेण स्वाभिप्रेतमूलाविद्याग्रहणस्यावकाशो नास्त्येव । केवलजडशक्तिरूपाया मूलाविद्यायाः विश्वरूपेण प्रथनं असंगतमेवेत्येतदपि स्पष्टमेव । भाष्ये–एतत् नामरूपाभ्यां व्याक्रियत इत्यत्र एतच्छब्देन तत् स्वयमेव आत्मैव इति अज्ञातात्मा व्याक्रियत इत्युक्तो द्रष्टव्यः । केवल जडशक्तेः हिरण्यगर्भादिरूपेण प्रथनं असंभवम् ॥

अग्रहण-अन्यथाग्रहण-संशयग्रहणरूपाविद्यायाः नैसर्गिकत्वं तु कारणं विना प्रथनं सर्वानुभवसिद्धम् इत्यर्थः। स्वभावसिद्धापि मिथ्याग्रहण-अग्रहण-रूपा अविद्या विद्यया बाध्यते ; विरोधित्वात् । भाष्यकारैरेवोक्तम् – 'एवमयमनादिरनन्तो....मिथ्याप्रत्ययरूपोऽध्यासः आत्मैकत्वविद्यया बाध्यते' इति । तथा च ब्रह्मप्राप्तिर्हस्तगतैव भवति ॥

जडशक्तिरूपमूलाविद्याङ्गीकारे तु विद्यमानायाः अनध्यस्तायाः मूलाविद्यायाः ज्ञानेन बाधानुपपत्तिरेव भवति । तथा च अद्वैतहानिः मोक्षानुपपत्तिश्च भवति । तस्माद्भाष्योक्तमव्याकृतं अज्ञातात्मैवेति ज्ञेयम् । न जडशक्तिरूपा मूलाविद्या इति सुस्पष्टम् ; ग्राम आगतः इतिवत् । तस्मादव्याकृतशब्देन अज्ञातात्मा उच्यते । 'उदर्क इममेवार्थं नातोऽन्य-त्कारणं भवेत् । यदात्मके नामरूपे इत्यज्ञातात्मता तयोः ॥' (वा. ४८१.)

नामरूपयोरात्मा अज्ञातात्मैव इत्युक्तम् । यद्वस्तु यत्र कल्पितं तदेव तस्य स्वरूपम् इति दृष्टम् । यथा रज्ज्वां कल्पितः सर्पः रज्जुरेव भवति, भ्रान्त्या कल्पितत्वात् । यथा विद्यमानस्सर्पो न ज्ञानेन बाध्यते, तथा नामरूपात्मकं व्यक्तं वा अव्यक्तं वा विद्यमानं ज्ञानेन न बाध्यते । मिथ्याज्ञानकल्पितं तु सम्यग्ज्ञानेन बाध्यते । अधिष्ठानरूपात्मकत्वं च भवति ; तर्ह्येव यदात्मके नामरूपे इति वक्तुं अर्हतः । अनध्यस्तात्मकत्वे यदात्मके इति वक्तुं नैव शक्येते । उक्तं च यदात्मके इति । अतोऽपि कारणात् मूलाविद्या अप्रामाणिकैत्येवावधार्या । स्वतन्त्रं वा ईश्वराधीनं वा वस्तु न ज्ञानेन बाध्यते ॥

पञ्चपाद्यामपि अज्ञानमिति च जडात्मिका अविद्याशक्तिः ज्ञानपर्युदासेन उच्यते इति-उक्तम् । जडात्मकशक्तेरङ्गीकारे तस्या अनध्यस्तत्वाद् ज्ञान-बाध्यत्वं नैव संभवतीति पूर्वमेवोक्तम् ॥

(२१) संमतवादिनः – 'परोऽविवेको भूतानां आत्माविद्येति भण्यते' इति प्राणिमात्रस्य अत्यन्ताविवेकः ........ आत्माविद्येति भण्यते ॥

**स्वाशयः –** अत्र वार्तिककारैरेव उक्ता सर्वानुभूताग्रहणात्मिका अविद्यैव अविवेकशब्दवाच्या न मूलाविद्या। मूलाविद्याया सर्वानुभवसिद्धत्वाभावात्। विवेकाविवेकशब्दौ लोके ज्ञानाज्ञानयोरेव प्रयुक्तौ, ज्ञानाज्ञाने तु अनुभूते, जडशक्तिस्तु न केनाप्यनुभूता, स्वाभ्यूहमात्रशरीरा, अविवेक इति शब्दप्रयोगमात्रादेव न सिद्ध्यति। भाष्यबहिर्भूता चेति सुधीभिर्ज्ञेयम्॥

श्रीविद्यारण्यमुनीनां उक्तिः अत्र अनुदाहरणीया। भाष्यवार्तिकेषु मूलाविद्या अङ्गीकृता इति प्रदर्शयितुं प्रवृत्तैः किमर्थं विद्यारण्यमुनिवचनं प्रदर्श्यते? पञ्चपादिकाकारैः उक्ता मूलाविद्यैव भाष्यबहिर्भूता इति पूर्वमेवोक्तं द्रष्टव्यम्॥

वार्तिके (४८०) 'अज्ञात आत्मा जगतः कारणं न गुणत्रयम्। श्रुतितो युक्तितश्चापि स्वयमेव प्रवक्ष्यति' इति अज्ञातात्मन एव कारणत्वमुक्तम्। न गुणत्रयमिति गुणत्रयरूपा मूलाविद्या निषिध्यते। प्रतिपत्तिक्रमेण अध्यासं प्रति कारणं अग्रहणमेवेत्युक्तम्। ज्ञानेन 'इयं मूलाविद्या ब्रह्माश्रिता' इत्येव ज्ञाप्येत न बाध्येत॥

(२२) **संमतवादिनः –** 'मायां तु प्रकृतिं विद्यात् मायिनं तु महेश्वरम्'–अत्र मायायाः प्रकृतित्वमुक्तम्। प्रकृतिरेव मूलाविद्या॥

**स्वाशयः –** उद्देश्यविधेयस्थले प्रसिद्धं उद्दिश्य अप्रसिद्धं विधीयते प्रकृतिः प्रसिद्धा, सा का इति न ज्ञाता, ततः प्रकृतिः, माया इति उच्यते, या नास्ति परमार्थतः केवलप्रतिभासमाना सा मायेति उच्यते। नामरूपयोरविद्याकल्पितत्वे, परमार्थतः ते न स्तः इति वक्तुं शक्यते। नो चेत् न स्तः इति वक्तुं न शक्यते इति हेतोरविद्याकल्पितनामरूपयोर्मायात्वमुक्तम्। प्रथमतः उक्तमुद्देश्यम्, अनन्तरोक्तं विधेयम्- इत्यङ्गीकारे लोकदृष्टमायायाः प्रकृतित्वं मायाविनः ईश्वरत्वं वक्तव्यं स्यात्। तच्चानिष्टम्। अतः लोके प्रसिद्धा प्रकृतिः माया, महेश्वरः मायावी इत्येव उच्यते। किञ्च मायाशब्दः मूलाविद्यां वदतीत्यत्र प्रमाणं नास्ति, मायाशब्दः प्रतिभासमात्रशरीरां अविद्याकल्पितां जडशक्तिं वदतीति पूर्वमेव प्रतिपादितम्। भाष्यकारैरुक्तत्वात्॥

परोऽविवेको भूतानां आत्माविद्येति कथ्यते ।
ईशादिविषयान्तं यत् तदविद्याविजृम्भितम् ॥

अत्रापि अविवेकः आत्माविद्या इति अग्रहणस्यैव अविद्यात्वमुक्तम् । गीताभाष्ये (१३–२६) – आत्मानात्मनोरितरेतरविवेकग्रहणाभावनिबन्धनः अध्यासः इत्यग्रहणस्यैव अविद्यात्वं अध्यासकारणत्वं च पूर्वमेवोक्तम् । तस्मान्मूलाविद्यायाः प्रसक्तिरेव नास्ति ।

दैवी ह्येषा गुणमयी मम माया दुरत्यया ।
वैष्णवी खल्वियं मायेत्यपि लोकेऽपि गीयते ॥

इति । भगवद्गीतायां 'दैवी ह्येषा गुणमयी मम माया दुरत्यया' (७–१४) इति वर्तते । तत्र भाष्ये 'दैवी देवस्य मम ईश्वरस्य विष्णोः स्वभूता माया' इत्युक्तम् । मायायाः अविद्याकल्पितत्वे खलु विष्णोः स्वभूतत्वं स्यात् । नो चेत् विष्णोरन्यत्वमेव स्यात् । अतः अत्रापि अविद्याकल्पितत्वं मायायाः सिद्धं भवति । अत्र मूलाविद्यागन्धोऽपि नास्ति । 'मायैषा तस्य देवस्य यया संमोहितस्स्वयम्' (गौ. कारिका २–१९) । अत्रापि दृष्टान्तानुरोधेन, सूत्रभाष्योक्तरीत्या च अविद्याकल्पिता मायेत्येवार्थः ; नान्योऽर्थः कल्पयितुं शक्यः । अन्यार्थकल्पने अद्वैतहानिरेव स्यात् । तत्रैव गौ. कारिकायां 'मायामात्रमिदं द्वैतम्' (१–१७) इति । अत्र भाष्ये 'न हि रज्ज्वां भ्रान्तिबुद्ध्या कल्पितः सर्पो विद्यमानस्सन् विवेकतो निवृत्तः । नैव माया ........ विद्यमाना सती निवृत्ता, तथा इदं प्रपञ्चाख्यं मायामात्रम्' इत्युक्तम् । तथा च बुद्धिपरिकल्पितैव माया । अत एव अविद्यमाना अत एव ज्ञानबाध्या इत्यर्थः । तस्मादत्र मायाशब्देन मूलाविद्याया ग्रहणं असंबद्धमेव, अन्याय्यमेव, अनुक्तमेवेति सुधीभिरूह्यम् ॥

## (२३) संमतवादिनः – वार्तिकवाक्यानि –

नामरूपादिना येयमविद्या प्रथतेऽसती ।
माया तस्याः परं सौक्ष्म्यं मृत्युनैवेति भण्यते ॥

मृत्युर्वै तम इत्येवमाप एवेदमित्यपि ।
अविद्या प्रथते मौली व्यक्ताव्यक्तात्मनानिशम् ॥

अत्र मूलाविद्या व्यत्यस्तपदाभ्यां भणिता, सैव कारणाविद्या इत्यर्थः । सैव मृत्युतमआदिशब्दैरपि श्रुतौ तत्र तत्र भण्यते इति ॥

**स्वाशयः** – अविद्या – अध्यासः नामरूपादिना प्रथते । तस्याः परं सौक्ष्म्यं मृत्युशब्दोदितं अग्रहणम् । अग्रहणरूपाविद्या मूलभूताविद्या इत्यर्थः । मौली अविद्या इत्यस्याः मूलभूता अविद्या इत्येव अर्थः । वार्तिककारैरुक्ता मूलभूता अविद्या का ? इति चेत् । संमतकारैरुक्ता प्रपञ्चबीजभूता अनिर्वचनीयवस्तुभूता मूलाविद्या नैवोक्ता । तादृशाविद्यायाः कुत्राप्यनुक्तत्वात् भाष्यवार्तिकबहिर्भूतत्वाच्च । अतः वार्तिककारैरुक्ता मूलभूताविद्या तत्त्वाग्रहणरूपैव । तस्या एव तैः कारणत्वोक्तेः । मृत्युशब्देन तस्या एव परामर्शात् (११०८) वार्तिके एवमेव 'मिथ्याज्ञानमृते नान्यत्कार्यं किञ्चिदपीष्यते । अविद्याया यतो नातः नासङ्गाद्याहृतिः स्वतः' इत्यनेन अग्रहणरूपाया अविद्यायाः कार्यं मिथ्याज्ञानमित्युक्तम् । अत एव अज्ञातात्मैव कारणमित्युक्तम् । जगत अविद्याकल्पितजडशक्तेरुपादानकारणत्वोक्तिस्तु अस्माभिरङ्गीक्रियते एव, कल्पिताया अविद्यमानत्वात् । कार्यभूतं जगदपि नास्ति कारणभूता मायापि नास्ति । किञ्च, वार्तिककारैरेव ७८९ श्लोके –

अज्ञानमिथ्यासंशीतिव्यतिरेकेण नापरम् ।
प्रत्यर्थिमेयविषये मानस्येहास्ति किञ्चन ॥

इति आत्मानात्मनोरितरेतरविवेकाग्रहणान्यथाग्रहणसंशयग्रहणरूपाविद्यातिरिक्ताऽविद्या नास्तीत्युक्तम् । तस्मात् मूलाविद्यायाः गन्धोऽपि वार्तिककारैर्न घ्रातः इत्यवगन्तव्यम् । 'परोऽविवेको भूतानां आत्माविद्येति कथ्यते' ५०८ (३८१) इति विवेकग्रहणाभावस्यैव आत्माऽविद्यात्वं स्पष्टमेवोक्तम्, कथं तत्र स्वाभ्यूहमात्रसिद्धायाः मूलाविद्यायाः प्रवेशः ? 'अज्ञातात्मैव कारणम्' इति वार्तिककारैरध्यासस्य कारणत्वेन 'अज्ञातात्मा जगतः कारणम्, न गुणत्रयम्' इति (४८०) श्लोके उक्तत्वात् न मूलाविद्यायाः प्रवेशस्य

अवकाशोऽस्ति । न गुणत्रयमिति गुणत्रयात्मकमूलाविद्याया कारणत्वं नास्तीति स्पष्टमुक्तमनुसन्धेयम् ॥

आत्मनः उपादानकारणत्वं भाष्यकृद्भिरपि उक्तम् । 'प्रकृतिश्च प्रतिज्ञादृष्टान्तानुपरोधात्' इति सूत्रम् । तत्र भाष्ये 'कस्मिन्नु भगवो विज्ञाते सर्वमिदं विज्ञातं भवति' इति प्रतिज्ञा ; 'यथा पृथिव्यां ओषधयः संभवन्ति' इति दृष्टान्तः । 'आत्मनि विदिते सर्वमिदं विदितं भवति' इति प्रतिज्ञा ; 'स यथा दुन्दुभेर्हन्यमानस्य ......... दुन्दुभ्याघातस्य वा शब्दो गृहीतः' इति दृष्टान्तः । अधिष्ठातरि ह्युपादानादन्यस्मिन् अभ्युपगम्यमाने पुनरपि एकविज्ञानेन सर्वविज्ञानस्यासंभवात्, प्रतिज्ञादृष्टान्तोपरोध एव स्यात् । तस्मादात्मनः उपादानान्तराभावात् प्रकृतित्वमिति आत्मनः उपादानकारणत्वं प्रसाधितम् । तथा च संमतकारैरुक्ता मूलाविद्या अङ्गीकृता चेत्, एकविज्ञानेन सर्वविज्ञानस्य हानिरेव स्यात् । मूलाविद्यायाः अध्यासरूपाविद्याकल्पितत्वासंभवादात्मनो अन्यत्वमेव सुस्थिरं भवति । एकस्य विज्ञानेन अन्यस्य विज्ञानं न संभवति । अद्वैतहानिः द्वैतापत्तिश्च अनुसरतः । अविद्याकल्पितत्वं मूलाविद्याया अङ्गीकृतं विवरणकारैः । तथापि कल्पनाया मूलाविद्याकार्यत्वं विरुद्धमुक्तम् ॥

(२४) संमतवादिनः – 'मायैषा तस्य देवस्य यया संमोहितः स्वयम्' (गौ. का. २–१९) । अत्र यथा मायाविना विहिता माया गगनं तरुभिराकीर्णमिव दृश्यते, तथा इयमपि माया । ययाऽयं स्वयमपि मोहित इव मोहितो भवति ॥

स्वाशयः – अत्रापि मायावी अनिर्वचनीयं वस्तु न प्रदर्शयति । किन्तु अविद्यमानं विद्यमानमिव प्रदर्शयति खलु । तथा अविद्याकल्पितमायाऽपि अविद्यमानं जगत् विद्यमानमिव प्रदर्शयतीत्यर्थः । अत्रापि मूलाज्ञानस्य गन्धोऽपि नास्ति । तरुभिराकीर्णमिव दृश्यमानगगनदृष्टान्तेन जगतः अस्तित्वमेव निषिद्धम् । कुतः तस्य कारणापेक्षा ? अत्रापि अविद्याशब्दार्थे विचारो नास्ति ॥

(२५) **संमतवादिनः –** 'दैवी ह्येषा गुणमयी मम माया दुरत्यया' (गी. ७ १४). अत्र गुणमयी माया इति शब्दो मूलाविद्यां बोधयति ॥

**स्वाशयः –** अत्रापि भाष्ये – 'दैवी .... देवस्य विष्णोः स्वभूता' इति वर्तते, मायायाः मिथ्याज्ञानकल्पितत्वे कल्पितस्य अधिष्ठानरूपत्वाद्विष्णोः स्वभूता इति वक्तुं शक्यते । मूलाविद्याग्रहणे विष्णोस्स्वभूतत्वं वक्तुं न शक्यते । मिथ्याज्ञानकल्पितत्वाभावात् । अतः मूलाविद्या अत्र नोक्ता । अत्रापि कल्पितत्वाङ्गीकारे कल्पनारूपाध्यासस्य कारणमित्युक्तिरसङ्गता ॥

(२६) **संमतवादिनः –** वार्तिककारैरुक्ता आत्माविद्या मूलाविद्यैव । अतः निरासकारैः मूलाविद्या नोक्ता वार्तिककारैरित्युक्तिः वार्तिकानवलोकननिबन्धना ॥

**स्वाशयः –** वार्तिककारैरेव आत्माविद्याया अग्रहणात्मकत्वं वर्णितम् 'परोऽविवेको भूतानां आत्माविद्येति कथ्यते' ५०८ (३८१) इति विवेकग्रहणाभावस्यैव आत्माविद्यात्वोक्तेः । अत्रापि मूलाविद्या गन्धोऽपि नास्तीति सुधीभिरेवोह्यम् ॥

(२७) **संमतवादिनः –** 'भगवतो मायाशक्तिः क्षराख्यस्य पुरुषस्य उत्पत्तिबीजं ........ पुरुष उच्यते' इति गीताभाष्यतोऽपि अक्षरपदेन व्यवहृतः पदार्थः माया भावाविद्या इति ॥

**स्वाशयः –** उत्तरश्लोकभाष्ये देहाद्यविद्याकृतात्मभ्यः परमश्चासौ आत्मा च सर्वभूतानां प्रत्यक्चेतनः परमात्मा इत्युक्तम् । एतेन क्षरपुरुषः अक्षरपुरुषश्च अविद्याकृतक्षराक्षराभिमानिनौ इत्युक्तं भवति । एतेन अक्षरपुरुषस्य अविद्याकृताक्षरोपाधेर्मिथ्याज्ञानकल्पितत्वमेवोक्तम् । न तु मिथ्याज्ञानोपादानकारणीभूतमूलाविद्यायाः प्रसक्तिरेव नास्तीति सुधीभिर्ज्ञेयम् । उपाधेरविद्याकृतत्वात् इति भाष्ये उक्तम् ॥

(२८) संमतवादिनः – इयं आत्माविद्यैव मूलाविद्या इति ॥

स्वाशयः – आत्माविद्या इत्यस्य अर्थः । आत्माग्रहणम्, ग्रहणाभावः, स एव अन्यथाग्रहणस्य प्रतिपत्तिक्रमेण कारणम् इति स्पष्टतया वार्तिककारैरेव 'परोऽविवेको भूतानां आत्माविद्येति कथ्यते' इत्युक्त. नात्र जडशक्तेर्मूलाविद्यायाः अवकाशः ॥

(२९) संमतवादिनः – अध्यासरूपाविद्यायास्तु मायातः भेदोऽस्त्येवेति ॥

स्वाभिप्रायः – (४०८) अविद्या माया एकैवेति वदन्तः कथमत्र मायायाः अविद्यातः भेदम् अङ्गीकुर्वन्ति ? भाष्यकाराः वार्तिककाराश्च अग्रहण-अन्यथाग्रहण-संशयग्रहणरूपैव अविद्या, नान्या अविद्या वर्तते इति वदन्ति । किञ्च विद्याविद्ये अन्तःकरणवृत्तिरूपे, माया तु मिथ्याज्ञान-कल्पितनामरूपबीजभूता । तस्मादध्यासरूपाविद्यातः भिन्नैव माया इति यदुक्तं संमतकारैः तत्समीचीनमेव । एवमुक्त्वा पुनः अविद्यां मायां चैकां वदन्तीत्येतदाश्चर्यकरम् । भाष्यकाराः अग्रहणाद्यर्थे एव अविद्यापदं प्रयुञ्जन्ति नान्यार्थेषु ॥

'मायां तु प्रकृतिं विद्यात्' इत्यत्र प्रकृतिः सर्वैः ज्ञाता । विकृतेः प्रकृतिः आवश्यका इति दृष्टत्वात् । अत्र प्रकृतिं मायां विद्यात् इत्येव अर्थः । प्रकृतिः नास्त्येव विकृतिरपि नास्त्येव इति प्रदर्शयितुं प्रकृतिं मायां ऊचुः । नो चेत् मायाविना कृता माया जगत्कारणीभूता प्रकृतिरित्यनर्थकरं वाक्यं स्यात् ॥

'दैवी ह्येषा गुणमयी मम माया दुरत्यया' (तेषामेव .... अज्ञानजं तमः १०–११ अविवेकतः जातं मिथ्याप्रत्ययलक्षणम्) ईशावास्ये – तमसा अदर्शनात्मकेन इति । अत्रापि मायाशब्दः अविद्याकल्पितां मायामेव वदति ; न तु मूलाविद्याम् । अविद्याकल्पितत्वानङ्गीकारे ईश्वरस्वभूतत्वं न संगच्छते, कल्पितत्वाङ्गीकारे कल्पितस्य अधिष्ठानस्वरूपत्वं संगच्छते ॥

(३०) **संमतवादिनः** – न विद्या अविद्या इति। विद्याया अन्या अविद्या इति जडशक्तिः एतावत्पर्यन्तं न प्रदर्शिता ॥

**स्वाशयः** – इदानीं प्रदर्श्यते ; अविद्यापदप्रदर्शनमात्रेण मूलाविद्या न सिध्यति। विद्याविरोधिभूता अविद्या भवति, जडवस्तु विद्याविरोधी न भवति। त्रिगुणात्मिका माया सैव मूलाविद्येति। इदं तु सर्वथा न संभवति। मूलाविद्यावादिनः मूलाविद्यां जडशक्तिस्वरूपां अध्यासोपादानकारणभूतां वदन्ति। भाष्यकाराः अध्यासकल्पितां जडशक्तिं मायां वदन्ति। कथं अध्यासकल्पिता जडशक्तिः अनादेरध्यासस्य उपादानकारणीभूता भवेत्? तस्मात् मूलाविद्यायाः प्रसक्तिरत्र सर्वथा नास्ति ॥

(३१) **संमतवादिनः** – 'मायैषा तस्य देवस्य यया संमोहितः स्वयम्' इति। अत्र इयमेव मायामोहहेतुतया चतुर्थपादेनोक्ता। माया मूलाविद्या इति ॥

**स्वाशयः** – अत्र मायाशब्देन या मा नास्ति सा माया इति। मायाविना विसृष्टेन कुसुमितैर्वृक्षैराकीर्णगगनदर्शनदृष्टान्तेन प्रतिपादितम् ; तत्रैव 'अनिश्चिता यथा रज्जुः' इति कारिकायाम् ॥

स्वेन विशुद्धविज्ञप्तिमात्रसत्ताद्वयरूपेण अनिश्चितत्वात् जीवप्राणाद्यनन्तभावभेदैः आत्मा विकल्पितः इति अग्रहणस्यैव जीवप्राणाद्यनन्तभावभेदस्य कल्पकत्वं उक्तम्। अत्रापि मायाशब्देन अग्रहणमेवोक्तम्, नान्यत्। एकत्रापि वस्तुभूता अनिर्वचनीया इत्यादिशब्दप्रयोगो नास्त्येव। मायाशब्दमात्रेण मूलाविद्या उक्ता इत्युक्तिरसमञ्जसा। मायाशब्दः तत्त्वाग्रहण-अन्यथाग्रहणार्थत्वेन भाष्यकारैः प्रयुक्तः (१–१६)। तथा हि 'अनादिमायया सुप्तो ........' इति ॥

भाष्ये –'जीवः तत्त्वाप्रतिबोधरूपेण बीजात्मना अन्यथाग्रहणलक्षणेन चानादिकालप्रवृत्तेन मायालक्षणेन स्वप्नेन सुप्तः' – इति मायाशब्दः तत्त्वाग्रहणान्यथाग्रहणार्थत्वेन प्रयुक्तः। १९६–४–४८. माया नाम वस्तु तर्हि, नैवम् ; सा च माया न विद्यते, मायेत्यविद्यमानस्य आख्येत्यभिप्रायः ॥

अत्रापि मूलाविद्यायाः प्रसक्तिरपि न श्रूयते, किञ्च, 'अज्ञानमिथ्यासंशीतिव्यतिरेकेण नापरम् । प्रत्यर्थिमेयविषये मानस्येहास्ति किञ्चन' इति वार्तिकः अनुसन्धातव्यः ॥

(३२) **संमतवादिनः** – ४०६. आत्माविद्या तत्त्वग्रहणाभावरूपापि मायायाः त्रिगुणात्मिकाया भावरूपत्वे अविप्रतिपन्नत्वात् ॥

**स्वाशयः** – अध्यासरूपाविद्याकल्पिता, या माया तस्याः त्रिगुणात्मकत्वे भावरूपत्वे अविप्रतिपन्नत्वम्, यदि मायायाः अध्यासकल्पितत्वमङ्गीक्रियते, तदा अध्यासस्य उपादानकारणीभूता इति मायाया विशेषणम् असंबद्धमेव भवति । किञ्च, आत्माविद्याशब्देन अनिर्वचनीया वस्तुभूता मूलाविद्या उक्ता इत्यर्थः अभ्यूहितुमपि न शक्यते । आत्माविद्या – आत्माग्रहणम् इत्यर्थः । ग्रहणाभावमाययोरैक्यं न संभवति ॥

(३३) **संमतवादिनः** – अक्षरपदेनापि व्यवहृतः पदार्थः माया भावाविद्या ॥

**स्वाशयः** – भाष्यकाराः सूत्रभाष्ये (१–४–३) 'अविद्याकल्पिते नामरूपे .... प्रपञ्चबीजभूते माया अक्षरं इत्येतैश्शब्दैरभिलप्येते' इति । अविद्याकल्पितप्रपञ्चबीजभूतनामरूपयोरक्षरत्वं उक्तम् । अत्रापि अविद्याकल्पित क्षराक्षरात्मानौ क्षराक्षरपुरुषौ इति । अक्षरपुरुषस्योत्पत्तेरपि अविद्याकृतत्वमुक्तम् । तस्मान्नात्र मूलाविद्याप्रवेशस्यावकाशः अक्षरशब्दप्रयोगमात्रेणेत्यवगन्तव्यम् ॥

(३४) **संमतवादिनः** – इयमेव अविद्या अहमित्यध्यासस्यापि कारणम् । हेतुं विना लोके अध्यासो नोपपद्यते इत्युक्तम् । 'अध्यासश्च विना हेतुं न लोक उपपद्यते । तस्माद्धेतूपदेशाय यः कारणमितीर्यते ॥' इति । तत्रापि न केवलं निमित्तं उपादानं च इति भाष्याशयः स्पष्टीकृतो वार्तिके ॥

अस्य द्वैतेन्द्रजालस्य यदुपादानकारणम् ।
अज्ञानं तदुपाश्रित्य ब्रह्म कारणमुच्यते ॥

इति । अत्र कारणमिति सामान्यतोऽनुक्त्वा उपादानकारणमिति वदद्भिः निमित्तमिव उपादानमपीति स्पष्टीकृतम् । न केवलं शब्दमात्रेण उपादानमिति कथितम् । अपि तु स्वकार्ये जडवर्गे अन्वयकारणत्वरूपमुपादानजाड्यांशन्यायेन समर्थितं च तत्रैव वार्तिके (१–४–३४४) ........ एतेन मूलकारणीभूताविद्यायां बीजोपादानहेत्वादिशब्दाः केवलं निमित्तमात्रे प्रयुक्ताः इति । निरासकाराभिप्रायो भाष्योपरिवर्णितो वार्तिकाशयविरुद्धः इति मन्तव्यम् ॥

**स्वाशयः** – इदं तु भाष्यवार्तिककाराणामाशयमविदुषां साहसं वचनमिति वक्तव्यम् ॥

अस्मिन् श्लोके अज्ञानम् उपादानकारणमित्युक्तं कथं विस्मृतम् ? तस्मादज्ञानमेव उपादानकारणं न मूलाविद्या । अज्ञानमिति शब्दोऽपि वस्तु बोधयतीति वदतां किं किं न सिध्येत् ? वार्तिककारैरग्रहणादिव्यतिरिक्ता अविद्या नास्तीत्युक्तं स्मर्तव्यम् । नास्तीत्यस्य पदस्य अस्तीत्यर्थकल्पनाकुशलानां सामर्थ्यं श्लाघ्यमेव अज्ञानशब्दस्य ज्ञानाभावादयः अर्था दृष्टाः ॥

भाष्यकाराः तमेतमेवंलक्षणमध्यासं पुरस्कृत्य सर्वे प्रमाणप्रमेयव्यवहाराः प्रवृत्ताः । अयं अनादिः अनन्तः .... अध्यासः .... इति अध्यासस्य प्रमाणप्रमेयव्यवहारात्पूर्वमेव सिद्धत्वम् अनादित्वं च प्रतिपादयामासुः । आत्मानात्मनोरितरेतराध्यासस्तु सर्वानुभवसिद्धः न प्रमाणसिद्धः कार्यकारणव्यवहारात् कालादिव्यवहाराच्च पूर्वमेव सिद्धः । अध्यासपूर्वक एव कार्यकारणव्यवहारः । अतः अध्यासश्च कारणं विना नोपपद्यते इत्यस्य वाक्यस्य कोऽर्थः ?

मिथ्याज्ञानरूपो अध्यासः तत्त्वज्ञानाभावं विना नोपपद्यते इति प्रतिपत्तिक्रमो विवक्षितः । रज्जौ सर्पबुद्धेः किं कारणम् इति चेत् । इयं

रज्जुरेव इति ज्ञानाभाव एव कारणम् । रज्जुज्ञानाभावादेव सर्पज्ञानं उत्पन्नम् इति प्रतिपत्तिक्रमेणैव कार्यकारणशब्दः प्रयुक्तः, तथैव पूज्या गौडपादाः (२-१७, पृ. ८१) वदन्ति ; भाष्यकारा अपि –

'जीवकल्पना सर्वकल्पनामूलमित्युक्तम् । सैव जीवकल्पना किंनिमित्तेति दृष्टान्तेन प्रतिपादयति । यथा लोके स्वेन रूपेण अनिश्चिता अनवधारिता एवमेवेति रज्जुः मन्दान्धकारे किं सर्पः उदकधारा, दण्ड इति अनेकधा विकल्पिता भवति पूर्वं स्वरूपानिश्चयनिमित्तम् । ........ इत्येषः सर्वोपनिषदां सिद्धान्तः' – इत्यूचुः । अतः अत्र अध्यासस्य कारणं तत्त्वाग्रहणमेव नान्यदित्यर्थः । उपादानकारणत्वं च तस्यैव उक्तम्, कथं तत्त्वाग्रहणं उपादानकारणं भवति ? इति चेत्, उच्यते ॥

यक्षानुरूपो बलिः इति न्यायेन कार्यं कीदृशम् ? द्वैतेन्द्रजालं कार्यं इत्युक्तम् । इन्द्रजालस्य अधिष्ठानमेकमेव उपादानकारणं निमित्तकारणं च अस्य द्वैतेन्द्रजालस्य अज्ञातात्मैवाधिष्ठानम् । अथवा आत्माज्ञानं तदेव सर्वविधकारणमित्यर्थः । उपादानकारणं च इत्यर्थः । अनुवृत्तिरपि सद्रूपेण आत्मन एव वर्तते सन् घटः सन् पटः इति ; न तु मूलाविद्यायाः जडभूतायाः । अतः अध्यासस्य उपादानकारणं तत्त्वाग्रहणमेव न मूलाविद्या इति सिद्धम् । मूलाविद्या जडभूतकार्यानुगता इत्युक्तिरेवानुभवविरुद्धा असंबद्धा च ॥

ये तु जगतः ऐन्द्रजालिकत्वं अजानन्तः वस्तुत्वमेव जानन्ति तेषां मूढानां समाधानार्थं अध्यासरूपाविद्याकल्पितमायां उपादानकारणत्वेन वदन्ति । यदा अध्यासरूपाविद्याकल्पितमायां तत्कार्यभूतं जगच्च अविद्यमाने इति विजानन्ति, तदा जगतः कार्यत्वं मायायाः कारणत्वं च अपगच्छति । तस्मान्मूलकारणीभूताविद्यायां बीजोपादानहेत्वादिशब्दाः निमित्तमात्रे प्रयुक्ता इति निरसनकाराभिप्रायो समीचीन एव । संमतवादिभिर्भाष्यवार्तिकाभिप्राय एव सर्वथाऽज्ञातः । अध्यासोपादानभूता मूलाविद्याख्या जडशक्तिरङ्गीकृता चेत्, श्रीमद्रामानुजाचार्यैरङ्गीकृता ईश्वराधीना सूक्ष्मा चिच्छब्दवाच्या

यथा ज्ञानाबाध्या तथा इयमपि मायाख्या जडशक्तिर्ज्ञानाबाध्यभूता अद्वैतहानिकरा भवत्येव । तस्मान्मूलाविद्याङ्गीकरणमेव भाष्यवार्तिकविरुद्धमित्यवगन्तव्यम् । पञ्चपादिकाकारैरनुक्तमपि विचारदक्षैर्विवरणाचार्यैः मूलाविद्याया ज्ञानबाध्यत्वप्राप्त्यर्थं मिथ्याज्ञानकल्पितत्वमङ्गीकृतम्, तावन्मात्रेणैव मूलाविद्यावादो मृतप्राय एव । किमर्थं संमतवादिनां तस्या रक्षणार्थं एतावान् प्रयासः इति तु आश्चर्यकरम् । अध्यासस्य कार्यत्वं वर्षशतेनापि प्रदर्शयितुम् अशक्यमिति विदितमेव ॥

एतन्निदानमित्यत्रापि तत्त्वाग्रहणमेव निदानं मिथ्याज्ञानस्य इति समीचीनोऽर्थः । एतच्छब्देन अप्रसक्ताया मूलाविद्याया ग्रहणं अन्याय्यम् । प्रसक्तस्य अज्ञानस्यैव ग्रहणं न्याय्यम् ॥

(३५) **संमतवादिनः** – अत्र किल श्रुतिगीतोदाहरणेन मायाशब्दार्थः प्रागुक्ता अनाद्यविद्यैव, यदि माया अविद्यातो भिन्ना स्वोक्ताविद्याया इदमुदाहरणम् अपार्थकं असमञ्जसं भवेत् । अध्यासरूपाविद्यायास्तु मायातः भेदोऽस्त्येव एतेन मूलाविद्या त्रिगुणात्मिका माया अनादिभूता ईश्वराश्रिता सैव मूलाविद्येति निर्णयः ॥

**स्वाशयः** – अध्यासरूपाविद्योपादानकारणभूतायाः जडभूतायाः त्रिगुणात्मिकमायायाः अनादिभूताया अस्तित्वप्रतिपादिका श्रुतिः न प्रदर्शिता । 'मायां तु प्रकृतिं विद्यात्' इत्यस्य प्रकृतिः, माया अविद्यमाना विद्यमानेवावभासमाना इत्यर्थौ वर्णित एव । गीतावाक्ये 'अविद्याकल्पिता त्रिगुणात्मिका माया' इत्यर्थः, प्रदर्शितः । तस्मादत्र गगनकुसुमप्रायमूलाविद्याप्रसक्तिरेव नास्तीति ज्ञेयम् । अविद्या अध्यासरूपैव तदतिरिक्तजडशक्तेरविद्यात्वं एतावत्पर्यन्तं न प्रदर्शितम् ; प्रदर्शयितुमप्यशक्यम् । अस्माभिस्तु अध्यासरूपाविद्याकल्पितजडशक्तेः मायाशब्दवाच्यत्वं प्रदर्शितम् । संमतवादिभिरेव अध्यासस्य मायातःभेदो अङ्गीकृतः ; माया तु जडशक्तिः अध्यासस्तु मिथ्याज्ञानरूपः । तयोर्भेदो सर्वैरपि अनुभूयत एव ॥

(३६) **संमतवादिनः** – इयमेव अविद्या मिथ्याज्ञानाभिधाध्यासस्यापि निदानमिति तत्रैवोक्तम् ॥

**स्वाशयः** – एतच्छब्देन पूर्वोक्तनत्त्वाग्रहणमेव प्रकृतत्वात्परामृष्टम् । न तद्व्यतिरिक्ता मूलाविद्या ।

(३७) **संमतवादिनः** – न केवलं वार्तिके, गीताभाष्येऽपि मूलाविद्यायाः अध्यासादिसकलान्तःकरणवृत्तिमात्रं प्रति निरुक्तोपादानत्वं कण्ठश एवोक्तम् ॥

**स्वाशयः** – अध्यासस्वरूपानभिज्ञातॄणामेतद्वचनम् । अध्यासम् अननुभूय अन्तःकरणवृत्तिः संभवति किम् ? अध्यासानुभवानन्तरम् अहमित्यादिव्यवहारः कार्यकारणव्यवहारश्च । अतः गीताभाष्योक्तमायाप्रकृत्यादीनां अध्यासकल्पितत्त्वं स्वतःसिद्धम् । प्रकृतिशब्दमात्रेण मायाशब्दमात्रेण यदि मूलाविद्या सिध्येत तर्हि अभिलषितं किं किं न सिध्येत् ? मायाप्रकृत्यादयः अविद्याकल्पिताः इति भाष्यकारैरेवोक्तम् । तस्मान्मूलाविद्या नात्रोक्तेति ज्ञेयम् ॥

(३८) **संमतवादिनः** – 'अहङ्कारो ........ मूलभूतपराप्रकृतेः खलु सर्वे विकाराः तदौचित्यायातं अध्यासस्य अनाद्यनिर्वचनीयाविद्योपादानकत्वम् ।'

**स्वाशयः** – गीतायां तत्रैव 'यावत्संजायते किञ्चित्सत्त्वं स्थावरजङ्गमम् । क्षेत्रक्षेत्रज्ञसंयोगात् तद्विद्धि भरतर्षभ ॥' (१३–२६).

भाष्ये – 'क्षेत्रक्षेत्रज्ञयोः विषयविषयिणोः भिन्नस्वभावयोः इतरेतरतद्धर्माध्यासलक्षणः संयोगः क्षेत्रक्षेत्रज्ञस्वरूपविवेकाभावनिबन्धनः रज्जुशुक्तिकादीनां तद्विवेकज्ञानाभावात् अध्यारोपितसर्परजतादिसंयोगवत् । सः अयं अध्यासस्वरूपः क्षेत्रक्षेत्रज्ञयोः संयोगः मिथ्याज्ञानरूपः क्षेत्रक्षेत्रज्ञस्वरूपविवेकाभावनिबन्धनः ........ क्षेत्रं च मायानिर्मितहस्तिहर्म्यादिवत् स्वप्नदृष्टवस्तुवत्, गन्धर्वनगरादिवच्च असदेव सदिव अवभासते । ........' इत्यादि ।

अत्र सर्वस्यापि जगतः अध्यासकार्यत्वं प्रतिपादितं स्मर्तव्यम् । क्षेत्रान्तःपाति यत्किञ्चित् मूलाविद्याद्यभ्यूहितं च अध्यासकार्यमेवेति स्पष्टमुक्तमनुसन्धेयम् । मूलभूता परा प्रकृतिः तत्त्वज्ञानाभावरूपानाद्यध्यासकारणीभूता माया ॥

(३९) **संमतवादिनः** – कार्यभूतसर्वप्रपञ्चस्यापि ईश्वराधीनायाः मायायाः प्रकृतित्वे श्रुतिसूत्रगीतादिसंमतेः प्रपञ्चान्तर्गतं कार्यभूताध्यासं प्रत्यपि प्रकृतित्वं औचित्यादायातं अकामेनेष्टव्यमेव नान्तरीयकतया इत्यलं विस्तरेण ॥

**स्वाशयः** – इदानीमेव अध्यासादेव सकलजगज्जायते इति भाष्यवचनमुदाहृतम् । अध्यासस्वरूपमजानतां वचनं अध्यासः कार्यभूतः इति । अध्यासात्पूर्वं कालो वा देशो वा कारणो वा नास्तीति अनुभवसिद्धम् । कालाद्यभावे 'अध्यासः कार्यभूतः' इति वक्तुं नैव शक्यम् । तस्मादध्यासः न कार्यभूतः नैसर्गिकः, सर्वानुभवसिद्धः ; अत एव भाष्यकारैः 'एवं अयं अनादिः अनन्तः नैसर्गिकः अध्यासः' इति अध्यासस्य अनादित्वं नैसर्गिकत्वं स्पष्टमुक्तम् । अध्यासस्य अनादित्वं सर्वानुभवसिद्धम् । यत् किमपि द्रष्टुं श्रोतुं मन्तुं ज्ञातुं प्रथमतः अध्यासः अपेक्षितः । अध्यासं विना न कोऽपि यत्किञ्चित् पश्यति, शृणोति, मनुते, विजानाति वा । तस्मादध्यासस्य कार्यत्वम् अनिर्वचनीयमूलाविद्याजन्यत्वं च वदतां वचनं निर्मूलम्, असम्भवं भाष्यवाक्यविरुद्धं अनुभवविरुद्धं वार्तिकविरुद्धं च । ईश्वराधीना माया जगत्कारणत्वेन अध्यासकारणत्वेन नाङ्गीकृता, अध्यासकल्पिता मायाङ्गीकृता ॥

(४०) **संमतवादिनः** – एवं निमित्तोपादानोभयतया स्वीकृता, या आत्माविद्या सैव मूलाविद्या आत्माश्रया आत्मविषया चेति ॥

**स्वाशयः** – अज्ञातात्मा जगतः कारणं न गुणत्रयम् इति वार्तिककारैरेव गुणत्रयस्य कारणत्वं निषिद्धम् । आत्माविद्या आत्मनः अग्रहणम् अज्ञातात्मा इमानि समानार्थकानि वार्तिककारैरेवोपयुक्तानि । एवं निमित्तो-

पादानोभयतया स्वीकृता आत्माविद्या अज्ञातात्मस्वरूपैव । सैव मूलाविद्या इति उक्तिः प्रतिज्ञामात्रैव । मूलाविद्या पूर्वमेव निराकृता ; इदानीं कथं आगच्छेत् ? 'आत्मा तु अविषयः' इति अध्यासभाष्ये एव उक्तम् 'कथं पुनः प्रत्यगात्मनि अविषये' ........ इत्यादिना । अत्र तु अज्ञानस्य विषयत्वम्, न केवलं विषयत्वम् असङ्गस्यात्मनः अज्ञानाश्रयत्वं च ब्रुवतां शक्तिः अन्यादृशैव ; आत्मा न ज्ञातः इति अज्ञातात्मा उच्यते । 'परोऽविवेको भूतानामात्माविद्येति कथ्यते' इति वार्तिककारैरेव अविवेकस्य आत्माविद्यात्वमुक्तं स्मर्तव्यम् ॥

(४१) **संमतवादिनः** – प्रमात्राद्युत्थितेः पूर्वं चिदन्यानन्वयात्तमो विशेषणा चिदेवैका स्वानुभूत्यैव गम्यते । 'आसीदिदं तमोभूतमप्रज्ञातम-लक्षणम् । अप्रतर्क्यमविज्ञेयमित्येतत् स्वानुभूतितः । असाधारणमज्ञानं प्रतीच्येव यतः स्थितम्' इति । ........ सिध्यादौ सुव्यक्तं मूलाविद्यायाः तमश्शब्देन वाच्यत्वम् ॥

**स्वाशयः** – अत्र अग्रहणान्यथाग्रहणवाची तमश्शब्दः भाष्य-कारैरेव ईशावास्यभाष्ये (१-३) 'अन्धेन अदर्शनात्मकेन अज्ञानेन तमसा' इति अदर्शनात्मकाज्ञानार्थे प्रयुक्तः ॥

गीताभाष्ये (१०-११) 'अहमज्ञानजं तमः । नाशयामि' इत्यत्र अज्ञानजं अविवेकतः जातं मिथ्याप्रत्ययलक्षणं मोहान्धकारं तमः नाशयामि– इति तमश्शब्दः मिथ्याज्ञानार्थकत्वेन प्रयुक्तः । अग्रहणं संशयग्रहणं मिथ्या-ग्रहणमिति सर्वाण्यपि अन्तःकरणवृत्तय एव, एताः वृत्तयः जाग्रत्स्वप्नकालयोः संशयग्रहण-अन्यथाग्रहणरूपेण वर्तन्ते । सुषुप्तौ तु सर्वं ग्रहणाभाव-रूपेण वर्तते । अन्यशब्देन अज्ञातात्मरूपेण वर्तते इत्यर्थः । 'अन्यथागृह्णतः स्वप्नः निद्रा तत्त्वमजानतः ।' (मां. का. १-१५). भाष्ये-तृतीयें स्थाने तत्त्वाग्रहणलक्षणा निद्रैव केवलं विपर्यासः । तिस्रः वृत्तयोऽपि विपर्यासाः । अन्यतः अज्ञातात्मरूपमेव सुप्तिः । तमोविशेषणा चिदेवैका इत्यस्य अज्ञातात्मै-कत्वार्थः । तमश्शब्दः तत्त्वाग्रहणवाची ॥

छान्दोग्ये (६-८-१) सुषुप्ते एव स्वं देवतारूपं जीवत्वविनिर्मुक्तं दर्शयिष्यामीत्याह । जीवत्वविनिर्मुक्तदेवतास्वरूपे मूलाविद्याया अवकाशो सर्वथा नास्ति । (छां. ६-९-२) 'इमाः सर्वाः प्रजाः सति संपद्य न विदुः सति संपद्यामहे' इति । अतः यद्यद्भवन्ति तदा भवन्ति ॥

भाष्ये-'यस्माच्चैवं आत्मनः सद्रूपतां अज्ञात्वैव सत्संपद्यन्ते । अतः ........ यद्यत्पूर्वं इह लोके अभूवन् तदेव पुनरागत्य भवन्ति सति संपद्य- इति श्रुतिर्वदति । भाष्यकारा अपि अज्ञात्वा सत्संपद्यन्ते इति वदन्ति । तद्विरुद्धतया जडशक्तिर्विद्यते इति ब्रुवतां शक्तिरन्यादृशैव; असंभवा श्रुति-विरुद्धा भाष्यविरुद्धा च ॥

सुषुप्तौ सत्संपत्तिरस्ति, किन्तु ते न जानन्ति । अग्रहणरूपाज्ञान-पूर्वकत्वात् सुषुप्तिप्रवेशस्य । ब्रह्मणि प्रवेशस्तु सर्वथा अस्त्येव इति सुषुप्तिं अधिकृत्य बृहदारण्यकश्रुतिः वदति 'तद्वा .... शोकान्तरम् .... अयं पुरुषः प्राज्ञेनात्मना संपरिष्वक्तः न बाह्यं किञ्चन वेद नान्तरम्' (४-३-२१) इति ॥

भाष्ये-'यत्र अविद्याकामकर्माणि न सन्ति....स प्रत्यक्षतो निर्दिश्यते अयं पुरुषः प्राज्ञेन परमार्थेन स्वाभाविकेन स्वेन आत्मना परेण ज्योतिषा संपरिष्वक्तः सम्यक्परिष्वक्तः एकीभूतः निरन्तरः सर्वात्मा न बाह्यं किञ्चन वस्त्वन्तरं नाप्यान्तरं आत्मनि, अयमहमस्मि सुखी दुःखी वा इति वेद । तत्र चैतन्यज्योतिःस्वभावत्वे कस्माद् न जानातीति यदप्राक्षीः तत्रायं हेतुर्मयोक्तः एकत्वात्' - इत्यादिः । अयं पुरुषः सुषुप्तिकाले प्राज्ञेनात्मना एकत्वं अनुभवति ॥

बृह. ४-३-३४. भाष्ये 'एवं अविद्याकामकर्मादिसर्वसंसारधर्मातीतं रूपमस्य साक्षात्सुषुप्ते गृह्यते इत्येतद्विज्ञापितं स्वयंज्योतिरात्मा, एषोऽस्य परमानन्दः' इति । अत्रापि सुषुप्तात्मनः अविद्यासंबन्धवर्जितस्वरूपत्वं प्रदर्शितम् ॥

बृह. ४-४-६. 'यो हि सुषुप्तावस्थमिव निर्विशेषं अद्वैतं अलुप्तज्योतिस्स्वभावं आत्मानं पश्यति स ब्रह्मैव सन् ब्रह्माप्येति।'

अत्रापि सुषुप्तौ अद्वैतं निर्विशेषं स्वयंज्योतिःस्वभावं आत्मानं अनुभवतीति दृष्टान्तत्वेन प्रतिपादितम् ॥

'य एषः अन्तर्हृदये आकाशे शेते' (बृह. २-१-१७)

भाष्ये – 'आकाशशब्देन पर एव आत्मा उच्यते। तस्मिन् स्वे आत्मनि आकाशे शेते स्वाभाविके असांसारिके........ लिङ्गोपाधिसंबन्धकृतं विशेषात्मस्वरूपं उत्सृज्य अविशेषे स्वाभाविके आत्मन्येव केवले वर्तते' इत्यभिप्रायः ॥

प्रश्नोपनिषदि ४-९. 'एष हि द्रष्टा स्प्रष्टा श्रोता घ्राता रसयिता मन्ता बोद्धा कर्ता विज्ञानात्मा पुरुषः सः परे अक्षरे आत्मनि संप्रतिष्ठते' ॥

भाष्ये – 'एष हि द्रष्टा ........ विज्ञानात्मा विज्ञातृस्वभावः पुरुषः जलसूर्यकादिप्रतिबिम्बस्य सूर्यादिप्रवेशवत् जलाद्याधारशोषे परे अक्षरे आत्मनि संप्रतिष्ठते' इति जीवस्य परमात्मनि संप्रतिष्ठितत्वं प्रतिपादितम् ॥

सूत्रभाष्ये १-१-९ 'स्वाप्ययात्' ॥

भाष्ये 'स्वम् अपीतो भवति; अपिगतो भवति इत्यर्थः। स जीवः उपाधिद्वयोपरमे सुषुप्तावस्थायां उपाधिकृतविशेषाभावात् स्वात्मनि प्रलीन इवेति स्वं ह्यपीतो भवति इत्युच्यते। स्वरूपस्य अनपायित्वात् उपाधिकृतविशेषाविशेषाभ्यामेव स्वात्मप्रच्युतिः स्वात्मप्रलयश्च उच्येते, न स्वत एव। स्वतस्तु सर्वदा शुद्धात्मा एव। तस्मात् सुषुप्तावस्थायां जीवस्य चेतने ऽप्ययं दर्शयति' इति ॥

'यथा च तक्षोभयथा' (सू. २-३-४०).

भाष्ये – 'अविद्याप्रत्युपस्थापितद्वैतसंपृक्तः आत्मा स्वप्नजागरितावस्थयोः कर्ता दुःखी भवति। स तच्छ्रमापनुत्तये स्वं आत्मानं परं ब्रह्म प्रविश्य विमुक्तकार्यकरणसंघातः अकर्ता सुखी भवति। संप्रसादावस्थायां

.... इति । अत्रापि सुषुप्तौ जीवः जीवत्वं विहाय परब्रह्मरूपेणावतिष्ठते, सुखी भवतीत्युक्तम् ॥

सू. भा. ३-२-७. भाष्ये 'स्वमपीतो भवति - इति स्वशब्देन आत्मा अभिलप्यते । स्वरूपं आपन्नः सुप्तो भवति ' इति । अत्रापि स्वरूपापत्तिः उक्ता सुषुप्तौ ॥

सू.भा. ३-२-७. उपाधेरुपशान्तत्वात् सत्येव संपन्नः न विजानाति इत्युक्तम् । अत्रापि स्वरूपापत्तिः उपाधेरुपशान्तिश्च उक्ता सुषुप्तौ ॥

सू. भा. ३-२-७. 'ब्रह्म तु अनपायि सुप्तिस्थानमित्येतत्प्रतिपादयामः' । अत्रापि ब्रह्मप्राप्तिरुक्ता सुषुप्तौ ॥

सू.भा. ३-२-७. 'विशेषविज्ञानोपरमलक्षणं सुषुप्तं न विशिष्यते।' अत्रापि विशेषविज्ञानोपरम एव सुषुप्तिलक्षणम् उक्तम् । इममेव आश्रित्य निरासकारैः सुषुप्ते विशेषविज्ञानाभाव एव न किञ्चिदवेदिषमिति परामर्शविषयः इत्युक्तम् । संमतवादिनस्तु - अयं तु दुराग्रहः निरासकाराणामिति वर्णयामासुः । एतत्सुधीभिरेव विमर्शनीयम् । सुषुप्तौ विशेषविज्ञानोपरमस्य कारणं ज्ञानसाधनाभावात् वा विज्ञेयाभावाद्वा विज्ञात्रभावाद्वा इत्युक्त्वा - आत्मनः साधनापेक्षा नास्ति, स्वतः ज्ञानस्वरूपत्वात् ; साधनापेक्षायाम् इदं साधनमिति ज्ञातुं साधनान्तरापेक्षेति अनवस्था प्रसज्यते । तस्मादात्मैव जानातीति वक्तव्यम् । आत्मा तु ज्ञानस्वरूपत्वाद्यदि द्वितीयं स्यात् जानात्येव । किं तु द्वितीयाभावादेव तत्र विशेषविज्ञानाभावः । तथा चोक्तम्-'यद्वै तन्न पश्यति पश्यन् वै तन्न पश्यति, न हि द्रष्टुर्दृष्टेर्विपरिलोपो विद्यते अविनाशित्वात् न तु तद् द्वितीयमस्ति ....विभक्तं यत् पश्येत्' (बृ.४-३-२३) इति ॥

आत्मा तु ज्ञानस्वरूप एव ; तस्य स्वरूपस्य नाशो नास्ति। द्वितीयस्य अभावात् न पश्यति सुषुप्ते इत्युक्तम् । तत्र यदि मूलाविद्या स्यात् सर्वैरपि अत्र मूलाविद्या वर्तते इति अनुभूयेत, नानुभूयते । अतः द्वितीयायाः मूलाविद्यायाः अभाव एव सुषुप्ते इत्यकामेनाप्यभ्युपगन्तव्यम् । तत्र यद्यस्फुटा स्यान्मूलाविद्या अस्फुटा वर्तते इति ज्ञानं स्यात्, नास्ति तादृशं ज्ञानम् ॥

'सुषुप्तस्थान एकीभूतः प्रज्ञान घन एव' (मां. उ. १-५).

भाष्ये 'एवशब्दात् न जात्यन्तरं प्रज्ञानव्यतिरेकेण अस्तीत्यर्थः। मूलाविद्या स्फुटा वा अस्फुटा वा यदि तत्र स्यात्, किमपि जात्यन्तरं नास्तीति नोच्येत, नास्तीत्युक्तम्। तस्मान्मूलाविद्या सुषुप्तौ सर्वथा नास्तीति ज्ञेयम्। तत्त्वाग्रहणमित्यस्य अपरश्शब्दः अज्ञातात्मा इति। एताश्श्रुतयः भाष्यकाराश्च सुषुप्तौ चराचरात्मकजगतः आत्मन्येकत्वं प्रतिपादयन्ति, तथापि संमतवादिनः तत्रैव अस्फुटमूलाविद्यास्तित्वं साधयितुं साहसं कुर्वन्ति, 'न तु तद्द्वितीयमस्ति' इत्यस्य 'द्वितीयमस्ति' इति व्याख्यानं सर्वथा असमञ्जसम्॥

(४२) **संमतवादिनः** – एवं गीतादिप्रमाणैः प्रत्यक्चैतन्यावरणकारणत्वेन दर्शितायाः मायाप्रकृत्यादिसंज्ञिताया मूलाविद्याया अहंममाध्यासरूपाविद्यानिदानत्वमपि अहमित्यध्यासकाले एव कल्पितं मूलाविद्यावादिभिरपि॥

**स्वाशयः** – अध्यासस्य तत्त्वाग्रहणमेव प्रतिपत्तिक्रमेण निदानमिति। भाष्यकारैरेव 'इतरेतराविवेकेनाध्यस्य' इति उक्तत्वात्। मूलाविद्या नैव साधिता; किं च अध्यासस्यानादित्वात्तस्य निदानं असंभवमेव॥

(४३) **संमतवादिनः** – मृद्घटयोरिव .... मूलाज्ञानमिथ्याज्ञानयोरव्यतिरेकात् .... सुषुप्तौ बीजरूपेण आसीदियमविद्या इत्युक्तिरपि जागरे एव खलु .... इत्यादि॥

**स्वाशयः** – अनादेरध्यासस्य कार्यत्वप्रदर्शनानन्तरं मूलाज्ञानसिद्ध्यनन्तरं च अनादिमिथ्याज्ञानरूपाध्यासं प्रति तस्य उपादानकारणत्वं मृद्घटयोरिव अव्यतिरिक्तत्वं च वक्तव्यम्। सर्वमिदमभित्तिचित्रम्। 'अध्यासः अनादिः' इति प्रतिपादितं भाष्यकारैरेव, तथा सर्वैरेवानुभूयते। तस्मात्तस्य उपादानकारणमिति वचनं निराधारवचनं असंभववचनम्। तस्य कारणीभूता मूलाविद्या इति वचनं तु संमतकाराणाम् अभ्यूहमात्रमिति विमर्शकैः ज्ञेयम्॥

संमतकाराः अग्रहणादित्रयस्य .... तन्मूलभूतायाः पूर्वसिद्धायाः अविद्याशक्तेः स्वकार्यभूतान्तःकरणस्याश्रयत्वानुपपत्तेः .... इत्यादिवचनं

स्वाभ्यूहमात्रम् ; अविद्याशक्तिर्नैव साधिता । तस्या जगत्कारणत्वमपि नैव साधितम् । अध्यासस्तु न कार्यम् । तस्य उपादानकारणान्वेषणम् असंभवम् । स तु अनादिः इत्यादि पूर्वमेव प्रतिपादितम् । अतः अत्र मूलाविद्याप्रवेशः भिक्षुकस्वप्नवदेवेति प्रतिपत्तव्यम् । अध्यासस्याश्रयम् अन्तःकरणमेव । अध्यासस्तु अनादिः, तस्य कारणत्वेन मूलाविद्याशक्तिः कुत्रापि नास्तीति प्रतिपादितम् ॥

(४४) **संमतवादिनः** – नैष्कर्म्यसिद्धावपि, इह च पदार्थद्वयमित्यारभ्य अनात्मनश्च अज्ञानप्रसूतत्वात् । न हि पूर्वसिद्धं सत् ततो लब्धात्मकस्य सेत्स्यतः .... न अनात्मनो अज्ञानित्वम्, नापि तद्विषयमज्ञानम्, पारिशेष्यात् आत्मन एवाज्ञानम् अस्तु । तस्य अज्ञोऽस्मीत्यनुभवदर्शनात् .... अतो 'आश्रयत्वविषयत्वभागिनी निर्विभागचितिरेव केवला । पूर्वसिद्धतमसो हि पश्चिमो नाश्रयो भवति नापि गोचरः'–इति संक्षेपशारीरकवचनस्य मूलाविद्याविषयाश्रयवर्णनपरस्यापि । अतो विवरणादिमतं सर्वं साधु, भाष्वार्तिकानुगुणं च । ........ ॥

**स्वाशयः** – 'नाहमात्मवित्' इति वचनं जीववचनम् । मम आत्मज्ञानं नास्तीत्यर्थः । तमश्शब्दः तत्त्वज्ञानाभावरूपाविद्यार्थकः, न मूलाविद्यार्थकः । अत्र प्रत्यगात्मनः विचार एव नास्ति । प्रत्यगात्मा नाहं आत्मवित् इति वदति किम् ? एतद्वाक्यं आश्रित्य प्रत्यगात्मनः अप्रसक्तस्य अविद्याश्रयत्वं विषयत्वं च वदतां संमतवादिनां वचनं विमर्शनीयम् ॥

(४५) **संमतवादिनः** – गगननैल्यवत् अज्ञानतत्संबन्धादीनां वार्तिके इव विवरणेऽपि कल्पितत्वोक्तेः । तेन वस्तुतो न धर्मधर्मिभाव इति शङ्कनीयः ॥

**स्वाशयः** – एतावत्पर्यन्तं महता परिकरबन्धेन मूलाविद्यासाधने प्रवृत्तानां साहसः इदानीं तस्याः कल्पितत्वाङ्गीकारेण निरर्थकोऽभूदिति

किं वक्तव्यम् ? स्वाभ्यूहितमूलाविद्यायाः कल्पितत्वाङ्गीकारेण कल्पितस्य अविद्यमानत्वान्मूलाविद्या नास्तीति तैरेवाभ्युपगता ॥

ब्रह्मसिद्धिकारैरविद्योपादानकारणवादिनः परामृष्टाः । अविद्योपादानवादमाश्रिताः पञ्चपादिकाकाराः स्ववादं सञ्जीवयितुं भाष्यकारवचनानां कथञ्चित बहुक्लेशमनुभूय स्वाभ्यूहितार्थपरत्वेन व्याख्यानं चक्रिरे, तैर्मूलाविद्यायाः कल्पितत्वं नोक्तम् । विवरणकारास्तु बुद्धिमन्तः विवेचनपराः मूलाविद्यायाः कल्पितत्वं विना ज्ञानबाध्यत्वं नैव संभवति । ज्ञानबाध्यत्वाभावे अद्वैतं नैव संभवति, परन्तु द्वैतमेव भवति – इति मत्वा पञ्चपादिकाकारैरनुक्तमपि मूलाविद्यायाः कल्पितत्वं अनुभवानुसारेण अङ्गीचक्रुः । एतेन मूलाविद्यावादोऽदर्शनं गतः इति ज्ञेयम् । कल्पना, अध्यासः, मिथ्याज्ञानम् इति पर्यायशब्दाः । मूलाविद्यायाः कल्पितत्वाङ्गीकारेण मूलाविद्यायाः अनादित्वं गतं अध्यासोपादानकारणत्वं गतम् । अवस्थात्रयेऽपि दण्डायमानत्वं च गतम् । कल्पनासत्त्वे कल्पितं वर्तते, कल्पनाभावे कल्पितोऽपि न भवति । सुषुप्तौ कल्पनाभावस्य अनुभूतत्वात् । कल्पितायाः अपि मूलाविद्यायाः असत्त्वमेवेति अवस्थात्रयेऽपि दण्डायमानत्वं गतम् इत्यादयः स्मर्तव्याः ॥

प्रकृते अधिष्ठानब्रह्मसत्तास्फूर्तिमत्त्वेनैव तत्र आरोपितायाः अविद्याया अपि सत्तास्फूर्तिमत्त्वेन तदाश्रयत्वव्यवहारः इति संमतवादिभिरेव अविद्याया स्वतः सत्तास्फूर्तिशून्यत्वं कल्पितत्वं च अङ्गीकृते । अयं तु भगवदनुग्रह इति मन्ये ; स्वतस्सत्तास्फूर्तिमत्याः कल्पितायाः मूलाविद्यायाः स्थापने किमर्थमेतादृशायासः ? इति संमतवादिन एव प्रष्टव्याः ॥

(४६) **संमतवादिनः** – शुद्धेऽपि चैतन्ये पराङ्मुखो अज्ञो जन्तुः अविद्यमानमपि तदज्ञानं कल्पयतीति विवरणे इव वार्तिकेऽपि स्पष्टम् ॥

**स्वाशयः** – अज्ञः कल्पयतु, सुज्ञः मूलाविद्याव्यवहारो नास्तीति विजानातु । एतेन विवरणाचार्यैरेव मूलाविद्या नास्तीति प्रतिपादिता अभूत् ॥

(४७) **संमतवादिनः** – एषा चाविद्या प्रकृतिमायादिशब्दवाच्या नित्या अनादिः यावन्मोक्षं यावद्विद्योदयं वा जागरादिसर्वकालानुवर्तिनी दण्डायमाना वर्तते, स्वजन्यकालादिसंबन्धरहितत्वात् इत्युक्तं वार्तिके ॥

**स्वाशयः** – वार्तिकोक्तं अज्ञानमग्रहणरूपमिति पूर्वमेवोक्तम् । अविद्याशब्दवाच्या प्रकृतिरिति मायेति वा नोक्ता । अविद्याकल्पिता प्रकृतिः नाविद्यैव ; किं तु माया । अत्र मूलाविद्यायाः प्रसक्तिरेव नास्ति । सुषुप्तौ कल्पनाया अभावात् कल्पिताया मूलाविद्याया अभाव एव सिद्धः कुतः दण्डायमानत्वम् ?

(४८) **संमतवादिनः** – 'प्रकृतिं पुरुषं चैव विद्ध्यनादी उभावपि' इति उपदिशति भगवान् ॥

**स्वाशयः** – अत्रापि अनादित्वेन कल्पितां प्रकृतिम्–इत्यर्थः । अस्याः प्रकृतेः अविद्यात्मकत्वं सप्तमे अध्याये (७-४) 'अहङ्कार इति अविद्यासंयुक्तम् अव्यक्तम्' इत्युक्तत्वात् । 'अविद्यालक्षणा प्रकृतिः' (१३-२१) इत्यादिस्थलेषु प्रकृतेः अविद्याकल्पितत्वमुक्तं स्मर्तव्यम् ॥

बृह. सं. वार्तिके उक्ता अविद्या न मूलाविद्या; किन्तु अग्रहणात्मिका अविद्येति पूर्वमेव स्पष्टीकृतं तत्त्वाज्ञानमेव तत्त्वज्ञानेन बाध्यं अनुभूतम् ; न मूलाविद्या अनुभूतचरा । अतः ज्ञानात् तत्त्वपक्षपातिप्रमाज्ञानात् अनादित्वेन कल्पिताया अविद्याया निवृत्तिरिति भावः । अयमेव मुख्यः परिहारः इति संमतवादिभिरेव उक्तम् । तस्मान्मूलाविद्यायाः प्रसक्तिरेव नास्ति । एवं अनादितया कल्पितस्य भेदषट्कस्य निवृत्तिर्भागिनी, इत्यपि संमतकारैरेव अनादितया कल्पितस्य भेदषट्कस्यापि ज्ञानात् निवृत्तिरित्युक्तं ज्ञेयम् ॥

(४९) **संमतवादिनः** – सा चाविद्या एकैव । नानेति तु कार्यभेदेन इत्यादि ॥

**स्वाशयः** – सा अविद्या इत्यत्र अविद्या का ? मूलाविद्याप्रसक्तिरेव नास्तीत्युक्तम् । अविद्येति मूलाविद्या पूर्वं स्थापिता इति भ्रान्त्या सा अविद्या एकैव इत्युक्तम्, न तु सा स्थापिता ॥

(५०) संमतवादिनः – एवं अनाद्यविद्यायाः वस्तुतो मिथ्या भूताया अपि अधिष्ठानसद्रूपचिदात्मनि कल्पिततया सदात्मनैव सत्यत्वम् । रज्जुसर्पस्येव रज्ज्वात्मना । एतदेव सिद्धान्ते सद्रूपत्वं भावत्वमुक्तं नान्यत् ॥

स्वाशयः – अत्रापि मूलाविद्यायाः कल्पितत्वं अङ्गीकृत्य अधिष्ठानभूतसद्रूपेण भावत्वं सत्यत्वं च वदतां संमतवादिनां अभिप्रायेण मूलाविद्यायाः स्वतः भावरूपत्वं सत्यत्वं वा नास्तीति तैरेवाङ्गीकृतम् । एतादृशकल्पितमूलाविद्यायाः स्थापनाय किमर्थं महान् क्लेशः स्वीकृतः इत्येतदाश्चर्यकरम् ॥

(५१) संमतवादिनः – इयमविद्या अग्रहण-विपरीतग्रहण-संशयग्रहणेभ्यो भिन्ना । गीताभाष्ये वार्तिके च उक्तमविद्यात्रयं केवलमन्तःकरणवृत्तिरूपम् ; तदपि तमोविकाररूपमिति 'तामसो हि प्रत्ययः आवरणात्मकत्वादविद्या' इति भाष्यत एव स्पष्टम् । अन्तःकरणस्यापि प्रकृतिभूता मूलाविद्या सा खलु गीतायां अपरा शक्तिः त्रिगुणात्मिकेति सप्तमे 'अपरेयमितस्त्वन्या' इति दर्शिता । शक्तिभूताया स्वतोऽप्रत्यक्षत्वात् आवरणकृत्यादिकार्यानुमेयत्वाच्च चतुर्थाविद्यात्वेन तस्याः भाष्ये अपरिगणनम् । तावता भाष्यासंमतेति निरासकृतामाक्षेपो निर्मूलः । .... यत्सत्त्वे यत्सत्वं यदभावे यदभावः इति क्षेमसाधारणकारणत्वस्यैव मूलाविद्याया स्वीकृतत्वात्, न तु कार्यनियतपूर्ववृत्तित्वरूपकारणत्वाशयेन । कारणताकल्पनापि जागरेऽध्यासकाले एव ॥

स्वाशयः – एतावत्पर्यन्तं स्वाभ्यूहमात्रसिद्धा मूलाविद्यैव इयमविद्या इति वक्तुं न शक्यते, असिद्धत्वात् ; कथं सिद्धवत्कृत्य इयं अविद्या इत्युच्यते ? अन्तःकरणवृत्तिरूपाविद्याव्यतिरिक्ता काचन अविद्या नास्त्येवेत्युद्घोषितं भाष्यवार्तिककारैः । 'यदि ज्ञानाभावः, यदि संशयज्ञानम्, यदि विपरीतज्ञानं वा उच्यते अज्ञानमिति सर्वं हि तत् ज्ञानेनैव निवर्त्यते' (बृ. भा. १-४-१) इति ॥

बृ. ४-३-२०. भाष्ये – 'इदमविद्याया सतत्त्वमुक्तं भवति। सर्वात्मानं सन्तं असर्वात्मत्वेन ग्राहयति। आत्मनो अन्यद्वस्त्वन्तरम् अविद्यमानं प्रत्युपस्थापयति। आत्मानं असर्वं आपादयति' इति ॥

सूत्रभाष्ये-अध्यासभाष्ये 'तमेतमेवंलक्षणमध्यासं पण्डिता अविद्येति मन्यन्ते'। गीताभाष्ये (१३-२) 'अविद्यायाः तामसत्वात् तामसो हि प्रत्ययः आवरणात्मकत्वात् अविद्या विपरीतग्राहकः संशयोपस्थापकः अग्रहणात्मको वा' – इत्यादि ॥

तमश्शब्दस्य भाष्यकारैरेव 'तमस्त्वज्ञानजं विद्धि' इत्यत्र 'मिथ्याप्रत्ययलक्षणं मोहान्धकारं तमः' इति मिथ्याप्रत्ययार्थकत्वं प्रदर्शितम् ॥

ईशावास्यभाष्ये (१-३) 'अन्धेन अदर्शनात्मकेन तमसा अज्ञानेन' इति अन्धंतमश्शब्दस्य अदर्शनात्मकाज्ञानार्थकत्वेन प्रदर्शितम्। अतः अविद्यात्रयव्यतिरेकेण कुत्रापि भाष्यकारैरविद्यास्वरूपं न वर्णितम् ॥

किं च, गीताभाष्ये (२-२१) 'बुद्धिवृत्त्या अविवेकविज्ञानेन अविद्यया' इति अविद्याया बुद्धिवृत्तित्वमेवोक्तम् ॥

वार्तिके (७८९) –

अज्ञानमिथ्यासंशीतिव्यतिरेकेण नापरम्।
प्रत्यर्थिमेयविषये मानस्येहास्ति किञ्चन ॥

इति अग्रहणादित्रयव्यतिरिक्ता अविद्या नास्तीति स्पष्टतरमुक्तम्। अध्यासातिरिक्ताविद्यासत्त्वे तत्प्रहाणत्वं कथमिति वक्तव्यं स्यात्; नोक्तम् ॥

प्रश्नोपनिषदि (६-८) 'विद्यायाः विपरीतज्ञानात् .... मोक्षाख्यं परं पारं तारयसि' इति। अत्रापि मोक्षप्राप्तेः प्रतिबन्धिका अविद्या अध्यासरूपैवेत्युक्तम् ॥

एवं ज्ञाननाश्या अविद्या अग्रहणादिरूपैवेति सिद्धम्। भाष्यवार्तिककारैः चतुर्थी अविद्या नोक्ता ॥

(५२) **संमतवादिनः** – अविद्यात्मिका, अविद्यालक्षणा इत्यादिपदानि मायायां प्रकृतौ निदानभूतात्माविद्याऽभिन्नत्वं अविरोधेन वदन्ति ॥

**स्वाशयः** – यस्याः मायायाः अविद्या आत्मा सा अविद्यात्मिका–अविद्यैव मायास्वरूपा । अविद्याव्यतिरिक्तस्वरूपं मायाया नास्तीत्यर्थः । अतः अविद्यात्मिका इत्यस्य अविद्याकल्पिता इत्येव अर्थः । अविद्याकल्पिते नामरूपे माया इत्यभिलप्येते–इत्युक्तत्वात् । अविद्यया लक्ष्यते माया । तस्मात् सा माया अविद्यालक्षणा अविद्याकल्पितेऽत्यर्थः । अविद्याभावे अभावात्; तस्मात् अविद्या अग्रहणान्यथाग्रहणसंशयग्रहणात्मिका बुद्धिवृत्तिः । नान्या अविद्या भाष्यकारैः वार्तिककारैर्वा उक्ता इति ज्ञेयम् । माया तु अविद्याकल्पिता प्रपञ्चबीजभूता नामरूपबीजात्मिका । तयोरैक्यं सर्वथा न संभवति – इति उक्तमपि पुनस्तदेव गायन्ति ॥

(५३) **संमतवादिनः** – यत्सत्वे यत्सत्वं यदभावे यदभावः – इति क्षेमसाधारणकारणत्वस्यैव मूलाविद्यायाः स्वीकृतत्वात् ॥

**स्वाशयः** – तैत्तिरीयके ब्रह्मवल्लीभाष्ये, 'स यश्चायं पुरुषे । यश्चासावादित्ये । स एकः' इत्यत्र 'यत्सत्वे यत्सत्वम्, यदभावे यदभावः' इति न्यायेन जाग्रत्स्वप्नयोरध्यासस्य सत्त्वात्, प्रपञ्चस्य सत्त्वम्; सुषुप्तसमाहितयोरध्यासस्य असत्त्वात् द्वैतग्रहणस्याप्यसत्त्वम् इत्युक्तम् । स्वाभ्यूहितायाः मूलाविद्याया अपि द्वैतग्रहणेन गृहीतत्वात् । द्वैतस्य असत्त्वे तस्याः अप्यसत्त्वमेव प्राप्तम् । अध्यासरूपाविद्याकल्पितत्वमपि प्राप्तम् ॥

(५४) **संमतवादिनः** – ईशावास्यभाष्ये – अदर्शनात्मकेन तमसा अज्ञानेन आवृताः इति तमश्शब्देन मूलाविद्या उक्ता ॥

**स्वाशयः** – अत्रापि तमश्शब्दः 'अग्रहणरूपेण अज्ञानेन आवृताः' इति सुस्पष्टम् अग्रहणम् अभिधत्ते । अदर्शनम्, अग्रहणम्–इतीमे पदे समानार्थके । माण्डूक्यकारिकायां तत्त्वग्रहणाभाव एव बीजम्–इति स्पष्टमुक्तम् ।

कारणशरीरम् , बीजम् – इति पर्यायपदे । अग्रहणरूपेण कारणशरीरेण बद्धः इत्यर्थः ॥

ईशावास्यभाष्ये प्रकृतिः, कारणम्, अविद्या, अव्याकृताख्या इमानि पदानि कारणब्रह्मप्रतिपादकानि । कुत इति चेत्, तत्रैव संभूत्यां कार्यब्रह्मणि हिरण्यगर्भाख्ये–इत्युक्तत्वात् । तथैव असंभूत्यां कारणब्रह्मणि, अज्ञातात्मनि इत्यर्थः । अतः एकैकनिन्दया कार्यब्रह्मकारणब्रह्मणोरुपासनं विहितम् ; न तु ग्रहणाभावस्य उपासनमुक्तम् । मूलाविद्याया उपासनं तु हास्यास्पदम् । तस्माच्छक्तिद्वयविशिष्टायाः स्वाभ्यूहिताया मूलाविद्यायाः अत्र प्रसक्तिर्नास्ति । तस्याः शक्तिद्वयकथनं तु अजातपुत्रस्य कवचं कुण्डलम् इतिवत् असंभवम् ॥

(५५) **संमतवादिनः –** सूत्रभाष्ये 'तदधीनत्वादर्थवत्' इत्यत्र 'परमेश्वराधीना त्वियमस्माभिः प्रागवस्था जगतोऽभ्युपगम्यते, न स्वतन्त्रा । सा च अवश्याभ्युपगन्तव्या, अर्थवती हि सा । न हि तया विना परमेश्वरस्य स्रष्टृत्वं सिध्यति । शक्तिरहितस्य तस्य प्रवृत्त्यनुपपत्तेः । मुक्तानां च पुनरनुत्पत्तिः । विद्यया तस्याः बीजशक्तेर्दाहात् । **अविद्यात्मिका हि बीजशक्तिः** अव्यक्तशब्दनिर्देश्या परमेश्वराश्रया, मायामयी महासुप्तिः, यस्यां स्वरूपप्रबोधरहिताः शेरते संसारिणो जीवाः । तदेतदव्यक्तं क्वचिदाकाशशब्दनिर्दिष्टम् । .... अव्यक्ता हि सा माया तत्त्वान्यत्वरूपनिरूपणस्य अशक्यत्वात् । तदिदं महतः परमित्युक्तं यदा हैरण्यगर्भी बुद्धिः महान् । यदा तु जीवो महान् तदाप्यव्यक्ताधीनत्वात् जीवभावस्य महतः परमव्यक्तम् । अविद्या ह्यव्यक्तम् । अविद्यावत्त्वेनैव जीवस्य सर्वः संव्यवहारः सन्ततो वर्तते । महतः परत्वं अभेदोपचारात् तद्विकारे शरीरे परिकल्प्यते' इति । 'सूक्ष्मं तु तदर्हत्वात्' इति पूर्वसूत्रे च तत्रैव 'तद्धेदं तर्ह्यव्याकृतमासीत्' इति । इदमेव व्याकृतनामरूपविभिन्नं जगत् प्रागवस्थायां परित्यक्तनामरूपं बीजशक्त्यवस्थम् अव्यक्तशब्दयोग्यं दर्शयति इति । अत्र हि भाष्ये बृहदारण्यकभाष्ये इव अव्याकृतपदार्थः व्याकृतनामरूपात्मकजगतः प्रागवस्था अस्वतन्त्रा परमेश्वराधीना परमेश्वरस्य स्रष्टृत्वोपयोगिनी मुक्तानां ज्ञानदाह्य

बीजभूता च काचन शक्तिः **अविद्यात्मिका** परमेश्वराश्रया स्वीकृता, मायामयी महासुप्तिरिति तामभिधाय यस्यां .... जीवाः शेरते इत्यन्तेन जीवानां स्वरूपज्ञानराहित्यरूपमावरणकृत्यं अहमध्यासादिसंसारविक्षेपकृत्यं च प्रदर्श्य तस्या एव आकाश-अक्षर-मायादिशब्दैः श्रुतिषु व्यवहरणं च प्रमाणीकृतम् । प्रागुदाहृतवार्तिकैस्सह समालोचितभाष्येण अस्यापि भाष्यस्य ऐकार्थ्यस्य वक्तव्यतया अव्यक्ताव्याकृतनामरूपसतत्वं आत्माविद्या **मूलाविद्यैव** भवितुमर्हति ॥

**स्वाशयः** – अत्रोक्ताव्यक्तस्य अविद्यात्मकत्वं किमर्थं भाष्यकारैरुक्तम् इति चेत् अव्यक्तस्य ज्ञानबाध्यत्वसंपादनार्थम् ; नो चेत वस्तुनः ज्ञानबाध्यत्वासंभवात् द्वैतापत्तिर्दुर्निवारा स्यात् । तन्मा भूदिति अव्यक्तस्य अविद्यात्मकत्वमुक्तम् । अविद्यैव अस्य अव्यक्तस्य आत्मा अविद्यातिरिक्तः अव्यक्त इति कश्चन वस्तुभूतो नास्तीत्येव तदनन्यत्वन्यायेन सिध्यति । अविद्यात्मिका, अविद्याकल्पिता, अविद्यालक्षणा, अविद्याकार्या इत्येवमादीनि पर्यायपदत्वेनैव आचार्यैरुपयुक्तानि । अत एव भाष्ये (२-१-४) 'सर्वज्ञस्येश्वरस्य आत्मभूते इव अविद्याकल्पिते नामरूपे तत्त्वान्यत्वाभ्यामनिर्वचनीये संसारप्रपञ्चबीजभूते सर्वज्ञस्येश्वरस्य माया, शक्तिः, प्रकृतिरिति च श्रुतिस्मृत्योरभिलप्येते' इति स्पष्टमेव मायाया अविद्याकल्पितत्वमुक्तम् । अत्रापि अविद्यात्मिका इतिशब्देन अविद्याकल्पितत्वमेवोक्तम् । एतेनाध्यासोपादानकारणीभूतत्वेन स्वाभ्यूहिताया मूलाविद्याया अध्यासरूपाविद्याकल्पितत्वासंभवात् । मूलाविद्या अत्राप्रकृता, असंशब्दिता इति सुधीभिर्ज्ञेयम् । किञ्च भाष्ये 'अविद्याकल्पितेन नामरूपभेदेन व्यक्ताव्यक्तात्मकेन–इत्यादिना अव्यक्तस्यापि अविद्याकल्पितत्वं स्पष्टमुक्तम् । अत्र अध्यासात्मिकाविद्याकल्पितस्य अव्यक्तस्य अध्यासोपादानत्वासंभवात्, मूलाविद्या नोक्ता ॥

(५६) **संमतवादिनः** – यदा तु जीवो महानिति द्वितीयव्याख्यानतोऽपि अव्यक्तपदार्थः बीजभूता सेयमविद्या, न प्रथमव्याख्यानोक्त-

बीजशक्तितो भिन्ना। तत्रापि अविद्यात्मिकेति निरुक्तैव सा। व्याख्यानभेदश्च महत्पदस्यैव अर्थभेदतः सिद्धः। मायाविद्ययोर्यदि भेद एव, तर्हि द्वितीयव्याख्याने अविद्यारूपाव्यक्तविकारत्वं शरीरे 'तद्विकारे शरीरम्' इत्यंशेन वर्णितमसमञ्जसं स्यात्। न हि अविद्या अध्यासरूपा तत्संस्काररूपा वा शरीरपरिणामिनी भवति। मूलभूतमायाशक्तिस्तु महाभूतादिद्वारा परिणामिनी भवति– इति तु गीतादौ प्रसिद्धा॥

**स्वाशयः –** द्वितीयव्याख्याने महच्छब्दस्य जीव एव अर्थः। जीवस्य उपाधिः अध्यासरूपाविद्यैव, न तु अव्यक्तमित्येतदनुभवसिद्धम्, अत एव 'अविद्या ह्यव्यक्तम्' इत्युक्तम्। अत्र अव्यक्तपदेन अध्यासरूपाविद्यैव उक्ता नो चेत्, अविद्या अविद्या इति अनर्थकं वाक्यं भवेत्। अध्यासस्तु जीवस्य उपाधिरिति तु सर्वानुभवसिद्धम्। तदनुसारेणैव अत्र अव्यक्तशब्देन अध्यासरूपाविद्या उक्ता। जगतः अध्यासकारणत्वं स्पष्टमुक्तम् – 'यावत्सञ्जायते किञ्चित् सत्त्वं स्थावरजङ्गमम्। क्षेत्रक्षेत्रज्ञसंयोगात् तद्विद्धि भरतर्षभ' (गी. १३–२६) इति। क्षेत्रं गन्धर्वनगरादिवत् असदेव सदिवावभासते – इत्यप्युक्तम्। केवलाभासशरीरस्य जगतः उपादानकारणापेक्षा नास्ति। अथवा कल्पितवस्तुनः अधिष्ठानमेव उपादानकारणं निमित्तकारणं च। तस्मादव्यक्ताख्यमाया अविद्यापदेनोक्ता इति वक्तुम् अत्र अवकाशो नास्त्येवेति सिद्धम्। अत्रापि अव्यक्तशब्देन शक्तिरूपमायाग्रहणे द्विरुक्तिर्व्यर्थैव स्यात्। महच्छब्दस्य अर्थद्वयप्रदर्शनमपि व्यर्थं स्यात्। प्रसक्तं जीवोपाधिमध्यासं परित्यज्य अप्रसक्ताया अव्यक्ताख्याया मायायाः परिग्रहे दोष एव स्यात्॥

(५७) **संमतवादिनः –** ईश्वरसृष्टिप्रकरणे मायेति, जीवप्रकरणे तु अविद्येति भेदव्यपदेशः। ततश्च न माया-अविद्ययोर्भेदः॥

**स्वाशयः –** अविद्या माया च परस्परं भिन्ने एव। अविद्या अग्रहणमिथ्याग्रहणसंशयग्रहणरूपा जीवस्योपाधिः। माया तु अविद्याकल्पितनामरूप-

बीजभूता ईश्वरस्योपाधिः इति पूर्वमेवोक्तम् । विद्यारण्यमुनीनां वचनप्रदर्शनं प्रतिज्ञाभङ्गकरम् । पञ्चपादिकाकारादारभ्य अर्वाचीनास्सर्वे मायाविद्ययोरभेदमेव वर्णयन्ति ; तदपि विरुद्धमिति ज्ञेयम् । मायाविद्ययोरेकत्वे ईश्वरस्य उपाधिः माया जीवस्य उपाधिरविद्या इति भिन्नत्वेन प्रयोगः व्यर्थ एव स्यात् ॥

(५८) **संमतवादिनः** – इत्थं च उपर्युक्तव्याख्याद्वयाङ्गीकारेणापि न तत्त्वतो मायाऽविद्ययोर्भेदः मूलशक्तेर्जडरूपाया एकत्वात् ॥

**स्वाशयः** – जडरूपा मूलशक्तिः अविद्याकल्पिता । अविद्या तु अग्रहणादिरूपा इति तयोरत्यन्तभेदः स्पष्ट एव । कथं तयोरभेदः ? तयोर्भेद एव समीचीनः अनुभवसिद्धश्च । भाष्यकारैरेवोक्तम्–अविद्याकल्पिता माया इति ॥

(५९) **संमतवादिनः** – एतेन निरासकृतां विज्ञप्तिपुस्तकोक्तमपि निरस्तम् ॥

**स्वाशयः** – निरासकृतां विज्ञप्तिपुस्तकोक्तमेव भाष्यसंमतम् । संमतकारोक्तिः निराधारा अनुभवविरुद्धा च । अत एव अध्यासकारणीभूता निरस्ता मूलाविद्या वर्षशतेनापि प्रदर्शयितुमशक्या । अध्यासकारणीभूता मूलाविद्या इति वक्तुं पूर्वमेव अध्यासः सिद्धः । वक्ता च अध्यस्त एव । अतोऽपि अध्यासस्य कार्यत्वं वर्षशतेनापि वक्तुमशक्यम् । अध्यासस्य स्वरूपं महिमानं च ये न जानन्ति ते अद्वैतात्मग्रहणेऽनधिकृताः । अध्यासस्तु सर्वव्यवहारमूलभूतः अनुभवसिद्धः ॥

(६०) **संमतवादिनः** – निरासकारमते द्वितीयवर्णकं व्यर्थं स्यात् ॥

**स्वाशयः** – निरासकारमते एव द्वितीयवर्णकः सार्थकः । संमतकारमते उभयत्र अव्यक्ताख्यमायाया एव परिग्रहणात्, द्वितीयवर्णको व्यर्थः विरुद्धश्च इति मन्तव्यम् ॥

(६१) **संमतवादिनः** – अविद्यामायाच्छन्नः इत्यनेन अविद्यारूप मायया आवृतत्वं आत्मनः प्रदर्श्य मायायाः आवरणशक्तिमत्त्वं तत्कार्येण आत्मा न प्रकाशते इति रूपेण प्रकटितम् । .... माया ज्ञानं तद्वदिति ॥

**स्वाशयः** – अविद्यारूपमायया आवृतः इति भाष्ये नास्ति । संमतकारैरेव स्वेष्टार्थसिध्यर्थं अविद्यारूपत्वं मायाया उक्तम् । भाष्यवाक्यानुसारेण अविद्याच्छन्नः मायाच्छन्नः इति वा अविद्याकल्पितमायाच्छन्नः इति वा अर्थो ज्ञेयः । रूपशब्दः संमतवादिभिरेव प्रक्षिप्तः स्वेष्टार्थसिद्धये । भाष्यकारवार्तिककाराभिप्रायानुसारेण आत्माज्ञानं अग्रहणात्मकं आवरणं मिथ्याज्ञानं विक्षेपकरं अनर्थकरं च इति स्पष्टमुक्तम् । रज्ज्वज्ञानात् अनर्थो न जायते, सर्पज्ञानादेव अनर्थो जायते । अत एव भाष्ये अध्यासस्यैव अनर्थकरत्वमुक्तम् । अतः आवरणविक्षेपशक्तिद्वययुता मूलाविद्या भाष्यबहिर्भूता इति विचारपरैः ज्ञेयम् ॥

भगवद्गीताभाष्ये यत्र मायापदं प्रयुज्यते तत्र अविद्यात्मिका, अविद्याकल्पिता इति विशेषणं दीयते । यथा 'मम माया त्रिगुणात्मिका अविद्यालक्षणा प्रकृतिः' (९–१०) इति ॥

'प्रकृतिस्थः प्रकृतौ अविद्यालक्षणायां स्थितः' (१३–२३) । 'प्रकृतिं च यथोक्तां अविद्यालक्षणाम्' (९–८). एवं अविद्यालक्षणां प्रकृतिम् इत्येवं प्रकृतेः अविद्याकल्पितत्वमुक्तं ज्ञेयम् । योगमायासमावृतः, अविद्याकल्पितयोगमायासमावृतः इत्यर्थः । तथा च मूलाविद्यायाः अवकाशः सर्वथा नास्ति ॥

(६२) **संमतवादिनः** – अत्र च मूलभूता अविद्या माया चैक्येन व्यवहृता इति स्पष्टमेव । अविद्यामाययोरैक्यं च सिद्धम् ॥

**स्वाशयः** – अत्रापि अन्यस्थलेष्विव अविद्याकल्पिता माया इत्येव अर्थः ; तथा च अविद्यामाययोरेकत्वं नैवोक्तम् इति ज्ञेयम् । अविद्या च माया च अविद्यामाये ताभ्यामावृतः अविद्यामायावृतः इत्यनयोर्भेद एव

उक्तः। अथवा अविद्याकल्पितया मायया आवृतः इत्यर्थः। उभयोरेकार्थत्वे पदद्वयस्य प्रयोगः असंगत एव स्यात् । एकत्र मायायाः कल्पितत्वं स्पष्टमुक्तं चेत्, मायाया एकत्वात् अनुक्तस्थलेऽपि तदुक्तव्यमेव ॥

(६३) **संमतवादिनः** – अध्यासरूपाविद्यया मायायाः भेदस्तु कार्यकारणभावेन अस्त्येव । परन्तु नात्यन्तिकः ॥

**स्वाशयः** – कार्यकारणभावस्तु भाष्यकारैः कुत्रापि माया अध्यासोपादानकारणं अध्यासाख्या अविद्या मायाकार्यम् इति च न प्रयुक्तम्, प्रयोक्तुमशक्यं च ॥

अध्यासः मायाकार्यम् इति वक्तुमप्यध्यस्तपुरुष एव अधिकारी। स्वात्मनि देहाद्यध्यासं विना प्रमातृत्वमेव न संभवति। प्रमातृत्वाभावे किमपि वक्तुं न शक्यते इति तु सर्वानुभवसिद्धम् । तस्मादध्यासरूपाविद्याकल्पिता माया इति भाष्यकारैरेवोक्तं ज्ञेयम् । अविद्यारूपमायेत्यविद्यामानं वाक्यं प्रदर्श्य अविद्यामाययोरेकत्वमुक्तमिति स्वाभ्यूहमात्रं प्रदर्शितम् । रूपशब्दो नास्ति, तत्र अविद्यमानशब्दप्रयोगे किं किं न सिध्येत् ?

(६४) **संमतवादिनः** – इत्थं .... भाष्यवार्तिकसंमतेति निर्णयो भवति। अनिर्वचनीयत्वं तु तत्त्वान्यत्वाभ्यामनिर्वचनीयमिति भाष्यत एव सिद्धम् ॥

**स्वाशयः** – इत्थं भाष्यवार्तिकसंमतिर्नास्तीति प्रकाशितम्। तस्मात्तेषां निर्णयः स्वाभ्यूहमात्र एव ॥

भाष्यकारैः रज्जुसर्पः रज्जुरिति भ्रान्तिकाले वक्तुं न शक्यते, रज्जुरिति ज्ञानाभावात्। सर्प एव इति च वक्तुं न शक्यते, सर्पस्य परमार्थतः अभावात्। तस्मात्तत्त्वान्यत्वाभ्यामनिर्वचनीयमित्युक्तम्; न केवलानिर्वचनीयत्वमुक्तम् ॥

मूलाविद्याया तत्त्वान्यत्वाभ्यामनिर्वचनीयत्वं वक्तुं मूलाविद्या मिथ्याज्ञानकल्पिता इत्यकामेनापि अङ्गीकर्तव्यम्, तथा च मूलाविद्या

उपादानकारणम्, अध्यासः कार्यम् इति वक्तुं नैव शक्यते। अध्यासस्य पूर्वसिद्धत्वात्। तस्मान्मूलाविद्यावादः सर्वथा भाष्यबहिर्भूतः॥

(६५) **संमतवादिनः** – प्रकृतिमायादिपदवाच्या अविद्या अध्यासवत् संसारहेतुः। परं निदानम्। त्रिगुणात्मिका अष्टधा भिन्ना अपरा प्रकृतिः संसारहेतुत्वादिति गीताभाष्ये अहंममाध्यासस्य संसारहेतुत्वेऽपि द्वारेण द्वारिणो नान्यथा सिद्धिः इति न्यायेन मूलाविद्यायाः तद्धेतुत्वं नापैति। 'एतन्निदानमधुना मिथ्याज्ञानं तदुच्यते' इति वार्तिकेऽपि अध्यासस्य कार्यस्यापि द्वाररूपकारणत्वं अपूर्वस्येव संसारं प्रति। प्रवाहतश्च अनादित्वं तस्य; न तु प्रकृतेरिव उत्पत्तिरहितत्वमनादित्वम्। 'प्रकृतिं पुरुषं चैव विद्ध्यनादी उभावपि' इति गीतावचनमत्र प्रमाणम्॥

**स्वाशयः** – प्रकृतिमायादिपदवाच्या अविद्या न भवति। प्रकृतिमायादिपदवाच्या तु अविद्याकल्पिता नामरूपबीजभूता। अविद्या तु अग्रहण-मिथ्याग्रहणरूपा अन्तःकरणवृत्तिः तयोरैक्यं न संभवतीत्यसकृदुक्तम्। अध्यासस्य संसारहेतुत्वं अनुभवसिद्धम्। भाष्यकारैरप्युक्तम् – 'अनर्थहेतोरध्यासस्य' इति॥

गीताभाष्योक्ता त्रिगुणात्मिका अष्टधा भिन्ना अपरा प्रकृतिः अध्यासरूपाविद्याकल्पिता इति भाष्यकारैरेवोक्तम्। कल्पिता प्रकृतिः कल्पितस्य जगतः कारणम् अस्तु। अत्र मूलाविद्याप्रसक्तिर्नास्ति। 'एतन्निदानमधुना' इत्यादिना प्रतिपत्तिक्रमेण अग्रहणरूपाविद्यायाः मिथ्याग्रहणरूपाविद्यानिदानत्वमुक्तमिति पूर्वमेव प्रतिपादितं प्रकृतिः अनादित्वेन अध्यासरूपाविद्यया कल्पिता इति। भाष्ये अविद्यालक्षणा प्रकृतिः अविद्यात्मिका माया, अविद्याकल्पिता प्रकृतिरित्यसकृदुक्तत्वात्। अध्यासस्यानादित्वम् स्वभावत एव, न प्रवाहतः। अध्यासानन्तरमेव कालकारणादीनां संभवः। तस्मादध्यासस्यानादित्वम् स्वभावत एव। प्रवाहतोऽनादित्वोक्तिः भ्रान्तिरेवेति सिद्धम्। प्रकृतेरविद्याकल्पितत्वान्नानादित्वम्। तस्याः भाष्यकारैरेव

'परमेश्वरादुत्पन्ना ज्योतिःप्रमुखा तेजोबन्नलक्षणा चतुर्विधस्य भूतग्रामस्य प्रकृतिभूता इयमजा प्रतिपत्तव्या' (सू. भा. १–४–९) इति प्रकृतेः परमात्मनः जन्यत्वमुक्तम् ॥

(६६) संमतवादिनः – 'प्रलीयमानं चेदं जगत् शक्त्यवशेषमेव प्रलीयते, शक्तिमूलमेव प्रभवति – इति देवताधिकरणभाष्यतः प्रलये, स्वापे वा सर्वं जगत् प्रागुक्ताविद्याशक्तिरूपेणावतिष्ठते इति निश्चीयते। 'अविद्यैव तु नः शक्तिः सर्वशक्यस्य सर्जने' इति वार्तिके प्रागेवोदाहृतम् ॥

स्वाशयः – सू. भा. १-३-३०. अत्र शक्तिशब्दार्थः कः? यस्मादज्ञात्वा तं प्रविशन्ति ततः तत्तद्रूपेण भवन्ति – इति छान्दोग्यभाष्यानुरोधेन तत्त्वाग्रहणमेव शक्तिरित्यर्थः। तदग्रहणं आत्मैकत्वविद्याप्राप्तिपर्यन्तं न नश्यति। अतः सर्वथा मूलाविद्यायाः प्रसक्तिर्नास्ति। तदङ्गीकारे अद्वैतहानिः द्वैतापत्तिश्च दुर्निवारे; प्रलयेऽपि अग्रहणरूपशक्तेः अङ्गीकारे प्रलयस्य बाधो न भवति। शक्त्यवशिष्टत्वात्; अध्यासकल्पितमूलाविद्याङ्गीकारे च आत्यन्तिकप्रलय एव न संभवति। मूलाविद्याया बीजभूतायास्सत्त्वाङ्गीकारात्; 'अविद्यैव तु नः शक्तिः सर्वशक्यस्य सर्जने' इति ॥

वार्तिकोक्तिस्तु अग्रहणरूपाविद्यामेव बोधयति। वार्तिककारैरेव अग्रहणान्यथाग्रहणसंशयग्रहणरूपाविद्यातः अन्या अविद्या न विद्यते इति स्पष्टमुक्तं स्मर्तव्यम् ॥

(६७) संमतवादिनः – 'जन्माद्यस्य यतः', 'प्रकृतिश्च' इति सूत्रद्वयेन जगतो निमित्तमुपादानं च ब्रह्मैवेति सूत्रभाष्यकाराभ्यां निर्णीतेऽपि जगदुपादानबीजतया अविद्याङ्गीकारे को विरोधः? ब्रह्मातिरिक्तस्वतन्त्रभूत मूलाविद्यायाः स्वातन्त्र्येण उपादानत्वपक्षे केवलं साङ्ख्यमतवत् विरोधापत्तिः स्यात्। न तथोऽच्यते। 'अज्ञानं तदुपाश्रित्य ब्रह्म कारणमुच्यते' इति वार्तिकतः 'सर्वोपेता च तद्दर्शनात्' इति सूत्रतश्च अविद्याशक्तिसमाश्रयेणैव

ब्रह्मणः कारणत्वसमर्थनात् । शुद्धब्रह्मणो वा तदनाश्रिताविद्यायाः वा कारणत्वास्वीकारात् । मायायाः पृथक्कारणत्वकल्पनायाः अनङ्गीकारात् । मूलाविद्यावादेऽपि ब्रह्माश्रितमायायाः वा मायाविशिष्टं ब्रह्म वा कारणमिति तु गीतायां भाष्येऽन्यत्र च विशेषणविशेष्यभावव्यत्ययमात्रेण गुणप्रधानभावविवक्षया वा, यथा 'मयाऽध्यक्षेण प्रकृतिः सूयते सचराचरम्' इति गीताभाष्ये प्रकृतिमूलकमेव ब्रह्मणः कर्तृत्वमिति ॥

**स्वाशयः** – व्यक्ताव्यक्तात्मकं जगत् अध्यासरूपाविद्यया ब्रह्मणि परिकल्पितम् । अविद्यासत्त्वे जगतः सत्त्वं अविद्याभावे सुषुप्तिसमाध्योः जगतोऽप्यभावः । तस्मात् अध्यासेन ब्रह्मणि कल्पितं जगत् । कल्पितस्य जगतः अधिष्ठानमेव उपादानकारणं निमित्तकारणं च । 'जन्माद्यस्य यतः' इति सूत्रभाष्ये "ब्रह्म जिज्ञासितव्यमित्युक्तम् । किं लक्षणं पुनस्तद्ब्रह्म इत्यत आह भगवान् सूत्रकारः 'जन्माद्यस्य यतः' इति" । अत्र जिज्ञासितव्यं ब्रह्म निर्गुणमेव खलु । तदेव ब्रह्म जगज्जन्मादिकारणमित्युक्ते एतत्तस्य लक्षणं भवति । नो चेत् जिज्ञासितव्यशुद्धब्रह्मणो लक्षणमेव न भवति । तस्मात् शुद्धमेव ब्रह्म जगत्कारणं इत्यकामेनाप्यङ्गीकर्तव्यम् । 'प्रकृतिश्च....' इति सूत्रभाष्ये उपादानकारणं च ब्रह्म अभ्युपगन्तव्यं निमित्तिकारणं च इति भाष्यकारैः शुद्धब्रह्मण एव जगदुपादानकारणत्वं निमित्तकारणत्वं च प्रतिपादितम् । जगतः अध्यासकल्पितत्वात् शुद्धब्रह्मकारणत्वेऽपि न कोऽपि दोषः प्रसज्यते । कल्पितत्वस्य अभावात् । मूलाविद्याद्वारेण ब्रह्मकारणत्वाङ्गीकारे शुद्धब्रह्मणः कारणत्वोक्तिर्बाधिता भवति । सृष्टेः पूर्वं एकमेव अद्वितीयं ब्रह्म आसीदिति प्रतिपादिका श्रुतिश्च बाधिता भवति । 'अज्ञानं तदुपाश्रित्य' इत्यत्र अग्रहणरूपमेव अज्ञानं प्रतिपादितमिति पूर्वमेवोक्तम् । 'सर्वोपेता च तद्दर्शनात्' इति सूत्रोक्तसर्वशक्तियोगः प्रतिषिद्धसर्वविशेषस्यापि ब्रह्मणः संभवतीत्येतदपि अविद्याकल्पितरूपभेदोपन्यासेन इति 'विकरणत्वात्' इति सूत्रे भाष्यकारैरेवोक्तं स्मर्तव्यम् । 'मयाध्यक्षेण प्रकृतिः सूयते' इत्यत्रापि अध्यासकल्पिता प्रकृतिः इत्येवार्थः । तस्मान्मूलाविद्याया अवकाशो सर्वथा नास्ति इति प्रत्येतव्यम् ॥

एवमनुभवानुसारेण ब्रह्मणः उपादानकारणत्वं निमित्तकारणत्वं च प्रतिपादितम् । एतस्मिन्नर्थे अज्ञातब्रह्मैव जगत्कारणम् । एतत् ज्ञातुमशक्तानां अज्ञानां जगद् प्रमाणसिद्धमस्तीति जानतामज्ञानां प्रतिबोधनार्थम् अध्यासरूपाविद्याकल्पिता माया, शक्तिः, अक्षरम् – इत्यादिशब्दैरुच्यमाना प्रकृतिरुपादानकारणत्वेनाङ्गीकृता । सा प्रकृतिः अध्यस्तत्वात् परमार्थतः नास्त्येव । अतोऽद्वैतहानिर्न भवति ॥

संमतवादिभिः 'मूलाविद्या कल्पिता' इत्युक्त्वा कल्पनाया उपादानकारणीभूता इत्यप्युच्यते । स्वोक्तिविरोधः कथं न ज्ञायते तैः इत्येतदाश्चर्यकरम् । यदि अध्यासकल्पिता इत्यङ्गीक्रियते, तर्हि माया अक्षरं मूलाविद्या इत्यादिपदवाच्या स्यात् । तत्त्वज्ञानेन अध्यासस्य बाध्यत्वे अक्षरादिशब्दवाच्याया मूलाविद्याया अपि बाध्यत्वं भवत्येव ; अद्वैतहानिर्न भवति । किं तु अध्यासकारणीभूता इति तैरुच्यते ; इदं तु अनुभवविरुद्धम्, अद्वैतहानिकरम्, भाष्यवार्तिकविरुद्धं च ; अध्यासकारणीभूता माया इत्युक्तिरेव अध्यासपूर्विका, वक्ता च अध्यस्तः । अध्यासं विना कार्यकारणव्यवहारस्यैवासंभवः इत्यनुसन्धातव्यम् ॥

(६८) संमतवादिनः – लोके .......... मायाविद्याया अपि स्वाधिष्ठानचैतन्य एव आरोपिततया तत्सत्तयैव सत्यतया चैतन्याश्रितायाः एव चैतन्याभायाः सकलबुद्ध्यादिपरिणामो युज्यते । 'मयाऽध्यक्षेण प्रकृतिः सूयते सचराचरम्', 'मायां तु प्रकृतिं विद्यात्' इत्यादिवचनमपि तदाशयेन व्याख्यातम् । एवमङ्गीकारेण निरासकृतामाक्षेपस्य कुत्रावसरः ? यथा ह्यविद्या प्रपञ्चस्य निमित्तमुपादानं वा भवतीति नाभ्युपगम्यते, पारमार्थिकसत्ताभावात् । न हि सत्कार्यवादिनां वेदान्तिनां मते असत्कार्यस्य असत्कारणाद्वा जन्म अङ्गीक्रियते । सत एव हि मायया रूपान्तरेण विवर्तः इति स्वीकारात्– इत्याक्षेपः ( निरास १५७ ) । चैतन्यसंबन्धं विना केवलाविद्याया एव प्रकृतित्वपक्षे परं उक्ताक्षेपस्यावकाशः, न तु अधीनप्रकृतिभावाविद्यावादे । साक्षात् प्रणाल्या वा सर्वस्यापि जन्यस्य ब्रह्मवंश्यत्वस्य भाष्योक्तनया

मायाविद्याया अपि परिणामित्वं निमित्तत्वं वा स्वस्य कारणतासंपादकता योग्यतादर्शनायैव । तदर्थं स्वतः पारमार्थ्यानपेक्षणात् इति ॥

**स्वाशयः –** मूलाविद्याया अध्यासरूपाविद्याकल्पितत्वं अङ्गीकृत्यापि अध्यासोपादानकारणत्वप्रतिपादने तस्याः ज्ञानबाध्यत्वं न संगच्छते । अध्यासकल्पितायाः अध्यासोपादानत्वं नैव संभवति । अध्यासकल्पितत्वं विना ज्ञानबाध्यत्वं नैव संभवति – इत्यादयः निरासकृतामाक्षेपा सुस्थिता एव भवन्ति । अध्यासकल्पितत्वाभावे ज्ञानबाध्यत्वाभावे परमार्थभूता एव भवति । तेन अद्वैतहानिः द्वैतापत्तिश्च भवति ॥

चैतन्यस्य असङ्गिनः मूलाविद्यासंबन्धः कथं जायते ? संबन्धाङ्गीकारे चैतन्यस्यापि सावयवत्वं विकारित्वं द्रव्यत्वं च स्युः इत्यादयो दोषः संभवन्ति । 'असङ्गो ह्ययं पुरुषः' इति श्रुत्युक्तं स्मर्तुमर्हथ । संमतवादिनः एकदा मूलाविद्याया अध्यासरूपाविद्याकल्पितत्वं वदन्ति ; उत्तरक्षण एव अध्यासकारणत्वमपि वदन्ति । अयं विरोधः कथं तैर्न ज्ञात इत्येतदत्यन्ताश्चर्यभूतम् । अनादित्वमुच्यते तस्याः, पुनः ब्रह्मजन्यत्वमुच्यते । एकस्यां कथं विरुद्धधर्मसमावेशः इति विचारणीयमेवैतत् ॥

(६९) **संमतवादिनः –** एवं प्रागुक्तमायाभिधाविद्यायाः शक्तिरूपायाः केवलायाः एवं संसारकारणत्वं भाष्योक्तमपि न तथैव ग्राह्यम् । किं तु रागादिक्लेशवासनाक्षिप्तकर्मापेक्षाया एव । ....अत्र मूले अविद्याशब्दः मायाख्य मूलाविद्यापरः ........ अतो नात्र वैषम्यमिति ॥

**स्वाशयः –** अध्यासाभिधानाविद्याकल्पितमायायाः कर्मादिसंस्कारसचिवत्वमस्तु । अविद्याया ज्ञानबाध्यत्वे तत्संस्कारास्सर्वेऽपि बाध्यन्ते । इयमेवानिर्वाच्या कारणाविद्या भावरूपा देवताधिकरणानुमानिकाधिकरणयोः सुनिरूपिता । इत्येतदभित्तिचित्रमिति ज्ञेयम् । इयं कारणाविद्या तु अग्रहणरूपैव । अस्या मायया अविद्याशब्दवाच्यत्वमपि कुत्रापि नोक्तम् । अविद्याकल्पितत्वमेव सुस्पष्टम् । 'अविद्याकल्पिते नामरूपे ........ माया, अक्षरं

प्रकृतिः इत्येतैश्शब्दैरभिलप्येते ' इत्युक्तम् । अत्र अविद्याशब्दः मायाख्य-मूलाविद्यापरः इति वक्तुं अशक्यमेव ; किन्तु, तस्याः कल्पितत्वाङ्गीकारेण अविद्याभेद एव मायाया उक्तः । देवताधिकरणे ' कूटस्थनित्यः अविद्यया अनेकधा विभाव्यते यथा मायावी मायया अनेकधा विभाव्यते ' इत्युक्तम् । तत्र मूलाविद्या गन्धोऽपि नास्ति । सू. भा. १-३-१९.

आनुमानिकाधिकरणे (सू. भा. १-४-३) ' अविद्यात्मिका हि बीजशक्तिः ' इत्यनेन अविद्याकल्पिता बीजशक्तिरित्युक्तत्वात् अविद्याया मायात्वं नैवोक्तम् ॥

(७०) **संमतवादिनः** – सेयमविद्या साक्षिसिद्धा जीवानां 'न वेद्मि' 'न जानामि ' इति जागरादौ स्फुटप्रत्यक्षा । व्यञ्जकस्य अन्तःकरणस्य सद्भावात् ; सुषुप्तौ विद्यमानाऽपि उक्तव्यञ्जकाभावात् केवलमस्फुटा साक्षि भास्या च । नावेदिषं किञ्चिदिति सुप्तोत्थितस्य तद्विषयप्रत्यभिज्ञानात् । सापि स्वरूपतः साक्षिभास्या । सा अभावरूपा वा तद्विलक्षणा वेति तु प्रमाणतो निर्णेया । साक्षिभास्ये तत्सिद्धाविद्याविषये प्रमाणानां नैरर्थक्ये विरोधे च सत्यपि तदुपन्यासस्तु पञ्चपाद्यादौ अभाववैलक्षण्यसाधनाय । तदुक्तं विवरणे– साक्षिवेद्यस्याज्ञानस्य प्रमाणैरभावव्यावृत्तिः ........ अभाववैलक्षण्यं प्रदर्श्यते इति न तस्य प्रमाणवेद्यत्वप्रसङ्गः – इति ॥

सुषुप्तौ अविद्यासद्भावप्रतिपादकवाक्यानि –

१. सति संपद्य न विदुः सति संपद्यामह इति । छां. ६ ९-२.
२. प्राज्ञः कारणबद्धस्तु । गौ. का. आ.
३. सुषुप्तिकाले सकले विलीने तमोभिभूतस्सुखरूपमेति ।
४. एवमेव इमाः सर्वाः प्रजा अहरहर्गच्छन्त्य एतं ब्रह्मलोकं न विन्दन्ति अनृतेन हि प्रत्यूढाः । छां. ८-३-२.
५. एवमयमपि बुद्धिसंबन्धः शक्त्यात्मना विद्यमान एव सुषुप्तिप्रलययो-रपि गच्छति ........ दर्शयति च – सुषुप्तादुत्थानं अविद्यात्मक-

बीजसद्भावकारितम् । 'सति संपद्य न विदुः सति संपद्यामहे' इति । सू. भा. २-३-२१.

६. यथा हि सुषुप्तिसमाध्यादावपि सत्यां स्वाभाविक्यां अविभागप्राप्तौ मिथ्याज्ञानस्यानपोदितत्वात् पूर्ववत् पुनः प्रबोधे विभागो भवति एवमिहापि भविष्यति । सू. भा. २-१-९.

७. यथा हि अविभागेऽपि परमात्मनि मिथ्याज्ञानप्रतिबद्धो विभागव्यवहारः स्वप्नवदव्याहतः स्थितौ दृश्यते, एवमपीतावपि मिथ्याज्ञानप्रतिबद्धैव विभागशक्तिरनुमास्यते । सू. भा. २-१-९.

८. मिथ्याज्ञाननिमित्तश्च बन्धः न सम्यग्ज्ञानादृते विस्रंसितुमर्हति, तस्मात् तत्प्रकृतित्वेऽपि सुषुप्तप्रलयवत् बीजभावावशेषैव एषा सत्संपत्तिरिति । मरणेऽपि तथैवेति भावः । सू. भा. ४-२-८.

९. 'त इह व्याघ्रो वा .... यद्यद्भवन्ति तदा भवन्ति' (छां. ६-६-२). भाष्ये 'यस्माच्चैवं आत्मनस्सद्रूपतामज्ञात्वैव सत्संपद्यन्ते । अतस्ते च इहलोके यत्कर्मनिमित्तां यां यां जातिं प्रतिपन्ना आसुः व्याघ्रादीनाम्, व्याघ्रोऽहं सिंहोऽहमित्येवं ते तत्कर्मज्ञानवासनाङ्किताःसन्तः सत्प्रविष्टा अपि पुनराभवन्ति ।

१०. इह तु विद्यते विवेककारणं कर्म च अविद्या च इति वैषम्यम् ।

११. निर्बीजतयैव चेत् सति लीनानां सुषुप्तप्रलययोः पुनरुत्थानानुपपत्तिः । मुक्तानां च पुनरुत्पत्तिप्रसङ्गः । मां. का. भा.

१२. एतस्मिन् काले अविद्याकामकर्मनिबन्धनानि कार्यकरणानि शान्तानि भवन्ति । तेषु शान्तेषु आत्मस्वरूपमुपाधिभिरन्यथा विभाव्यमानमद्वयमेकं शिवं शान्तं भवति । प्र. भा. ४-७.

१३. इदानीं योऽसौ सर्वात्मभावो मोक्षो विद्याफलं क्रियाकारकफलशून्यं स प्रत्यक्षतो निर्दिश्यते – अविद्याकामकर्माणि न सन्ति इति । बृ. भा. ४-३-२१.

लयद्वैविध्ये वार्तिकप्रमाणम् –

स्वाभाविकोऽयं प्रलय इति पौराणिका जगुः ।
बुद्धिपूर्वस्तु विलयस्सम्यग्ज्ञानैकपूर्वकः ॥

शक्तिमात्रात्मना स्थानं कार्याणां यस्स्वकारणे ।
इत्यनात्यन्तिकलयो भूयो जन्मकृतक्षणः ॥ २-४-३६७, ३६८.

न वेद्मीत्यनुभूतिर्हि सर्वेषामात्मसाक्षिका ।
प्रमात्रादिविविक्तार्थमनुभूयोत्थितस्ततः ॥

नावेदिषमिति प्राह स्वानुभूत्यनुसारतः ।
असाधारणमज्ञानं प्रतीच्येव यतःस्थितम् ॥

स्वाशयः – न वेद्मि, न जानामि इत्यनुभवसिद्धिस्तु ज्ञानाभावरूपा इति सर्वसंमता । न कोऽपि मूलाविद्यां न जानामि इति वदति । सुषुप्तौ व्यञ्जकाभावस्तु कथं ज्ञायते ? ज्ञानस्वरूपत्वात् व्यञ्जकानपेक्षं स्वयमेव जानातीति वक्तुमुचितम् । तथैव मूलाविद्यायास्सत्वे व्यञ्जकानपेक्षं स्वयमेव जानीयात्, न जानाति । कुतः द्वितीयाया मूलाविद्याया अभावादेव न जानाति । नावेदिषमिति प्रत्यभिज्ञानं ग्रहणाभावमेव बोधयति । न तु मूलाविद्याम्, मूलाविद्याङ्गीकारे अद्वैतहानिरेव भवति । पाक्षिके मूलाज्ञानस्य प्रमाणैः अभावेव्यावृत्तिः अभाववैलक्षण्यं प्रदर्श्यते इति तु न तस्य प्रमाणवेद्यत्वप्रसङ्गः इति । अग्रहणरूपैव अज्ञानस्य तत्र स्थितिः प्रदर्शिता । न साक्षिवेद्या मूलाविद्या । मूलाविद्याया एव अभावात् । सत्संपत्तिर्द्विविधा । एका अहं ब्रह्मास्मीत्यनुभवरूपज्ञानाभावपूर्विका, इयं तु सर्वानुभवसिद्धा । अन्या तु अहं ब्रह्मास्मीत्यनुभवरूपज्ञानपूर्वका । प्रथमविधौ तत्त्वाग्रहणरूपाविद्यासत्त्वात् पुनरुत्थानम् । द्वितीयविधौ ज्ञानेन अज्ञानस्य बाधितत्वात् न पुनरुत्थानम् । मूलाविद्याङ्गीकारे मूले कुठारः । सत्संपत्तिरेव नास्तीति विरुद्धं वक्तव्यं स्यात् ॥

१. सति संपद्य - मूलाविद्यासत्त्वे सत्संपत्तिः कथम् ? सत्संपत्तिः नाम सदात्मैकत्वमेव, न विदुः इति ज्ञानाभाव एव उक्तः, सत्संपत्तिं तात्पर्येण श्रुतिर्वदति ॥

२. प्राज्ञः कारणबद्धस्तु – तत्त्वाग्रहणमेव अत्र कारणमित्युक्तम् ॥

३. कैवल्ये - सुषुप्तिकाले सकले विलीने – सकलशब्देन मूलाविद्याऽपि संगृहीता । तथा च तस्याः अपि विलीनत्वं उक्तम् । तमोऽभिभूतः इति तमश्शब्देन भाष्यकारैरेव अग्रहणं उक्तम् । तस्मात् अज्ञातात्मा इत्येवार्थः, नो चेत् मूलाविद्याभिभूतस्य सुखरूपत्वं विरुद्धमुक्तं स्यात् । क्षयरोगग्रस्तः सुखेन वर्तते इत्युक्तिसमानं विरुद्धमेव भवति । किञ्च कर्तृपदमेव नास्तीति स्यात् ॥

४. 'एवमेवेमास्सर्वाः प्रजा अहरहर्गच्छन्त्य एतं ब्रह्मलोकं न विन्दन्ति अनृतेन हि प्रत्यूढाः' (छां. ८-३-२). अत्र मूलाविद्यासत्त्वे ब्रह्मरूपलोकगमनमेव नास्तीति श्रुतिविरोधः । ब्रह्मगमनं तु अनुभवसिद्धम् । अनुभवविरोधश्च भवत एव । तस्मात्तत्त्वाज्ञानरूपाविद्यया अनृतेन प्रत्यूढाः इत्येव वक्तव्यम् ॥

५. अयमपि बुद्धिसंबन्धः .... २-३-३१. शक्त्यात्मना विद्यमान एव सुषुप्तिप्रलययोः पुनः प्रबोधप्रसवयोराविर्भवति .... दर्शयति च सुषुप्तादुत्थानमविद्यात्मकबीजसद्भावकारितम् । सति संपद्य न विदुः सति संपद्यामहे इति । तत्रैव भाष्ये-'मिथ्याज्ञानपुरस्सरोऽयमात्मनो बुद्धिसंबन्धः' इत्युक्तम् । मिथ्याज्ञानकल्पितो बुद्धिसंबन्धः । अतो वस्तुतः नास्त्येव ; मिथ्याज्ञानकल्पितस्य अभावात्, तत्रैव सति संपद्य न विदुः सति संपद्यामहे – इत्युक्तत्वात् । मूलाविद्यासत्त्वे सत्संपत्तेरेवाभावः स्यात् । सत्संपत्तिस्तु श्रुत्युक्ता अनुभवसिद्धा च । अतः तन्निराकरणमशक्यम् अनुभूतत्वात् ॥

सू. भा. २-३-३१. सुषुप्तादुत्थानम् अविद्यात्मकबीजसद्भावकारितं सति संपद्य न विदुस्सति संपद्यामहे इति । अत्रापि सत्संपत्तिरङ्गीकृता मूलाविद्यासद्भावे असंभवा स्यात्, अतः अत्र न विदुः इत्यनेन न जानन्ति इति अग्रहणात्मिकाविद्या उक्ता इत्येव अर्थः, न मूलाविद्या ॥

६. सू. भा. २-१-९. 'यथा हि सुषुप्तिसमाध्यादावपि सत्यां स्वाभाविक्यामविभागप्राप्तौ मिथ्याज्ञानस्य अनपोदितत्वात् .... भवति'। अत्रापि मूलाविद्यासत्त्वे अविभागप्राप्तेरसंभवात् मूलाविद्या न ग्राह्या-मिथ्याज्ञानं तु सम्यग्ज्ञानेन न बाधितम् इत्येवार्थः। बाधपर्यन्तं वर्तते इत्यर्थः॥

७. सू. भा. २-१-९. यथा हि अविभागेऽपि परमात्मनि मिथ्याज्ञानप्रतिबद्धो विभागव्यवहारः स्वप्नवदव्याहतः स्थितो दृश्यते, एवमपीतावपि मिथ्याज्ञानप्रतिबद्धैव विभागशक्तिरनुमास्यते। मूलाज्ञानाङ्गीकारे अविभाग एव न संभवति। अविभागः अत्र उक्तः अनुभूतश्च, अतः मिथ्याज्ञानप्रतिबद्धा शक्तिरनुमास्यते। मिथ्याज्ञानकल्पितायाः वस्तुत्वं न संभवति। सम्यग्ज्ञानादेव खलु मिथ्याज्ञानस्य बाधः॥

८. सू. भा. ४-२-८. मिथ्याज्ञाननिमित्तश्च बन्धः न सम्यग्ज्ञानादृते विस्रंसितुमर्हति। बीजभावावशेषैवैषु संपत्तिः तस्मात्तत्प्रकृतित्वेऽपि सुषुप्तप्रलयवत् बीजभावावशेषैव सत्संपत्तिः। अत्रापि सत्संपत्त्यभ्युपगमात् अग्रहणमेव बीजमिति अकामेनाप्यभ्युपगन्तव्यम्। मूलाविद्याग्रहणे सत्संपत्तेरेवाभावप्रसङ्गः॥

९. छां. ६. 'यस्माच्च आत्मनः सद्रूपतामज्ञात्वैव सत्संपद्यन्ते'। अत्रापि मूलाविद्यासत्त्वे सत्संपत्तिर्न भवेत्। तस्मादज्ञात्वा इत्युक्त्वाग्रहणाभावरूपैवाविद्या। सत्संपत्तेः पूर्वं ग्रहणं नासीत् इत्यर्थः॥

१०. इह तु विद्यते विवेककारणं कर्म च अविद्या च इति, अत्रापि अग्रहणात्मिका अविद्यैव, तत्रैव सर्वं अन्तर्गतम्॥

११. मां. भा. निर्बीजतयैव चेत्, सति लीनानां सुषुप्तप्रलययोः पुनरुत्थानानुपपत्तिः मुक्तानां च पुनरुत्पत्तिप्रसङ्गः ........ अतस्सबीजतयैव सत्संपत्तिः। सति लीनत्वं सबीजत्वं च उभयमपि अग्रहणात्मकाविद्यास्वीकारे संभवति, मूलाविद्याङ्गीकारे सति लीनत्वं न संभवति, अतः मूलाविद्या नोक्ता॥

१२. प्र. भा. ४-७. एतस्मिन्काले अविद्याकामकर्मनिबन्धनानि कार्यकरणानि शान्तानि भवन्ति । तेषु शान्तेषु आत्मस्वरूपं उपाधिभिरन्यथा विभाव्यमानं अद्वयं एकं शिवं शान्तं भवति । अत्रापि अद्वयत्वोक्तेर्मूलाविद्याया असत्त्वं स्पष्टमुक्तं भवति । अविद्या शान्ता इति स्पष्टमुक्तम् ॥

१३. बृह. ४-३-२१. अविद्याकामकर्माणि न सन्ति । अत्र अध्यासरूपाविद्यायाः मूलाविद्यायाश्च अभावः स्पष्टमुक्तः । मूलाविद्यासत्त्वे न सन्तीति वक्तुवशक्यं खलु ॥

१४. बृह. ४-३-२२. अविद्याकामकर्मविनिर्मुक्तमेव तद्रूपं यत्सुषुप्ते गृह्यते प्रत्यक्षतः । अत्रापि अध्यासरूपाविद्यायाः अभावानुभवः प्रदर्शितः । अध्यासरूपाविद्या प्रसक्ता तस्याः निषेधः कृतः । मूलाविद्याया प्रसक्तिरेव नासीत् । मूलाविद्यासत्वे नास्तीति वक्तुमशक्यम् । अस्फुटापि मूलाविद्या नास्तीत्येवार्थः ॥

(७१) संमतवादिनः -

न चेदनुभवव्याप्तिस्सुषुप्तस्याभ्युपेयते ।
नावेदिषं सुषुप्तोऽहमिति धीः किं बलाद्भवेत् ॥
बुद्ध्यादेः प्रविलीनत्वाद्देहादेश्च जडत्वतः ।
लोष्टादेरिव नैव स्यात् नाज्ञासिषमितीरणम् ॥
चिदाभासैकमात्रेण तमस्सिद्धिर्न मातृतः ॥

बृ. वा. ३-४-१०३, १०४, १०६.

प्रमात्राद्युत्थितेः पूर्वं चिदन्यानन्वयात्तमो ।
विशेषणा चिदेवैका स्वानुभूत्यैव गम्यते ॥
आसीदिदं तमोभूतमप्रज्ञातमलक्षणम् ।
अप्रतर्क्यमविज्ञेयमित्येतत्स्वानुभूतितः ॥

बृ. वा. १-४-२६०, २६१.

प्रतीचोऽत्र कार्यकारणातीतं तात्त्विकं स्वरूपमुक्तं सुषुप्तौ । तत्तु बुद्धिपूर्वकलयाशयेनेति भाष्ये वार्तिके च व्यक्तम् ॥

**स्वाशयः** – नावेदिषं सुषुप्तोऽहमिति तु अनुभवरूपात्मनः केवलस्य सद्भावं बोधयति । आत्मानङ्गीकारे लोष्टादिष्विव सुषुप्तोऽहमिति बुद्धिर्न स्यात् । तमश्शब्दवाच्याग्रहणरूपाविद्यायास्सिद्धिः न प्रमाणतः किं तु अज्ञातात्मानुभवेनैव सिद्धिः, अप्रज्ञातमिति अत्रैवोक्तेरज्ञातात्मा आसीदित्यर्थः तमश्शब्दस्तु अग्रहणार्थक एव, नो चेत् चिदेकत्वानुभूतितः इत्युक्तैकत्वस्यैव बाधापत्तेः । तात्त्विकमेव स्वरूपमुक्तं इति तु मूलाविद्याङ्गीकारे बाधितं भवति । अत्र बुद्धिपूर्वकलयाशयेन नोक्तम् । कुतः इति चेत् । आसीदिदं तमोभूतम् इत्युक्तत्वात् । ज्ञानिनामनुभवे अज्ञानस्य प्रसक्तिरेव नास्ति । इदं तु सर्वजनसाधारणसुषुप्तिविषयकमेवेति ज्ञेयम् । स्वाभाविकोऽयं लयः इत्यत्रैवोक्तः । बुद्धिपूर्वकलयस्तु सम्यग्ज्ञानैकपूर्वकः इत्युक्तम् ॥

चैतन्ये व्यञ्जके सति व्यञ्जकान्तरापेक्षणं नावश्यकम् इति दूषणं सुस्थिरमेव । आत्मानवबोधरूपस्य अज्ञानस्य न केवलं सुषुप्तौ जाग्रत्स्वप्नयोरपि यावद्ज्ञानानुदयः तावत्पर्यन्तं विद्यमानत्वात् । अनवगमव्यतिरिक्तमूलाविद्यायाः सत्वं सर्वथा असंभाव्यमानम् । अनवबोधरूपाविद्यायाः अतिरिक्तमूलाविद्या-सत्वे किमर्थं मूलाविद्या तदा नानुभूयते ? व्यञ्जकस्य अन्तःकरणस्य अभावात् नानुभूयते इति यद्युच्येत, तर्हि अन्तःकरणाभावव्यञ्जकं किम्, तस्य किम् इति अनवस्थादोषप्रसक्तिः । श्रुतिस्तु एवं वदति पश्यन् वै न पश्यति । न तु तद्द्वितीयमस्ति यद्विभक्तं पश्येत् । आत्मा पश्यन् वर्तते द्वितीयस्य अभावात् न पश्यति इति । सा अग्रहणरूपा तु आत्माव्यतिरिक्तत्वात् न ज्ञायते । अत एवोक्तं भाष्ये अज्ञात्वा तं प्रविशन्तीति । वार्तिककारा अपि अविद्यात्रितयव्यतिरेकेण अन्याविद्या नास्त्येव इत्युद्घोषयामासुः ॥

सुषुप्तौ भाष्यकारैर्वार्तिककारैश्चाङ्गीकृताविद्या अग्रहणरूपैवेति तैरेवासकृदुक्तम् । गीताभाष्येऽपि माण्डूक्यकारिकायामिव अग्रहणरूपाविद्यैव उक्ता नान्याविद्या ॥

(७२) **संमतवादिनः –** एतेन सुषुप्तौ नास्त्येवाविद्येति भाष्योदाहरणैस्साधितं निरस्तम् ॥

**स्वाशयः –** भाष्यकारवार्तिककारैरुक्तम् अग्रहणरूपमज्ञानम् ; तदतिरिक्तमूलाविद्याया अङ्गीकरणं निरस्तमिति ज्ञेयम् । माण्डूक्यकारिकायां तत्त्वाग्रहणमेव बीजमिति स्पष्टमुक्तम् । तस्मान्मूलाविद्या भाष्यवार्तिकबहिर्भूता, अद्वैतहानिकरी द्वैतत्वापादिका चेति ज्ञेयम् ॥

(७३) **संमतवादिनः –** प्रागुदाहृतभाष्यवार्तिकवचनसमवलोचनेन तदङ्गीकारस्य स्पष्टं प्रतीयमानत्वात् । वार्तिकेऽपि सुषुप्तिसमाने प्रलये बीजाविद्याशेषाभ्युपगमः ॥

**स्वाशयः –** अज्ञात्वा सत्संपद्यन्ते इति भाष्यवचनेन 'अज्ञात आत्मा जगतः कारणम्' (वा. ४८०) इति वार्तिकवचनेन च बीजाविद्या अग्रहणरूपैव न मूलाविद्या इति स्पष्टं ज्ञायते । मूलाविद्याप्रसक्तिरेव कुत्रापि नास्ति ॥

(७४) **संमतवादिनः –** सोऽयं सुषुप्तेऽपि समानः .... इति स्पष्टम् ॥

**स्वाशयः –** अविद्यासंबन्धः कल्पितः इति तत्त्वदीपनकारैरेव (वा. २७२) उक्तत्वात् यथा मूलाविद्या कल्पिता तथा तत्संबन्धोऽपि कल्पितः । कल्पितम् अवस्तुत्वात् नास्तीत्यर्थः ॥

(७५) **संमतवादिनः –** अविद्याकामकर्मविनिर्मुक्तमेव तद्रूपं यत्सुषुप्ते आत्मनो गृह्यते प्रत्यक्षतः बृ. ४–३–२१ ; सः प्रत्यक्षतो निर्दिश्यते यत्र अविद्याकामकर्माणि न सन्ति .... इति कृतं दूषणं समग्रभाष्याशयानधिगमनिबन्धनमेव ॥

**स्वाशयः –** भाष्याशयानधिगमः केषामिति विमर्शनीयम् । किं भाष्यकारैः अविद्याकामकर्माणि न सन्ति इत्युक्तवाक्यस्य मूलाविद्या तत्र अस्फुटा

अस्तीति अर्थं वर्णयतां भाष्याशयोऽज्ञातः ? उत अध्यासरूपाविद्या नास्तीति वादिनां भाष्याशयोऽविदितः ? इत्येतत् जिज्ञासव एव विमृशन्तु । अग्रहणादि त्रयमपि अन्तःकरणवृत्तिरूपमेवेति पूर्वमेवोक्तम् । अन्तःकरणे यावत्पर्यन्तं अहंब्रह्मास्मीत्यनुभवरूपा वृत्तिः न जायते तावत्पर्यन्तम् अग्रहणरूपाविद्या वर्तते एव । अत एव भाष्यकारैः अज्ञात्वा तं प्रविशन्तीत्युक्तम् । मूलाविद्याङ्गीकारे – कथं सत्संपत्तिः ? कथं प्राज्ञात्मना एकीभूतत्वम् ? इत्यस्य प्रश्नस्य उत्तरमेव नास्ति । भाष्यकारैः संप्रसादे प्रपञ्चपरित्यागेन निष्प्रपञ्च-सदात्मना संपत्तेरित्युक्तम् । मूलाविद्या प्रपञ्चान्तर्गता वा न वा ? तत्सत्त्वे कथं निष्प्रपञ्चसदात्मना संपत्तिः ? तस्मान्मूलाविद्या भाष्यवार्तिककाराणां सर्वथा असंमतेति ज्ञेयम् । किं च ज्ञस्वरूपात्मनात्रास्फुटा मूलाविद्या वर्तते इति ज्ञायेतैव, न तु ज्ञायते । अतोऽत्र अस्फुटाऽपि मूलाविद्या नास्त्येवेति सिद्धम् ॥

(७६) संमतवादिनः – सुषुप्तौ मूलाविद्याङ्गीकारे प्रागुक्तं माण्डूक्यभाष्यम् अन्यदपि वक्ष्यमाणम् अस्त्येव प्रमाणम् । ........ सुषुप्ते स्पष्टानुभवविरहादेव अभावोक्तिः विद्यमानाया अपि सुषुप्ते इति ॥

**स्वाशयः** – भाष्यकाराणां 'सुषुप्तौ अविद्या नास्ति' इतिवाक्यस्य अविद्या अस्ति इत्याभिप्रायं वदतां विदुषां विचारशक्तिः असाधारणीभूता इत्येतत्सर्वेषां विदितमेव भवति । आत्मनः व्यञ्जकापेक्षा नास्ति । व्यञ्जकसत्त्वे तस्याऽपि व्यञ्जकं किम् ? तस्यापि व्यञ्जकं किम् इति अनवस्थादोषप्रसक्तिः । भाष्ये –'पश्यन् वै न पश्यति' । द्वितीयस्य अभावादित्युक्तं स्मर्तव्यमेव । किञ्च व्यञ्जकाभावः कथं ज्ञातः ? व्यञ्जकान्तरेणेति चेत् अनवस्थादोषप्रसङ्गात् । मूलाविद्यासत्त्वे मूलाविद्याऽपि गृहीता स्यात् । संमतवादिभिर्विवरणकारैश्च मूलाविद्यायाः कल्पितत्वमङ्गीकृतम् । कल्पितायाः कल्पनासमकालीनत्वमपि अङ्गीकृतम् । सुषुप्तौ कल्पनाभावश्चाङ्गीकृतः । तथापि कल्पिताया अस्फुटाया मूलाविद्यायास्सुषुप्तौ कल्पनाभावेऽपि अस्तित्वं अङ्गीकुर्वतां कौशलं स्तोत्रार्हमिति प्रतिभाति ॥

(७७) संमतवादिनः – 'न किञ्चिदवेदिषम्' इति सुप्तोत्थितस्य प्रत्ययदर्शनात् सुषुप्तौ मूलाविद्या अङ्गीकृता सुषुप्तानुभवस्य – इत्यादिः ॥

**स्वाशयः** – यः कोऽपि पुरुषः सुषुप्तौ नावेदिषमिति अनुभवति किम्? 'अनुभवस्तु न वेद्मि' इत्येव स्यात्। 'नावेदिषमिम्' इति प्रत्ययः जाग्रत्कालीनः इति सर्वानुभवसिद्धम्। संमतवादिभिरप्यङ्गीकृतम्। बृहदारण्यकभाष्ये (४-३-६) सुषुप्ताच्चोत्थानम्, 'सुखमहमस्वाप्सं न किञ्चिदवेदिषम्' इति। 'तस्मादस्ति व्यतिरिक्तं किमपि ज्योतिरिति'। 'एतेन सङ्घातव्यतिरिक्तात्मज्योतिषस्सत्त्वे इदं प्रमाणम्' इति, इमानि वाक्यानि सुषुप्तौ केवलज्योतिस्स्वरूपस्य आत्मनोऽस्तित्वप्रतिपादकानीति प्रतिपादितम्। तस्मान् मूलाविद्याया अत्र नावसरः ॥

(७८) संमतवादिनः – बीजभूताविद्यानुभवस्य अस्पष्टतया निष्प्रपञ्चस्वरूपात्मसिद्धिरप्रत्यूहैव ॥

**स्वाशयः** – रात्रौ अन्धे तमसि विद्यमानमपि वस्तु स्पष्टं न गृह्यते, तस्माद्वस्तु नास्तीति अङ्गीक्रियते किम्? सुषुप्तौ किमपि नानुभूतमिति तु सर्वैरनुभूतम्। श्रुतिरप्यवादीत् 'न तु तद्द्वितीयमस्ति' इति। तथापि तत्र मूलाविद्या वर्तते इति वचनं तेषामेव संमतं नान्येषां विचारपराणाम्। अस्पष्टतया विद्यमानत्वं कथं ज्ञातम्? आत्मना तु मूलाविद्या अस्पष्टतया विद्यते इति नानुभूतम्। अस्पष्टतया विद्यमानत्वं निष्प्रपञ्चसदात्मत्वस्य न बाधकमिति वचनं हास्यास्पदम् ॥

(७९) संमतवादिनः – 'पुंस्त्वादिवत्त्वस्य सतोऽभिव्यक्तियोगात् ....' (सू. २-३-३), 'यथा लोके पुंस्त्वादीनि .... इत्यारभ्य एवमयमपि बुद्धिसंबन्धः शक्त्यात्मना विद्यमान एव सुषुप्तप्रलययोः पुनः प्रबोधप्रसवयोराविर्भवति। दर्शयति च सुषुप्तादुत्थानं अविद्यात्मकबीजसद्भावकारितम्। सति संपद्येत्यादिना। अत्र हि बुद्धिसंबन्धः सुषुप्तिप्रलययोः शक्त्यात्मना विद्यमान एव पुनः प्रबोधे सर्गे च आविर्भवतीति पुंस्त्वदृष्टान्तेन समर्थ्य श्रुतिश्च

प्रमाणत्वेनोदाहृता । तत्र शक्तिः भाष्योक्ता आत्माविद्या मूलाविद्यैव इत्यादिः .... तदुत्पत्तिप्रसङ्गात् । इत्येवमादि ॥

**स्वाशयः** – २-३-३०. भाष्ये अपि च मिथ्याज्ञानपुरस्सरोऽयमात्मनो बुद्ध्युपाधिसंबन्धः । न च मिथ्याज्ञानस्य सम्यग्ज्ञानादन्यत्र निवृत्तिरस्तीत्यतो यावद्ब्रह्मात्मतानवबोधः तावदयं बुद्ध्युपाधिसंबन्धो न शाम्यति । एतेन मिथ्याज्ञानकल्पितसंबन्धोऽस्तु । वस्तुतो नास्तीति सिद्धम् । मिथ्याज्ञानकल्पितस्य वस्तुत्वाभावादित्यर्थः । अत्रैव सुप्तिस्थानं इति तु परमार्थभूतम् ॥

(८०) **संमतवादिनः** – तथा च प्रलये सुषुप्तौ वा शक्तिरूपेण बीजरूपेण च वर्ण्यमाना सर्वत्र भाष्ये अविद्या मूलभूता मूलाविद्यैव ॥

**स्वाशयः** – सुषुप्तौ मूलाविद्यारूपशक्तिरूपेण प्रपञ्चो वर्तते इति वाक्यं भाष्ये कुत्रापि न प्रदर्शितम् । शक्तिसत्त्वे सत्संपत्तेरसंभवात् । जाग्रदज्ञानकल्पिता शक्तिरेव सा स्यात् । अज्ञानकल्पितायाः शक्तेस्सद्भावात् सत्संपत्तेर्न विरोधः । तस्मान्मूलाविद्याया नावकाशः । शक्तिरूपाविद्या तु तत्त्वाग्रहणरूपैवेत्युक्तम् । माण्डूक्यभाष्ये (१-१४) निद्रा उक्ता तत्त्वाप्रतिबोधलक्षणं तमः इति । १-१३. तत्त्वाप्रतिबोधो निद्रा ; सैव च विशेषप्रतिबोधप्रसवस्य बीजम् । सा च बीजनिद्रा – इति स्पष्टोक्तेः तत्त्वाग्रहणरूपैवाविद्या सुषुप्तावङ्गीकृता । न तद्व्यतिरिक्ता मूलाविद्या । पूर्वोक्तभाष्येऽपि यत्र कुत्रापि अध्यासकारणीभूता मूलाविद्या अनुक्ता । अग्रहणरूपाविद्यैव सुषुप्तौ अङ्गीकृता तस्या आत्मैकत्वज्ञानादेव बाध्यमानत्वात् आत्मैकत्वज्ञानोदयपर्यन्तं तस्या अस्तित्वमङ्गीकृतम् ॥

(८१) **संमतवादिनः** – बुद्ध्युपाधिसंबन्धः अविद्याशक्तिरूपेणैवेति पूर्ववदेव व्याख्येयत्वात् आध्यासिकतादात्म्यरूपोपि संबन्धः शक्तिरूप एव स च अव्यक्तः नान्यरूप इति विदितमेव ॥

**स्वाशयः** – 'अयमपि बुद्धिसंबन्धः मिथ्याज्ञानपुरस्सर एव' (२-३-३०) इतिभाष्ये तत्रैव स्पष्टमुक्तम् । मिथ्याज्ञानकल्पितशक्तिरित्यस्य कोऽर्थः ? शक्तिर्नास्ति भ्रान्त्या शक्तिरस्तीति कल्पिता इति । एतेन भ्रान्तिकल्पितस्य अवस्तुत्वात् नात्र शक्तिसद्भावः इत्यर्थः । अविद्या विद्यमानापि विवेकानर्हा आसीदेव । केवलं सर्वज्ञेश्वरवेद्या सा इति भवद्भिः कथं ज्ञातम् ? सर्वमभित्तिचित्रम् एतत् ॥

(८२) **संमतवादिनः** – एवं स एव तु कर्मानुस्मृतिशब्दविधिभ्यः (सू. ३-२९) इति सूत्रभाष्ये सुप्तजीव एव पुनः सुषुप्तितः उत्तिष्ठति । नान्यः ईश्वरो वा इति सिद्धान्तावसरे तन्नियामकतया भाष्ये तदीयाविद्याकर्मयुगलं वर्णितम् । .... केवलसर्वज्ञेश्वरेण वेद्यं तत् । .... जीवानां विवेक्तो दुर्ग्रहमेवासीत् इति वक्तव्यम् । सुषुप्तात्मदृष्ट्या तदभाववर्णनमपि साध्वेव भाष्ये । अन्यथा उपरितनभाष्यविरोधो दुष्परिहारो निरासकाराणाम् ॥

**स्वाशयः** – भाष्ये सत्संपन्नः यः स एव प्रतिबुद्ध्यते उत अन्यो वा इति चिन्त्यते इत्यत्र सत्संपत्तिं सिद्धां कृत्वा स एव प्रतिबुद्ध्यते, अन्यो वा इति विचारः प्रारब्धः । तत्र मूलाविद्या अस्तीत्यङ्गीकारे सत्संपत्तिरेव नाभूत् इति स एव प्रतिबुद्ध्यते अन्यो वा इति प्रश्नस्यैव नावकाशः । अतः इदं अधिकरणं व्यर्थमेव स्यात् ॥

ज्ञानं अज्ञानं वा मिथ्याज्ञानं वा अन्तःकरणवृत्तिरेव इति पूर्वमेवोक्तम् । सुषुप्तिं गच्छन् पुरुषः आत्मनः ब्रह्मस्वरूपतां जाग्रति अज्ञात्वा सुषुप्तिं गच्छति । अज्ञानं तु आत्मैकत्वज्ञानेनैव बाध्यम्; नान्येन । अतः सुषुप्तौ ज्ञानाभावरूपमज्ञानं वर्तते इति लोकव्यवहारः । वस्तुतः अज्ञाताद्वितीयात्मस्वरूपैव सुप्तिः । ब्रह्मैव सुप्तिस्थानमिति भाष्यकारैरेवोक्तम् । तच्च ब्रह्म अज्ञातमिति कारणेन अग्रहणरूपाज्ञानं वर्तते इति व्यवह्रियते । सर्वथा मूलाविद्याया अत्र अवसरो नास्त्येव । अङ्गीकारे अद्वैतहानिरेव स्यात् ।

सत्संपत्तिरेव न स्यात् । सर्वानुभवविरोधश्च, न तु तद्द्वितीयमस्तीति श्रुतिविरोधश्च । सुषुप्तात्मदृष्ट्या तदभाववर्णनमपि साध्वेवेति संमतवादिभिरप्यङ्गीकृतम् ॥

(८३) संमतवादिनः – कामकर्मादिकं सर्वमपि संसारप्रपञ्चबीजं उक्ताविद्याबीजरूपतयैव प्रलयेऽपि वर्तते इत्युक्तम् । वार्तिके –

यावत्कर्मगतं किञ्चिद्भावनादि समीक्ष्यते ।

तमसा बीजभूतं तद्व्यज्यते संस्कृते पुनः ॥ वा. १–४–३४३.

अत एव च सुषुप्तिलक्षणं विशेषविज्ञानोपरतिवत् केवलं तमोरूपमपि लक्षणान्तरं भवेत् । परं तु लक्षणमिदं अविद्वन्मात्रवृत्ति । पूर्वं तु विद्वदविद्वदुभयसाधारणम् । उक्तं च उपदेशसाहस्र्याम् –

सुषुप्ताख्यं तमोऽज्ञानं बीजं स्वप्नप्रबोधयोः ।

.... .... .... .... .... संसारस्य नियामकम् ॥

इति ॥

स्वाशयः – भाष्यकारैः वार्तिककारैश्च तमश्शब्दः अग्रहणान्यथाग्रहणरूपाविद्यार्थकत्वेनैवोपयुक्तः । तद्यथा माण्डूक्यभाष्ये आगमप्रकरणे 'निद्रा उक्ता तत्त्वाप्रतिबोधलक्षणं तमः' (१–१४) इति । वार्तिके 'तमोऽन्वयस्तमः कार्ये' (१-४-३४२) इत्यत्र अज्ञातात्मनः, अथवा आत्मनः अग्रहणरूपस्य अज्ञानस्य तमश्शब्दार्थकत्वमुक्तम् ॥

गीताभाष्ये (१०–११) अज्ञानजं तमः – अविवेकतः जातं मिथ्याप्रत्ययलक्षणम् इति तमश्शब्दस्य मिथ्याज्ञानार्थकत्वमुक्तम् ॥

ईशावास्ये – अन्धेन तमसावृताः अदर्शनात्मकेन अज्ञानेन तमसावृताः इति । भाष्यकारैः वार्तिककारैश्च अग्रहणान्यथाग्रहणरूपाविद्याया एव तमश्शब्दवाच्यत्वमुक्तम् । भाष्यकारैस्सर्वत्र विशेषविज्ञानोपरमलक्षणं सुषुप्तं न क्वचित् विशिष्यत इति । (३–२–७). यदुक्तं तदेव तमश्शब्देनापि विशेषविज्ञानाभाव एव उक्तः, नान्यः । विदुषां तु ज्ञानेन अज्ञानस्य निवर्तितत्वात् स्वतः सुषुप्तिर्वा अज्ञानं वा नैव संभवतः । तस्मात्तमोरूपमिति तु लक्षणान्तरं न भवति । उपदेशसाहस्र्यामुक्तं तमश्शब्दवाच्यमपि

इदमेव अग्रहणरूपमज्ञानम् । इदं तु अज्ञानिनामेवोक्तम् । ज्ञानिनां तु अज्ञानं बाधितमेव ॥

(८४) **संमतवादिनः** – गौडपादकारिकाभाष्ये (३-३५) – 'लीयते हि सुषुप्तौ यस्मात्सर्वाभिरविद्याप्रत्ययबीजवासनाभिः सह तमोरूपम् अविशेषरूपं बीजभावमापद्यते' इत्युक्तम् ॥

**स्वाशयः** – बीजभावं तु अग्रहणमेव 'निद्रा तत्त्वमजानतः' इत्यत्र तत्त्वग्रहणाभाव एव बीजमित्युक्तम् ॥

(८५) **संमतवादिनः** – सुषुप्तिसमाध्योर्विवेचनावसरे तत्रैव (गौ. ३-३५) 'सुषुप्तेऽन्यः प्रचारः अविद्यामोहतमोग्रस्तस्यान्तर्लीनानेकानर्थप्रवृत्तिबीज-वासनावतः मनसः प्रचारः....आत्मसत्यानुबोधहुताशविप्लुष्टानर्थप्रवृत्तिबीजस्य अस्यैव प्रशान्तसर्वक्लेशरजसः स्वतन्त्रः प्रचारः' इति । एवं अपीतावपि मिथ्याज्ञानप्रतिबद्धैव विभागशक्तिरनुमास्यते इति । भाष्येऽपि सैवाविद्या-शक्तिः विभागशक्तिः सुषुप्ते इव उत्थितेन पुरुषेण कार्यानुसारेण प्रबोधानु-सारेण च अनुमास्यते यथा तथा सर्गानुसारेण अनुमानमपि विद्यमानाया एव खलु । एवं दुर्विवेकविभागशक्तिसद्भावाङ्गीकारेऽपि सुषुप्तपुरुषाणां (प्रलीनपुरुषाणामिव) स्वदृष्ट्या निष्प्रपञ्चस्वरूपात्मसिद्धिः ॥

**स्वाशयः** – 'स्वदृष्ट्या निष्प्रपञ्चस्वरूपात्मसिद्धिः' इति स्वानुभवेन निष्प्रपञ्चस्वरूपत्वानुभवसिद्धिरभ्युपगता । निष्प्रपञ्चस्वरूपात्मानं अनुभूय अनुभवविरुद्धमनुमानं कर्तुं कथं शक्नोति ? एकत्वं अद्वितीयत्वं च अनुभूय कथं अननुभूतां दुर्विवेकविभागशक्तिरूपां मूलाविद्यां प्रमाणत्वेन अङ्गीकुर्यात् ? सुषुप्तौ ज्ञाने च आत्मैकत्वं अङ्गीकृत्य तयोर्भेद उपवर्णितः । सुषुप्तौ तत्त्वज्ञानाभावरूपबीजसद्भावः, ज्ञाने तु तत्त्वज्ञानाभावरूपबीजस्य आत्मैकत्व-ज्ञानबाधितत्वं च तयोर्भेदो उपवर्णितः । सुषुप्तौ ज्ञानाभावरूपबीजे अथवा अज्ञातात्मरूपे सर्वकर्मादि बीजात्मना वर्तत एव, ज्ञाने तु ज्ञानेनाज्ञानस्य बाधितत्वान्न किञ्चिदवशिष्यते इति ॥

भाष्येऽपि 'एवं मिथ्याज्ञानप्रतिबद्धैव विभागशक्तिरनुमास्यते' इत्युक्तं खलु। मिथ्याज्ञानकल्पिता शक्तिः यावन्मिथ्याज्ञानं सम्यग्ज्ञानेन न बाध्यते तावन्मिथ्याज्ञानकल्पितायाश्शक्तेरपि बाध्यत्वं न संभवति। सा मिथ्याज्ञान-कल्पिता शक्तिः मूलाविद्यारूपा नैव संभवति। मूलाविद्यायाः मिथ्याज्ञानोपा-दानकारणत्वेन तैरभ्युपगमात्। सुषुप्तौ मरणे प्रलये च मनः आत्मनि लीनं भवतीत्येतत्सर्वानुभवसिद्धम्। तस्माल्लीनात्पूर्वं जाग्रति अज्ञस्य मनसः प्रचारः अनेकानर्थप्रवृत्तिबीजवासनावानेव। ज्ञानिनस्तु मनसः प्रचारः ज्ञान-बाधितबीजवासनावानेव – इति उभयोर्भेदो वर्णितः मिथ्याज्ञानकल्पितायाः शक्तेरवस्तुत्वात् शक्तिर्नास्तीत्येव पर्यवस्यति॥

सुषुप्तौ निष्प्रपञ्चसदात्मना सत्संपत्तिं ब्रुवतां भाष्यकाराणां वचनं पठित्वापि तत्र अस्फुटरूपमूलाविद्यासद्भावं ब्रुवतां विदुषां साहसं कीदृशमिति सुधीभिरेवोह्यम्। सुषुप्तौ मूलाविद्यासद्भाववर्णनं अनुभवविरुद्धम्, श्रुति-विरुद्धम्, भाष्यवार्तिकविरुद्धम्, तर्कविरुद्धं चेति सुधीभिर्ज्ञेयम्॥

मूलाविद्या सुषुप्तौ वर्तते, व्यञ्जकस्य मनसः अभावात् न सम्यग्ज्ञायते इत्युक्तिः अनुभवविरुद्धा। व्यञ्जकाभावः कथं ज्ञातः व्यञ्जकान्तरेणेति चेत् अनवस्था प्राप्नोति। श्रुतिविरोधश्च 'पश्यन् वै तन्न पश्यति .... न तु तद्-द्वितीयमस्ति' इति श्रुतिः आत्मा ज्ञानस्वरूपः द्वितीयस्य अभावात् न पश्यति इति वदति। मूलाविद्यासत्त्वे 'इयं मूलाविद्या वर्तते' इति अनुभूयात्, अतः श्रुतिविरुद्धः। आत्मनो व्यञ्जकापेक्षा नास्त्येव, ज्ञानरूपत्वात्॥

भाष्ये – 'एकत्वान्न विजानातीत्युक्तम्'। मूलाविद्यासत्त्वे एकत्वं कथम्? तस्माद्भाष्यविरुद्धम। निष्प्रपञ्चसदात्मना सत्संपत्तिं तर्कः प्रतिपादयति। तस्मात्तर्कविरुद्धं च तत्र मूलाविद्यासत्त्वम्। मूलाविद्या प्रक्रिया सर्वथा भाष्यबहिर्भूतेति स्पष्टम्॥

प्राज्ञेनात्मना संपरिष्वक्तः इति आत्मैकत्वं सुषुप्तौ वदति बृ. श्रुतिः। तत्र मूलाविद्याङ्गीकारः श्रुतिविरुद्धः॥

'सति संपद्य न विदुः सति संपद्यामहे' इति सत्संपत्तिं स्पष्टं ब्रुवत्याः छान्दोग्यश्रुतेर्विरोधः ॥

'एष हि द्रष्टा श्रोता मन्ता विज्ञाता परे ब्रह्मणि एकी भवति सुषुप्तौ' (प्रश्न ४.) इति ब्रुवत्याः श्रुतेर्विरोधो भवति ॥

सुषुप्तिं सर्वोऽप्यनुभवति । न तत्र एकोऽपि मूलाविद्यामनुभवति । अनुभवे सुषुप्तिहानिरेव स्यात् । तस्मात्सर्वानुभवविरोधः । व्यञ्जकाभावा दग्रहणमिति तु न कारणम्, व्यञ्जकाभावः कथं ज्ञातः ? तस्मादात्मा व्यञ्जकान्तरानपेक्षयैव स्वयमेव जानातीति वक्तव्यम् । मूलाविद्या कथं तेन न ज्ञाता ? इत्यस्य प्रश्नस्य द्वितीयस्य अभावादेव तेन किमपि न ज्ञातमित्येवोत्तरं दत्तम् । तस्मादपि मूलाविद्या अस्फुटापि सुषुप्तौ नास्तीति सिद्धम् ॥

(८६) संमतवादिनः – किं च प्रागुक्तज्ञानदाह्यबीजमविद्यैवैका इति भाष्यतोऽवगम्यते । अविद्याकल्पितनामरूपबीजम्, माया शक्तिः तदतिरिक्तेति वदतां ज्ञानदाह्यबीजद्वयाङ्गीकारापत्तिः .... .... । इदं तु सूक्ष्मेक्षिकया द्रष्टव्यम् ॥

स्वाशयः – अविद्याकल्पितमायाशक्तेरभ्युपगमे न कोऽपि दोषः । अविद्याकल्पिताया अविद्यमानत्वात्, वस्तुतः नास्त्येवेत्यर्थः । अविद्यापगमे सापि गच्छति । तस्माद्बीजद्वयाङ्गीकारो नास्ति ॥

(८७) संमतवादिनः – सुषुप्तावविद्यासद्भावश्रुतिभाष्यादीनां निर्विशेषाद्वितीयस्वरूपात्मप्रतिपादने एव परमतात्पर्यमिति तु समस्त्येव । न तन्निराक्रियते । अथापि तेषां यावत्संसारविमोक्षं जीवानां पुनरुत्थानपुनस्सृष्टिकरणान्यथानुपपत्त्या अवश्यकल्पनीयबीजाविद्याशेषस्य सुषुप्तिप्रलययोरेकान्तेन निराकरणमसंभवि । मिथ्याज्ञानमात्रनिराकरणं तु सर्वेषां निर्विशङ्कम् । अविद्यासद्भावप्रतिपादने परमतात्पर्याभावेऽपि अस्त्यवान्तरतात्पर्यम् । तच्छेषो वा अर्थः पुनरुत्थानात् । तदननुभवस्तु व्यञ्जकाभावमात्रेणेति प्रागेव

प्रतिपादितः । तत्सत्तामात्रेण निर्विशेषप्रतिपत्तेर्न प्रतिबन्धः । तद्विशेषविज्ञान एव प्रतिबन्धः न स्वव्यक्तताग्रामपि ॥

स्वाशयः – निर्विशेषाद्वितीयस्वरूपात्मप्रतिपादन एव परमतात्पर्यमिति तु सम्मतमेव, न तन्निराक्रियते इत्युचितः मूलाविद्या नास्तीति तैरेवाभ्युपगतम् । अभ्युपगमेऽपि पुनरविद्यासाधने प्रवृत्तिर्निराधारा निष्प्रयोजना च पुनरुत्थानस्य पुनस्सृष्टेश्च कारणं तत्त्वज्ञानाभाव एवेति भाष्यकारैरेव प्रतिपादितम् । यस्मादज्ञात्वा तं प्रविशन्ति तस्मात्त एव जाग्रति । त एव सृज्यन्ते इति । तस्माद् ज्ञानाभावव्यतिरिक्ताज्ञानकल्पनं निराधारम्, निष्प्रयोजनं च अद्वितीयात्मत्वविरोधश्च ॥

मूलाविद्यासत्तामात्रेण निर्विशेषप्रतिपत्तेर्न प्रतिबन्धः इति वचनं हास्यास्पदम् । यदि द्वितीयवस्तु विद्यते आत्मनो ज्ञानस्वरूपत्वादात्मा जानात्येव । तदा निर्विशेषप्रतिपत्तेर्बाधक एव जायते । न तु तद्द्वितीयमस्तीति श्रुतेर्विरोधश्च दुष्परिहार्यः । श्रुतिस्तु द्वितीयं नास्ति इति वदति । अनुभवविरोधश्च । न कोऽपि सुषुप्तौ मूलाविद्यामनुभवति । अनुभवे सुषुप्तेः सुषुप्तित्वमेव न भवति ॥

(८८) संमतवादिनः – सर्वथा सुषुप्त्यादौ बीजभूताविद्यायाऽपि शक्तेरनङ्गीकारे सूत्रभाष्यविरोधो निरासकृतां दुष्परिहारः । 'न विलक्षणाधिकरणे' हि (२–१–८) 'अपीतौ तद्वत्प्रसङ्गात्' इति सूत्रे – 'सुषुप्तिसमाध्यादावपि सत्यां स्वाभाविक्यामविभागप्राप्तौ मिथ्याज्ञानस्य अनपोदितत्वात् पूर्ववत् पुनः प्रबोधे विभागो भवति । .... (२-१-९) यथा ह्यविभागेऽपि परमात्मनि मिथ्याज्ञानप्रतिबद्धो विभागव्यवहारः स्वप्नवदव्याहतः स्थितौ दृश्यते एवमपीतावपि मिथ्याज्ञानप्रतिबद्धैव विभागशक्तिरनुमास्यते । एतेन मुक्तानां पुनरुत्पत्तिप्रसङ्गः प्रत्युक्तः सम्यग्ज्ञानेन मिथ्याज्ञानस्य अपोदितत्वात्' इत्यन्तेन भाष्येण प्रलये अविभागेऽपि पुनर्विभागकरणे नियामिका विभागशक्तिः कार्यानुमेया स्वीकृता । सुषुप्तिसमाधिदृष्टान्तेन दृष्टान्तसामञ्जस्याय विभागशक्तिरविद्याशक्तिरकामेनापि अभ्युपेया । अन्यथा सूत्रतो परिहारो

असमञ्जस एव स्यात् । मिथ्याज्ञानस्य अनपोदितत्वादित्युक्त्या अविद्याशक्ति-रूपेणावशेषस्यैव स्वीकारात् । सा शक्तिः मायाविद्यैव 'अविद्यैव तु नश्शक्तिः सर्वशक्यस्य सर्जने' इति वार्तिके ॥

स्वाशयः – भाष्ये स्वाभाविकी अविभागप्राप्तिः सुषुप्तौ वर्तते इत्युक्तम् । सा स्वाभाविकी अविभागप्राप्तिः सर्वैरनुभूयत एव । सम्यग्ज्ञानं विना मिथ्याज्ञानं न बाध्यते इत्येतदपि अनुभवसिद्धम् । आत्मैकत्वज्ञानं सुषुप्तौ न संभवतीत्येतदपि अनुभवसिद्धम् । अनुभवानुसारेण अविभागप्राप्ते-र्विरोधो यथा न भवति, तथा मिथ्याज्ञानकल्पितैव विभागशक्तिरनुमेया सा शक्तिः ॥

श्रुतिः छां. ६–९–२. 'इमाः सर्वाः प्रजाः सति संपद्य न विदुः सति संपद्यामहे' इति ॥

भाष्ये 'यस्माच्चैवमात्मनः सद्रूपतामज्ञात्वैव सत्संपद्यन्ते । अतस्त इह .... सत्प्रविष्टा अपि तद्भावेनैव पुनराभवन्ति' इति ॥

तस्मादत्र अग्रहणरूपाविद्यैव सुषुप्तौ मरणे प्रलये च अभूदित्येव अनुमेया, न मूलाविद्या शक्तिपदवाच्या । मूलाविद्यायास्तत्त्वाङ्गीकारे सत्संपत्तेरेव असंभवप्राप्तेः श्रुतिभाष्यवाक्यविरोधः दुष्परिहार्यः, किं च मिथ्याज्ञानोपादान-भूताया मूलाविद्याया मिथ्याज्ञानकल्पितत्वमपि न संभवतीति सुधीभिरेव ज्ञेयम् । वार्तिककारैस्तत्त्वाग्रहणरूपैवाविद्या सुषुप्तिसमाध्यादिषु अङ्गीकृता, नान्या । 'अविद्यैव तु नः शक्तिः सर्वशक्यस्य सर्जने'– इति वार्तिकोक्ता-विद्या अग्रहणरूपैवेति पूर्वमेव प्रतिपादितम् ॥

वार्तिके (४८०) अज्ञात आत्मा जगतः कारणम्, न गुणत्रयम् – इत्युक्तम् । अज्ञात आत्मा, आत्मनः अग्रहणम् इति तैरेव प्रयुक्तं द्रष्टव्यम् । अतोऽसंशयिताया अनुभवविरुद्धाया मूलाविद्याया अङ्गीकरणस्य अवकाशः सर्वथा नास्त्येव । तस्मात् सा शक्तिर्मूलाविद्यैव इत्युक्तिर्निराधारा । सा शक्तिः तत्त्वाग्रहणरूपैव ॥

(८९) संमतवादिनः – किं च सुषुप्तिसमाध्यादौ .... तदैक्यमिति न विरोधापादनम् ॥

स्वाशयः – सुषुप्तौ समाधौ च मूलाविद्यारूपसूक्ष्मशक्त्यङ्गीकारे सत्संपत्तिहानिर्भवति । आत्मैकत्वं स्पष्टमुक्तं बाधितं भवति । अन्ततो गत्वा मूलकारैरनुक्तस्यापि मिथ्याज्ञानकल्पितत्वस्याङ्गीकारेऽपि कल्पनायाः उपादानकारणत्वेन प्रतिपादितत्वात् कल्पितापि न भवतीति दोषोऽपरिहार्य एव । शक्तिरूपेणापि मूलाविद्याङ्गीकारे ऐक्यस्य विरोध एव भवति ॥

(९०) संमतवादिनः – ब्रह्मण्यविद्यासांकार्यपरिहाराय सुषुप्त्यादावपि अस्त्येव जीवब्रह्मविभाग इति कल्प्यते (विव. ६६) ।

स्वाशयः – छां. ६. सति संपद्य । बृह. प्राज्ञेनात्मना संपरिष्वक्तः इत्यादिश्रुतिभाष्येषु एकत्वमेव कारणं विशेषविज्ञानाभावस्य इत्युक्तम् । अतः सुषुप्तौ जीवब्रह्मविभागकल्पना भाष्यविरुद्धा, अनुभवविरुद्धा च । जीवत्वविनिर्मुक्तत्वं भाष्ये उक्तम् ॥

भाष्ये – 'एकत्वान्न विजानाति' । बृह. ४–३–२१, छां. ६–४. 'सुषुप्ते एव स्वं देवतारूपं जीवत्वविनिर्मुक्तं दर्शयिष्यामीत्याह – स्वप्नान्तं मे विजानीहि इति' ।

बृह. ४–३–२१. 'यत्र अविद्याकामकर्माणि न सन्ति' ।

बृह. ४–३–२२. 'अविद्याकामकर्मविनिर्मुक्तमेव तद्रूपं यत्सुषुप्ते आत्मनो गृह्यते प्रत्यक्षतः' ।

– इत्यादिश्रुतिभाष्यवाक्यविरोध एव स्यात् जीवब्रह्मविभागाङ्गीकारे सुषुप्तौ । अनुभवविरुद्धश्च जीवब्रह्मविभागाङ्गीकारः । स्वयंज्योतिष्ट्वस्य अग्रहणं एकीभावात् इति तत्रैवैकीभावत्वमुक्तम् । अतः श्रुतिविरोधश्च ।

एतावत्पर्यन्तं सुषुप्तौ मूलाविद्याभावः प्रतिपादितः, तस्या एव अभावे तत्सांकर्यप्रसक्तिरेव नास्ति, तत्परिहारार्थं जीवब्रह्मविभागोऽपि न कल्प्यः ॥

(९१) संमतवादिनः —बुद्धिपूर्वक-त्वस्य प्रकृतिलयादस्त्येव विशेषः .... शङ्काया नावसरः ॥

स्वाशयः — अग्रहणादित्रयविशिष्टः अज्ञः ; बाधिताज्ञानत्रयः ज्ञानी ; तस्मादस्त्येव विशेषः । अयं विचारस्समीचीनः मूलाविद्यानङ्गीकारे ॥

(९२) संमतवादिनः — अनादिजीवेश्वरविभागस्य बीजरूपेण अव्यक्तरूपेणापि अनङ्गीकारे 'असत एव पुनरुत्थानमसर्गोपपत्तिः' पुंस्त्वादिवत्त्वस्य सतोऽभिव्यक्तियोगात् – इति सूत्रविरोधापत्तिः 'नासतोऽदृष्टत्वात्' इति च असतो अभावात् भावोत्पत्तिप्रतिषेधाच्च । अतोऽपि ब्रह्मणि अविद्यासाङ्कर्य-परिहाराय औपाधिकजीवेश्वरविभागस्य स्वापादौ अव्यक्तान्यक्तरूपेण स्वीकारात् । न भाष्यविरोधो विवरणोपरि न प्रसरेत् ॥

स्वाशयः — सुषुप्तौ अज्ञातात्मतत्त्वसत्त्वात् न अभावाद्भावापत्तिः । पुंस्त्वादिवत्त्वस्य इत्यादिसूत्रोक्तदोषस्य अवकाशो नास्ति । मिथ्याज्ञानकल्पित-बुद्धिसंबन्धस्याङ्गीकारात् । मूलाविद्यासत्त्वे तत्साङ्कर्यपरिहाराय जीवब्रह्म-विभागः अङ्गीकार्यः इत्युक्तम् । मूलाविद्यागन्धस्याप्यभावात् । तत्साङ्कर्यमेव नास्ति । तत्साङ्कर्यप्रसक्त्यभावे जीवब्रह्मविभागकल्पनापि नास्ति । किञ्च जीवब्रह्मविभागाङ्गीकारे अनुभवविरोधः । न कोऽपि जीवब्रह्मविभागं सुषुप्तौ अनुभवति । श्रुतिविरोधः भाष्यवार्तिकविरोधः इदानीमेव प्रदर्शितः । तत्र सर्वत्र आत्मैकत्वमेव प्रतिपादितम् ॥

(९३) संमतवादिनः — एतेन इदमपि व्याख्यातं यत् 'सुषुप्तिकाले सकले विलीने तमोऽभिभूतस्सुखरूपमेति' इति मन्त्रस्य अस्य अज्ञानविषये सुषुप्ते तमोऽभिभूतत्वं तम आवृतत्वमपि यथाश्रुतमेव । तदपि प्रागुक्तदिशा अव्यक्ततयेति ज्ञेयम् ॥

स्वाशयः — तमोऽभिभूतस्य सुखरूपत्वं सर्वथा विरुद्धं खलु । किञ्च तमोऽभिभूतस्य विधेयत्वे उद्देश्यपदमेव नास्तीत्ययमपि दोषः । सकलशब्दस्य सङ्कोचकरणमपि दोषः ॥

जाग्रत्स्वप्नयोस्तमोऽभिभूतः पुरुषः सुषुप्तिकाले सकले विलीने सुखरूपमेतीत्यर्थकरणे नैकोऽपि दोषः प्रसज्यते। तत्र मूलाविद्यारूपशक्त्यङ्गीकारे अद्वैतहानिः श्रुतिविरोधः भाष्यविरोधः अनुभवविरोधश्च स्मर्तव्यः ॥

(९४) **संमतवादिनः** – श्रीविद्यारण्यमुनिभिः – 'अज्ञानं भावरूपमेव ; तत्साक्षिमात्रेणानुभूतम्, सुषुप्तादुत्थितः पुरुषः तथा स्मरति ॥

**स्वाशयः** – विद्यारण्यमुनयः पञ्चपादिकाकारानुवर्तिनः। तस्मात्तेषां वचनस्य विचारः नावश्यकः। तथापि भावरूपाज्ञानं साक्षिमात्रेणानुभूतं कथं तैर्विज्ञातम् ? तस्मात्तस्यासंभव एव ॥

(९५) **संमतवादिनः** – एतेन वार्तिककारैः स्वीकृतः अध्यासकारणीभूतस्वात्मानवबोधः, ज्ञानाभावरूपः इति केवलं व्यवहारमात्रः अपरीक्षकलोकसाधारणतया प्रयुक्तो यथाश्रुतार्थे गृहीतो निरासकारैरविचारितदृष्ट्या। सोऽयं निरस्तः। तथा च भाष्येऽपि अग्रहणज्ञानाभावविवेकाभावशब्दाः प्रयुक्ता अपि तथैव विचारदृष्ट्या तु भावपर्यवसायिनः एवेति बोध्यम्। बृहदारण्यकभाष्यं च अत्र प्रमाणम्। .... अज्ञात एव सर्वोऽर्थ इत्यादि वचनमपि ॥

**स्वाशयः** – अज्ञातात्मव्यतिरिक्तमूलाविद्यारूपमज्ञानं नास्तीत्युक्तं भाष्यवार्तिककाराणां वचनं प्रमाणत्वेन पूर्वमेवोदाहृतं स्मर्तव्यम्। निरासकारैः प्रयुक्तः स्वात्मानवबोध एव युक्तः। मूलाविद्यापरिग्रहे अनपेक्षितव्यञ्जको ज्ञानस्वरूपः आत्मा किमर्थं न जानातीत्यस्य उत्तरं नास्ति। उक्तैकत्वस्य हानिः। अनुभवविरोधश्च द्रष्टव्यः। कल्पितवस्तुनः अभावः अधिष्ठानाव्यतिरिक्तः। अभावादेः ब्रह्मव्यतिरिक्तस्य सर्वस्य कल्पितत्वात् तदभावः ब्रह्मैव। तस्माद्ब्रह्मरूपेण सर्वं सदेव, स्वेन रूपेण अनृतमेव। सर्वं ब्रह्मण्येव कल्पितम् इति ज्ञानात्पूर्वं अविद्यादशायां अस्ति नास्तीति व्यवहारः अस्त्येव। सुषुप्तावस्थायामज्ञानं नासीत् इति व्यवहारः जाग्रत्कालीनः। सोऽप्यस्त्येव।

निरासकाराणां दृष्टिरविचारकृता वा ? संमतवादिनां दृष्टिरविचारकृता वा ? सुधीभिरेव निर्णेतव्या ॥

(९६) **संमतवादिनः** – वार्तिकसारे वार्तिकानुसारेण प्रत्यक्चेतनस्य अज्ञाततायामपि प्रयोजकतया मूलभूता माया दर्शिता । तस्या एव हि तमोरूपायाः इदमावरणकृत्यम्, 'न जानामि तत्त्वमात्मनः' इति ; अथवा 'ममायमज्ञातः' इति अज्ञातचैतन्यमेव अहमित्यध्यासे वा अन्यत्र वा कार्ये मूलकारणमस्तु । अज्ञातताप्रयोजकान्तरं भाष्यकृतो वार्तिककृतो वा नान्यत् संमतमिति न शङ्कनीयम् ; यतः गौडपादकारिकायां प्र. २ भाष्ये च तत्प्रयोजिकायाः मायाया एव उदाहरणात् 'प्राणादिभिरनन्तैश्च भावैरेतैर्विकल्पितः । मायैषा तस्य देवस्य यया संमोहितस्स्वयम् ।' (१९) प्राक्तु 'जीवं कल्पयते पूर्वं ततो भावान् पृथग्विधान्' (१३) इति॰कारिकायां बाह्याध्यात्मिकभावानां अन्योन्यकार्यकारणभावकल्पनामूलं जीवकल्पनेति प्रदर्श्य, तत्रापि किं मूलमिति शङ्कायाम् अनिश्चितः आत्मा मूलमिति सदृष्टान्तं प्रदर्शितम् ।

अनिश्चिता यथा रज्जुरन्धकारे विकल्पिता ।
सर्पधारादिभिर्भावैस्तद्वदात्मा विकल्पितः ॥

इति । भाष्ये च .... निरासकृतामत्र वैमत्यं निर्मूलम् ॥

**स्वाशयः** – 'जीवं कल्पयते पूर्वम्' (२-१६). अनेवंलक्षण एव शुद्धे आत्मनि रज्ज्वामिव सर्पं कल्पयते पूर्वम् इति सर्वानुभवसिद्धम् । अध्यास एव सर्वव्यवहारप्रयोजक इत्युक्तम् ।

गीताभाष्ये च (१३-२६) 'यावत्संजायते किञ्चित्सत्त्वं स्थावरजङ्गमम् । क्षेत्रक्षेत्रज्ञसंयोगात् तद्विद्धि भरतर्षभ' ॥

भाष्ये – 'क्षेत्रक्षेत्रज्ञयोः विषयविषयिणोः भिन्नस्वभावयोरितरेतरतद्धर्माध्यासलक्षणः संयोगः क्षेत्रक्षेत्रज्ञस्वरूपविवेकाभावनिबन्धनः । रज्जुशुक्तिकादीनां तद्विवेकज्ञानाभावात् अध्यारोपितसर्परजतादिसंयोगवत् । सोऽयं अध्यासस्वरूपः संयोगः .... निश्चितविज्ञानेन अपगच्छति' इति ॥

एवं प्राणादिसर्वभावानां उत्पत्तेः व्यञ्जकत्वेन कारणत्वेन च अध्यासस्य सर्वानुभवसिद्धस्य उक्तत्वात्, किं तया असंभाव्यमानया स्वाभ्यूहमात्रसिद्धया मूलाविद्यया ? तस्या अत्र प्रवेशो नास्त्येव ।

अत्रापि अध्यासस्य कारणं विवेकाग्रहणाभाव एव इति वार्तिक एव प्रतिपादितम् ।

माण्डूक्यकारिकायां च सैव जीवत्वकल्पना किं मूला इति प्रश्नम् उद्भाव्य 'अनिश्चिता यथा रज्जुरन्धकारे विकल्पिता । सर्पधारादिभिर्भावै-स्तद्वदात्मा विकल्पितः ।' इति स्वेन विशुद्धविज्ञप्तिमात्रसत्ताद्वयरूपेणानिश्चित-त्वाज्जीवप्राणाद्यनन्तभावभेदैरात्मा विकल्पितः इत्येष सर्वोपनिषदां सिद्धान्तः । इत्युद्घोषितम् । अतः अध्यासकल्पितप्राणादिभावानां अनन्तानां अत्र माया-शब्दवाच्यत्वमुक्तम् । कथं प्राणादिभावानां मायाशब्दवाच्यत्वमिति चेत् । शृणु – अविद्यमानवस्तुनः एव मायाशब्दवाच्यत्वं या, मा, सा माया या नास्ति सा माया इति । प्राणादिभावास्तु अध्यासेन कल्पिता एवेत्युक्तम् । कल्पनायाः कल्पितवस्तूनां च परमार्थतः अभावत्वं दृष्टम् । यथा शुक्तिकायां रजतस्य तद्वत् ।

अतः मायाशब्दमात्रप्रयोगेण मूलाविद्या उक्ता इति वचनं भ्रान्तिरूप-मेव । भगवद्गीताभाष्येऽपि (७-१३) 'त्रिभिर्गुणमयैर्भावैरेभिस्सर्वमिदं जगत् । मोहितं नाभिजानाति मामेभ्यः परमव्ययम्' । गुणविकारैः रागद्वेषमोहादि-प्रकारैः पदार्थैः जगन्मोहितम् इत्युक्त्वा –

दैवी ह्येषा गुणमयी मम माया दुरत्यया ।
मामेव ये प्रपद्यन्ते मायामेतां तरन्ति ते ॥

भाष्यम् – दैवी देवस्य मम ईश्वरस्य विष्णोः स्वभूता हि यस्मात् एषा गुणमयी मम माया इत्युक्तम् । अध्यासकल्पितत्वे एव विष्णोः स्वभूतत्वं भवति । कल्पितवस्तुनः अविद्यमानत्वात् तदभावस्य अधिष्ठानरूपत्वात् । तस्मादत्रापि अध्यासकल्पिता त्रिगुणात्मिका प्रकृतिरेव मायाशब्दवाच्या । न तु मूलाविद्या, लक्षणहीना स्वाभ्यूहमात्रशरीरा इति सिद्धम् ॥

(९७) **संमतवादिनः** – उक्तविचारानुसारेण .... न जानामीत्याद्यनुभवगताज्ञानस्यापि भावत्वं सिद्धम् । 'एतेन भावाज्ञानस्वरूपासिद्धिः' इति निरासकृतामाक्षेपो निरस्तः ॥

**स्वाशयः** – संमतवादिनां निरासवचनं निराधारम् । न जानामीत्यनुभवसिद्धः, ज्ञानाभाव एव, तस्य भावत्वं कथं सिध्यति ? सद्रूपेण सर्वस्यापि भावत्वमेव तत्तद्रूपेण अनृतत्वमेव, न तु भावत्वम् । तथाच न जानामीत्यनुभवः ज्ञानाभावमेव बोधयति ॥

(९८) **संमतवादिनः** – अतो भाष्यवार्तिकोभयसंमता माया । सैव मूलाविद्या, प्रकृतिः. गौडपादानामपि संमतेयं माया । जीवकल्पनामूलम्, अहं कर्ता, अहं भोक्ता इत्यादिरूपेण जीवताकल्पिका । सैव भावाविद्या गीतोक्ता प्रकृतिः । इयमेवानिर्वचनीया अविद्याशक्तिः पञ्चपादिकोक्ता । अतः गौडपादकारिकासु मूलाविद्यापदप्रयोगविरहेऽपि मायापदेनाभिहिता । निरासकृतामत्र वैमत्यं निर्मूलम् ॥

**स्वाशयः** – भाष्यवार्तिकसंमता माया, अविद्याकल्पिता । संमतकारैः कल्पिता माया अध्यासरूपाविद्योपादानकारणीभूता जडशक्तिः, मायाशब्दमात्रेण उभयोरैक्यं नैव संभवति । वार्तिककारोक्ता अव्यक्ता माया तत्त्वाग्रहणरूपा अथवा अज्ञातात्मरूपा । संमतवादिभिः कल्पिता अग्रहणादीनामुपादानकारणीभूता । तस्मात्तयोरैक्यं नैव संभवति ।

गौडपादास्तु कण्ठरवेण – 'स्वेन विरुद्धविज्ञप्तिमात्रसत्ताद्वयरूपेण अनिश्चितत्वात् जीवप्राणाद्यनन्तभावभेदैरात्मा विकल्पितः' (मां. २-१७) इत्येषः सर्वोपनिषदां सिद्धान्तः इति स्वेन रूपेण अनिश्चितत्वमेव प्राणाद्यनन्तभावकल्पनामूलमित्युद्घोषयामासुः ।

गीतोक्ता प्रकृतिरपि अध्यासरूपाविद्याकल्पितैव, न तु अध्यासकारणीभूता इति पूर्वमेव प्रदर्शितम् ।

अतो भाष्यकारादिभिरुक्ता माया अध्यासकल्पिता । संमतवादिभिः कल्पिता माया अध्यासोपादानकारणीभूता । तस्मादुभयोर्भिन्नत्वं दृष्टमेव । अतः निरासकृतामत्र वैमत्यं समूलमेवेति ज्ञेयम् ॥

(९९) **संमतवादिनः** – उक्तविचारानुसारं सौषुप्ताज्ञानस्येव न जानामीत्याद्यनुभवगताज्ञानस्यापि भावत्वं सिद्धम् । एतेन 'भावाज्ञान-स्वरूपासिद्धिः' इति निरासकृतामाक्षेपो निरस्तः ॥

**स्वाशयः** – कल्पितवस्तुनः अभावः अधिष्ठानस्वरूप एव । यथा शुक्तिकायां कल्पितस्य रजतस्याभावः, शुक्तिकास्वरूप एव, तथा 'सुषुप्तौ न किञ्चिदवेदिषम्' इत्युत्थितस्य पुरुषस्य वचनोक्तज्ञानाभावः आत्मनस्सत्त्वं बोधयतीत्युक्तं भाष्ये न जानामीति व्यवहारकालीनाज्ञानमपि भावरूपं यदि भवेत् तर्हि भावाभावव्यवहार एव लुप्तो भवेत् । तस्मान्न जानामीत्यनेन भाव-रूपाज्ञानं नैव सिध्यति । अतः निरासकृतामाक्षेपः 'भावाज्ञानस्वरूपासिद्धिः' इति सुस्थिर एव सः । अतः न जानामीत्यस्य ज्ञानाभाव एवार्थः ॥

(१००) **संमतवादिनः** – सुषुप्ताविद्याविषये नैष्कर्म्यसिद्धिदर्शित-रीत्या (पृ. ५८) स्फुटप्रत्यक्षभानार्थं सर्वव्यञ्जकस्यापि साक्षिणः अन्तःकरण-रूपव्यञ्जकापेक्षा यथा जागरादौ तथा सुषुप्ते व्यञ्जकाभावादेव तत्रत्य बीजाविद्याविषये न जानामीति जागर इव स्पष्टानुभवो नास्तीत्युक्तम् । स्वयंज्योतिषोऽपि व्यञ्जकापेक्षा समस्त्येव । सर्वथा नास्तीति वक्तुं न सांप्रतम् । स्फुटभानार्थं जागरादौ विभक्ततया घटादिप्रत्यक्षसंपत्तयेऽपि चक्षुरादीन्द्रिया-पेक्षणात् । यद्यपि व्यञ्जकस्यापि व्यञ्जनसामर्थ्यं स्वयंज्योतिरात्मायत्तं केनभाष्यरीत्या, तथापि विविक्ततया भानाय आत्माधीनलब्धव्यञ्जन-सामर्थ्यवतामेव अन्तःकरणचक्षुरादीनामपेक्षणमवार्यं भवति । तदेतन्न निवारितं भाष्यकारैरपि । यथा सूत्रभाष्ये (२–३–१८) नित्यस्वरूपचैतन्यत्वे घ्राणाद्यानर्थक्यमिति चेत् । न । गन्धादिविशेषविषयपरिच्छेदार्थत्वात् । तथा हि दर्शयति 'गन्धाय घ्राणम्' इत्यादि । अत्र हि चैतन्यज्योतिषः

सर्वव्यञ्जकस्यापि गन्धादिविशेषानुभवार्थं घ्राणादिसार्थक्योक्तेः तदपेक्षणं न निवारितम् । एवमविद्याया विभक्ततया विशेषभानाय अन्तःकरणापेक्षा आवश्यकी । तदभावादेव सुषुप्ते विशेषानुभवाभावो अविद्याविषय इति । एतेन निरासकारोक्तम् (मू. नि. पृ. ३०) सर्वं निरस्तम् । तत्र हि 'तस्मान्मनोरथमात्रमेतद्व्यञ्जकापेक्षणमविद्यायाः '...., न च स्वयंज्योतिरूपस्य व्यञ्जकान्तरकल्पनं पेशलं भवति । तस्मान्नास्त्येव व्यञ्जकाभावादननुभवः' इति । विशेषानुभवे सुषुप्तित्वभङ्गाच्च । तादृशाविद्या नास्त्येवेति दूषणमदूषणमेव तत् । सुषुप्ते नित्यचैतन्यबोधरूपानुभवस्य अविद्याविषयेऽपि अस्फुटस्यैव स्वीकृतेः । चैतन्यातिरिक्तस्य विभक्ततया भान एव सुषुप्तिभङ्गप्रसङ्गः, नान्यथा । व्यञ्जकाभावादपि न विशेषविज्ञानम् इति निरासकृतामुक्तदूषणानि सर्वाण्यपि सुरेश्वरवचनविरुद्धानि भवन्ति ॥

वार्तिके च अविद्याविषये अस्फुटनित्यबोधानुभवोऽपि उत्थितस्य स्मृत्यनुरोधेन स्वीकृतः ।

न चेदनुभवव्याप्तिः सुषुप्तावभ्युपेयते ।
नावेदिषं सुषुप्तोऽहमिति धीः किं बलाद्भवेत् ॥ – इति ॥

एतेन निर्विशेषासंसारिस्वरूपात्मप्रतिपादने तात्पर्यनिर्णयम् 'सुषुप्त्युत्क्रान्त्योर्भेदेन' इति सूत्रे भाष्ये च कृतवतां सूत्रभाष्यकाराणां आशयविरोधोऽपि मूलाविद्यावादे निरासकारैर्दर्शितः (मू. निरा. १६०) प्रकृते न संभवति । अविद्यासद्भाववर्णनमपि सुषुप्तौ न परमतात्पर्येण । बीजभूताविद्याशेषवर्णनं तु मुमुक्षुणा तदप्यवश्यमेकान्तेन ज्ञानेन दाह्यमिति बोधनाय । यथा प्रागुदाहृतोऽव्याकृतमन्त्रार्थोऽव्याकृतनामरूपतत्त्वम् आत्माविद्येति निरूपणं मूलेन सह संसारवृक्षस्य समुच्छेदायेति भाष्यतो वार्तिकतश्च सफलतयाधिगतम् । तथैव प्रलय इव सुषुप्तावपि तत्समानायां तन्निरूपणं तथेति समस्ति अवान्तरप्रयोजनम् । तच्छेषाभिज्ञानं तु जागरे सर्गे चैवेति न विस्मर्तव्यम् ॥

**स्वाशयः –** नैष्कर्म्यसिद्धावपि (२-६६) आत्मनः 'सर्वधीव्यञ्जकस्तद्वत् परमात्मा प्रदीपकः । संनिध्यसन्निधानेषु धीवृत्तीनामविक्रियः'

इति धीवृत्तयस्सन्तु वा न सन्तु वा स्वयमविक्रिय एव सन् सर्वाः व्यञ्जयति इत्युक्तम् । मनसः सत्त्वमसत्त्वं वा स्वयमेव व्यञ्जयतीत्यर्थः मेयग्रहणार्थं मनसः, रूपग्रहणार्थं चक्षुषः, शब्दग्रहणार्थं श्रोत्रस्य अपेक्षा स्यात् । न तु मनोग्रहणार्थं चक्षुर्ग्रहणार्थं श्रोत्रग्रहणार्थं अन्यन्मनः अन्यच्चक्षुः अन्यच्छ्रोत्रम् अपेक्षितम् । अपेक्षणे तस्य तस्येति अनवस्थाप्रसङ्गात् । आत्मा तु अविपरिलुप्त दृक्स्वभावः खलु । यद्यस्फुटा मूलाविद्या स्यात् इयमस्फुटा मूलाविद्या इति गृह्णीयात् ; न तु गृह्णाति । किमर्थं न गृह्णाति ? बृहदारण्यकोक्तप्रकारेण 'न तु तद्द्वितीयमस्ति यद्विभक्तं पश्येत्' इत्यनेन द्वितीयाया मूलाविद्याया अभावादेव न पश्यतीत्येवोक्तम् । किं च अस्फुटाया मूलाविद्यायास्सत्त्वं न सुषुप्तिभङ्गकरम इति वचनं हास्यास्पदम् । स्फुटायाः अस्फुटायाः वा मूलाविद्यायास्सत्त्वमात्रमपि अद्वितीयात्मास्तित्वस्य भङ्गकरमेव खलु । सत्येव-संपन्नः इति सर्वस्यापि सत्संपन्नत्वं ब्रुवत्याः श्रुतेः विरोधः । सर्वोऽपि सुषुप्तिं अनुभवति । न कोऽप्यस्फुटाया मूलाविद्यायास्सत्त्वं जानाति । सर्वो हि लोकः सुप्तं पुरुषं अयं ब्रह्मीभूतः ब्रह्मतां गतः इति वदतीति भाष्यकारै-रेवोक्तम् । ब्रह्मैव सुप्तिस्थानमित्यपि भाष्यकारैरुक्तम् । अतो निरासकृतोक्ताः सर्वेऽपि दोषाः सुस्थिराः प्रतिष्ठिता भवन्ति । किञ्च अस्फुटा मूलाविद्या सुषुप्तौ विद्यते इति कथं ज्ञायते ? जाग्रन्मनः तत्र नासीदिति संमतवादिभिरेव अङ्गीकृतम् । तत्राविद्यमानं मनः तत्र अस्फुटा मूलाविद्या आसीदिति वक्तुपशक्तम् । तस्मात्प्रमाणाभावात् तत्र अस्फुटा मूलाविद्या आसीदिति वचनं केवलविकल्पनामात्रमित्यनुसन्धेयम् । नावेदिषं सुषुप्तोऽहमिति धीरनुभवस्वरूपस्यात्मनोऽस्तित्वं प्रतिपादयतीति भाष्यकारैरेवोक्तम् । बृ. ४–३–६.

सुषुप्तौ ज्ञानाभावरूपो वा अज्ञातात्मरूपो वा आत्माविद्यारूपो वा इतीमानि पदानि समानार्थकानि । ज्ञानाभावरूपमज्ञानं सुषुप्तिगमनात्पूर्वमेव तत्त्वज्ञानेन न बाधितम् । अतः पुनः प्रबोधो भवति । तादृशाज्ञानं ज्ञानिनः ज्ञाने । बाधितम् । अतः ज्ञानिनो मनः न संसरति इत्ययोर्भेदोऽनुसन्धेयः ॥

किञ्च, एतावता साहसेन अभ्यूहिताया मूलाविद्यायाः अनिर्वचनीयवस्तुभूताया ज्ञानबाध्यत्वासंभवादद्वैतहानिरेव कृता इत्येतन्न विस्मर्तव्यम् । कल्पितत्वाङ्गीकारात् ज्ञानबाध्यत्वं सुकरमिति न प्रत्येतव्यम् । कल्पनारूपाध्यासस्यैवोपादानकारणत्वेनाङ्गीकारात् कल्पितत्वं न संभवति । कल्पितत्वाभावादज्ञानबाध्यत्वमपि न संभवति । अतः अद्वैतहानिः द्वैतापत्तिश्च दुर्निवारैव । एतत्सम्यगालोच्य मूलाविद्या ग्राह्या वा अग्राह्या वा इति सुधीभिर्ज्ञेयम् । ब्रह्माधीना मूलाविद्या ज्ञानबाध्या भवेदिति वचनं निराधारम् अनुभवविरुद्धं च । ज्ञानं तु ज्ञापकं न कारकम् । ज्ञानं इयं आत्माधीना मूलाविद्या इति ज्ञापयत्येव, न तु तां नाशयति ॥

(१०१) **संमतवादिनः** – 'कर्मबीजाविद्याक्षेत्रो ह्यसौ संसारवृक्षः समूलः उद्धर्तव्यः इति । तदुद्धरणे पुरुषार्थसमाप्तिः' इति खलु भाष्यमत्रोदाहृतम् । नापि सौषुप्ताविद्याऽवेदकभाष्यवाक्यानां परमार्थत एव सुषुप्ताविद्याबीजसद्भावप्रतिपादनतात्पर्यमिति पञ्चपादीविवरणभामतीकारैः प्रतिपादितमस्ति । अनादिमिथ्याज्ञाननिबन्धोऽप्यात्मनि **अज्ञानवत् कल्पनिकत्वा**दाकाशकार्ण्यवदिति विवरणे सदृष्टान्तं काल्पनिकत्वोक्तेः । विशेषविज्ञानाभावस्तु सुषुप्तिकैवल्ययोस्समानतया **भाष्ये वर्णितोऽपि** सुषुप्तौ बीजाविद्याङ्गीकारे विरोधी न भवति । व्यञ्जकाभावात्तदभिव्यक्तिनिराकरणादेव तदुपपत्तेः । एतेन –

१) तदेवं स्वरूपावशेषतां सुषुप्तौ ब्रुवाणः सूत्रकारः कथमविद्यावादिपक्षं कक्षी कुर्यात् ?

२) न सुषुप्ताज्ञाननिमित्तमेव सुषुप्तात्पुनरुत्थानमिति व्याख्यातुं शक्यते ?

३) बीजसद्भाववादीनि न सुषुप्ते प्रलये वा बीजाविद्यां प्रापयन्ति । किं तु मिथ्याज्ञानवतां सत्संपत्तावपि विपरीतबुद्धिरनुवर्तत एवेति विद्यावश्यकतां बोधयन्ति ।

४) अविभागप्राप्तिस्सुषुप्तौ स्वाभाविक्येव न पुनरविद्यालेशोऽप्यस्ति ।

५) सुषुप्तेऽज्ञानं वर्तते इति वचनाभावात् ।

६) सुषुप्तिसमाधिवाक्यं नाविद्यागमकम् । किन्तु तत्प्रतिषेधकम् (मू.नि. १६२–१६३) इत्यादयोः निरासकृतामुक्तयः प्रत्युक्ताः ।

कारणाविद्यायाः क्वचिदप्यनुक्तत्वात् पूज्यपादैरित्युक्तमपि (मू. नि. १६७) प्रागेव प्रत्युक्तम् । ईशावास्यभाष्ये 'शुद्धं निर्मलम् अविद्यामलरहितम् इति कारणशरीरप्रतिषेधः' इति स्पष्टोक्तेः कारणशरीरपदेन भावाविद्याया एव असंभूतिपदार्थभूताया एव तत्रोक्तेः ॥

**स्वाशयः –** कर्मबीजाविद्याक्षेत्रः संसारवृक्षः कः ? तत्त्वग्रहणाभावनिमित्तः अध्यास एव । अध्यासः तन्मूलभूततत्त्वग्रहणाभावश्च । उभावपि तत्त्वज्ञानेन उद्धर्तव्यौ । तयोर्बाधे पुरुषार्थसमाप्तिः इति भाष्यवाक्यस्य अर्थः । तत्त्वग्रहणाभाव एव बीजमित्युक्तम् । (मां. का. १–११).

किञ्च, विवेकशालिनो विवरणकाराः एव सुषुप्ताविद्यावेदकभाष्यवाक्यानां परमार्थत एव सुषुप्ताविद्याबीजसद्भावप्रतिपादनतात्पर्यं नास्ति, अनादिमिथ्याज्ञानसंबन्धोऽप्यात्मनि अज्ञानवत्काल्पनिकत्वात् आकाशकार्ष्ण्यवत् – इति मूलाविद्यायास्तत्संबन्धस्य च काल्पनिकत्वमूचुः वस्तुतः नास्तीत्येव खलु तस्यार्थः ॥

विशेषविज्ञानाभावस्तु सुषुप्तिकैवल्ययोः समानतया भाष्ये वर्णितोऽपि बीजाविद्याङ्गीकारे विरोधी न भवतीति संमतवादिभिः वर्णितम् । अत्र मूलाविद्यारूपबीजाविद्याङ्गीकारे कथं न विरोधः ? द्वितीयायास्सत्त्वे विशेषविज्ञानमेव स्यात् । आत्मनः व्यञ्जकान्तरापेक्षाभावात् । व्यञ्जकान्तराङ्गीकारे तस्यापि व्यञ्जकान्तरापेक्षेत्यनवस्थाप्रसङ्गादिति पूर्वमेवोक्तम् ॥

किञ्च, बीजाविद्याङ्गीकारे स्फुटा वा अस्फुटा वा आत्मैकत्वस्य बाधिकैव । अस्फुटत्वान्न ज्ञायते तदज्ञानमेव बाधकम्, न तु तदस्तित्वमिति वचनं हास्यास्पदमेव । 'न तु तद्द्वितीयमस्ति' इति श्रुतिः द्वितीयाया अस्फुटाया बीजाविद्यायाः अस्तित्वमेव निषेधति । इदानीमेव बीजाविद्यायाः

12

आकाशकार्ष्ण्यवत्काल्पनिकत्वमुक्त्वा पुनस्तद्रक्षणप्रवृत्तिर्निरर्थिकैव। अङ्गीकारे निरासकारैरुक्ता दोषाः प्रसज्यन्ते एव। ईशावास्यभाष्योक्तस्तु तत्त्वग्रहणाभावरूपमेव कारणशरीरं न मूलाविद्यारूपमिति पूर्वमेव प्रतिपादितम् ॥

(१०२) **संमतवादिनः** – किञ्च, सुषुप्तौ सर्वविधशरीरसंबन्धनिराकरणमपि कारणशरीराख्याविद्याबीजाङ्गीकारेऽपि संगच्छत एव भाष्ये। कथम्? शरीरसंबन्धो नाम आभिमानिकतादात्म्यसंबन्धः। 'अहं मनुष्यः' .... इत्यादिरूपः स च जागरे स्वप्ने वा; अध्याससद्भावात्। सुषुप्तौ तु तदभावादेव प्रत्यगात्मनः न कारणशरीरसंबन्धः। न जानामीति प्रत्ययाभावात् .... एतादृशसंबन्धाभावमात्रेण अविद्याकामकर्मविनिर्मुक्तं स्वरूपं सुषुप्तेऽपि सुवचम्। अविद्यापदार्थसङ्कोचं विनैव उत्थितस्यैव सम्बन्धग्रह इति। अन्यथा मायाविद्याभेदवादिनां मते सुषुप्ते प्रलये च यावत्संसारविमोक्षं मायाङ्गीकारेण निष्प्रपञ्चस्वरूपसिद्धिर्दुर्वचैव स्यादित्यलं विस्तरेण ॥

**स्वाशयः** – सुषुप्तौ अध्यासो नास्तीति सर्वानुभवः। प्रवृत्त्यभावं अङ्गीकृत्य मनसः द्वैतस्य सर्वस्य अस्तित्वं वदतां द्वैतिनां मते द्वैतं विद्यमानमपि न गृह्यते। एतावन्मात्रेण नास्ति द्वैतमिति वचनं निराधारमिति वदतां किमुत्तरम्? ते तु वदन्ति–सुषुप्तौ जगतः अस्तित्वेऽपि ज्ञातुं मनसोऽभावात् न ज्ञायते। अस्त्येव जगत् इति ॥

अविद्यायाः अध्यासरूपत्वं वदतां जगतः अध्यासकल्पितत्वात् अध्याससमानकालीनत्वाज्जगतः सुषुप्तौ अध्यासाभावे प्रपञ्चाभावः इति निष्प्रपञ्चत्वोक्तौ किमपि बाधकं नास्ति। मायायाः अविद्यात्ववादिनां तु अविद्यासत्त्वेऽपि मनसः अभावादग्रहणम् इति वदतां एकत्वहानिः प्रपञ्चस्यापि सत्त्वं इत्यादयो दोषा दुर्निवार्याः। अध्यासवादिनां मते यावदात्मैकत्वज्ञानं न जायते तावन्मिथ्याज्ञानरूपस्य अध्यासस्य अबाधितत्वात् मिथ्याज्ञाने सति प्रपञ्चस्य सत्त्वम्, मिथ्याज्ञानाभावे प्रपञ्चाभाव इति सुषुप्तौ निष्प्रपञ्चत्वं सुखेन सिध्यति। वस्तुनः अज्ञातत्वमात्रेण नास्तीति वक्तुमशक्यमिति ज्ञेयम् ॥

(१०३) संमतवादिनः – सर्वजन्तुसाधारणे प्राकृतिकलय एव मायायां प्रकृतौ लयः प्रलयकाले, तथैव सुषुप्तेऽपि भोगप्रदकर्मोपरमनिमित्तो लयः तदा अविद्याशेषोक्तिः प्राज्ञस्य कारणबद्धत्वोक्तिश्च कारिकायां बद्धानां पुनरुत्थानदृष्ट्या । बुद्धिपूर्वकलये तु ज्ञानिनां कार्यकारणव्यवहारहेतुभूताविद्याया एव विनाशात् निरन्वयनाशात् ज्ञानिनां कार्यकारणविनिर्मुक्तशुद्धप्रत्यगात्मस्थितिः जागर इव सुषुप्तेऽपि । .... उभयविधेऽपि प्रलये समानैव प्राज्ञाज्ञयोः । सर्वमपीदं वार्तिके स्पष्टम् ॥

स्वाशयः – मायायां इत्यत्र अविद्याकल्पितमायायाम् इत्येव वक्तव्यम् । सुषुप्तेऽपि तत्त्वग्रहणाभावरूपशेषोक्तिः समञ्जसा भवति । मूलाविद्याशेषोक्तिस्तु असमञ्जसैव । 'प्राज्ञः कारणबद्धः' इत्यत्र अग्रहणरूपकारणबद्धः इत्यर्थः । बुद्धिपूर्वकलये ज्ञानेन अज्ञानस्य बाधितत्वात् निरवशेषेणाविद्या बाध्यते इत्यर्थः ॥

(१०४) संमतवादिनः – भाष्ये प्रातिभासिकरजतोत्पत्तिविषये गमकमेकमेवालम् । यत् तैत्तिरीये 'सत्यं चानृतं च सत्यमभवत्' इति मन्त्रभाष्यम् । 'सत्यं च व्यवहारविषयम्, अधिकारात्; न परमार्थसत्यम् । एकमेव हि परमार्थसत्यं ब्रह्म' (सू. २-१-१६) इह पुनर्व्यवहारविषयमापेक्षिकं सत्यम् । मृगतृष्णिकाद्यपेक्षया उदकादि सत्यमुच्यते; अनृतं च तद्विपरीतम् । एतत्सर्वमभवत् सत्यम्' इति भाष्ये अनृतपदं मृगतृष्णिकोदकपरतया तद्विपरीतपदेन व्याख्याय व्यावहारिकसत्योदकादिवत् तस्यापि सद्रूपब्रह्मपरिणामरूपोत्पत्तिः 'अभवत्' इति पदेनाभिहिता । मरुमरीचिकोदकसमानयोगक्षेमतया शुक्तिकारजतादेरप्यनृतस्य प्रातिभासिकस्योत्पत्तिः मूलाविद्यावादेऽपि दर्शिता श्रुतिभाष्यमूलिकेति ज्ञेयम् ॥

स्वाशयः – सत्यम् । अव्यभिचरितस्वरूपं ब्रह्म । सत्यं च व्यवहारविषयम्, अधिकारात्; आपेक्षिकं सत्यम् । मृगतृष्णकाद्यपेक्षया उदकादि-

सत्यमुच्यते ; अनृतं च तद्विपरीतम् । अभवत् इत्यत्र ब्रह्म तु निरवयवम्, निर्विकारम् इत्युक्तम् । तादृश ब्रह्म कथमभवत् ? सावयवं द्रव्यं परिणामादि-धर्मवद् दृष्टम् । इदं तु निरवयवम् । अपरिणामि चेतनं निरुपादानं च उपादानकारणान्तरं विनैव स्वयमेव पर्यणमयत् । इत्येतत्कथम् ? इत्यादि-संशयपरिहाराय । सृष्टौ तात्पर्यं नास्ति । सृष्ट्यादिप्रक्रियाया आत्मैकत्व-प्रतिपादने एव तात्पर्यम् । आत्माभिमुखीकरणीकृते, आत्मनि दृष्टे सृष्टिर्नास्ति । आत्मैवैकोऽव्यभिचारी । सर्वम् खिदं आत्मैव इति ज्ञानमुत्पद्यते इति कृत्वा अस्माभिर्दृष्टं जगत् अनूद्य आत्मनस्स्रष्टृत्वमुक्ते आत्माभिमुखा भवन्ति । जगत् सृष्टमिति श्रुत्या तात्पर्येण नोक्तम् । अस्माभिरेव सृष्टमिति ज्ञातम् । ज्ञातस्यैव प्रतिपादने श्रुतेरनुवादत्वमेव स्यात् । तस्मादेतद्वाक्यं न सृष्टिप्रतिपादनपरम् । नो चेत् अपरिणमस्वरूपं सद्ब्रह्म परिणामिस्वरूपं अनित्यं सावयवं विकारि स्यात् । तस्मादियं श्रुतिः सृष्टिप्रतिपादनार्था न भवति ।

किं च ज्ञानम् ज्ञापकं न कारकमित्यनुभवसिद्धम् । भाष्यकारैरपि ज्ञानं तु ज्ञापकं न कारकमित्युक्तम् । तथा च सत्यत्वेन व्यवहृतं जगत् यथा व्यवहारकाले ज्ञानाबाध्यम्, तथा अनृतत्वेन व्यवहृतं च प्रातिभासिक-मपि व्यवहारकाले ब्रह्मजन्यत्वात् ज्ञानाबाध्यमेव स्यात् ; बाध्यते । तस्मात् सद्रूपं ब्रह्म सत्यम् अनृतं च वस्तु अभवत् इत्यर्थो न वक्तव्यः ।

किन्तु, अध्यासेन सत्यं च अनृतं च अभवदिति ज्ञातं मूढजनैरित्ये-वार्थः, न तु तत्र व्यावहारिकसत्यत्वं वा प्रातिभासिकसत्यत्वं वा विद्यते । उक्तं च भगवत्पादैः सूत्रभाष्ये 'एकं च सत्त्वम्' (२–१–१६) इति । तथा गीताभाष्ये 'क्षेत्रं च मायानिर्मितहस्तिहर्म्यादिवत् स्वप्नदृष्टवस्तुवत् गन्धर्वनगरादिवत् असदेव सदिव अवभासते' (१३–२६) इति । तस्मात् व्यावहारिकसत्यत्वं जगतः नास्ति । किन्तु व्यवहारकाले जगत् सत्यमिति मूढजनानां मिथ्याज्ञानम् अभूदित्येवार्थः ।

मूलाविद्याया अनिर्वचनीयाया वस्तुभूताया ज्ञानबाध्यत्वं कथम् ? ज्ञानं तु विद्यमानं वस्तु प्रकाशयति, न नाशयति इति पृष्टे, यथा

रज्जुसर्पाद्यनिर्वचनीयवस्तु ज्ञानबाध्यं तथा इयमपि अनिर्वचनीया मूलाविद्या ज्ञानबाध्या भवतीति दृष्टान्तप्रदर्शनार्थं मूलाविद्यावादिभिरेव प्रकल्पिता इयमनिर्वचनीय वस्तूत्पत्तिप्रक्रिया। मूलाविद्यावादिभिर्विना न केनाप्यङ्गीकृतेय मनिर्वचनीय वस्तूत्पत्तिप्रक्रिया ॥

१) भाष्यकारस्तु सूत्रभाष्ये 'प्रत्येत्येव हि केवलं रजतमिति न तु तत्र रजतमस्ति' (४-१-५) इति। अत्र मूलाविद्यावादिनः 'न तु तत्र व्यवहार-सिद्धं रजतमस्ति। किन्तु प्रातिभासिकरजतं वर्तत एव' इत्यर्थं कुर्वन्ति। सामान्यतः प्रयुक्तस्य रजतशब्दस्य रजतद्वयार्थकत्वं प्रकल्प्य एकस्य अस्तित्वम्, अन्यस्य निषिद्धत्वं च यदुच्यते तदन्याय्यम्। ज्ञानं तु इदमनिर्वचनीयरजतमिति प्रकाशयेत् केवलम्, न निषेधयेत्। तन्नाशार्थं अनिर्वचनीयदण्डमेव साधनं स्यात्।

२) छा. भा. ६-२-३. 'रज्जुरेव सर्पबुद्ध्या सर्प इत्यभिधीयते, केवलं सर्पबुद्धिरेव, न तु सर्पोऽस्ति'- इत्युक्तम्।

३) सू. भा. १-२-८. 'न हि बालैस्तलमलिनतादिभिर्व्योम्नि-विकल्प्यमाने तलमलिनतादिविशिष्टमेव व्योम परमार्थतो भवति'। अत्रापि बालानां विकल्प एव, न तु वस्त्वस्ति इत्युक्तम्।

'न हि तिमिरोपहतनयनेन अनेक इव चन्द्रमा दृश्यमानोऽनेक एव भवति'। अत्रापि अनेकचन्द्रत्वं निषिध्यते।

गौ. का. २-३२. 'न हि मनोविकल्पनाया रज्जुसर्पलक्षणाया रज्वां प्रलय उत्पत्तिर्वा। न च मनसि रज्जुसर्पस्य उत्पत्तिः प्रलयो वा; न चोभयतो वा'।

अत्र अनिर्वचनीयवस्तूत्पत्तिर्निषिद्धा।

बृ. भा. १-४-७. 'यथा गृह्यमाणाया अपि शुक्तिकाया विपर्ययेण रजताभासाया अग्रहणं विपरीतज्ञानव्यवधानमात्रम्। तथा ग्रहणं ज्ञानमात्र-मेव विपरीतज्ञानव्यवधानापोहार्थत्वाद् ज्ञानस्य ॥

अत्र विपरीतज्ञानमात्रं बाध्यते सम्यग्ज्ञानेन इति स्पष्टमुक्तम्। न तु अनिर्वचनीयवस्तु बाध्यत इत्युक्तम् ॥

तस्मादनिर्वचनीयवस्तूत्पत्तिवादः अनिर्वचनीयवस्तुभूताया मूलाविद्याया ज्ञानबाध्यत्वप्रदर्शनार्थं दृष्टान्तत्वेन मूलाविद्यावादिभिरेव कल्पितः । लोकेऽपि न कैश्चिदप्यङ्गीकृतः । अतो सम्मतवादिभिरनिर्वचनीयवस्तूत्पत्तिप्रतिपादने कृतः प्रयत्नः निरर्थक एवेति ज्ञेयम् । मूलाविद्या एका वा अनन्ता वा – इतिविचारे, प्रयत्नो निष्फल एवेति स्वाभिप्रायः न दत्तः ॥

(१०५) **संमतवादिनः** – कथं विद्याविद्ययोः एकाधिकरणत्वा-योगात् (मू. नि. २१) इत्याक्षेपो निरस्तः । बाधकतत्त्वज्ञानेन बाध्याविद्यायाः निवृत्तेर्मूलाविद्यावादिभिरपि स्वीकृतत्वात् प्रारब्धकर्मशेषाद्भयकम्पादिवत् संस्कारतः स्मरणमात्रेण अनुवृत्तेः **न मोहेन** विरोधाभावात् । ज्ञानाज्ञानयो-रेव विरोधित्वात् अन्यथा कथं गीताद्युक्तजीवन्मुक्तव्यवहारः सङ्गच्छतामिति निरासकाराः प्रष्टव्याः ॥

**स्वाशयः** – सू. भा. १-१-४, छां. ८-१२-१. 'अशरीरं वाव सन्तं न प्रियाप्रिये स्पृशतः' इति । 'शरीरे पतिते अशरीरत्वं स्यात् न जीवतः इति चेन्न । सशरीरत्वस्य मिथ्याज्ञाननिमित्तत्वात् । न ह्यात्मनः सशरीरत्वाभिमानलक्षणं मिथ्याज्ञानं मुक्त्वा अन्यतः सशरीरत्वं शक्यं कल्प-यितुम् । नित्यमशरीरत्वम् अकर्मनिमित्तत्वादित्यवोचाम । तत्कृतधर्माधर्म-निमित्तं सशरीरत्वमिति चेन्न, शरीरसंबन्धस्यासिद्धत्वात् धर्माधर्मयोरात्मकृत-त्वासिद्धेः । शरीरसंबन्धस्य धर्माधर्मयोस्तत्कृतत्वस्य च इतरेतराश्रयत्वप्रसङ्गा-दन्धपरम्परैषाऽनादित्वकल्पना । मिथ्याभिमानः संबन्धहेतुः प्रत्यक्षः । तस्मात् मिथ्याप्रत्ययनिमित्तत्वात्सशरीरत्वस्य सिद्धं जीवतोऽपि विदुषोऽशरीरत्वम्' । इत्युक्तरीत्या मिथ्याभिमाननिमित्तमेव सशरीरत्वम् । मिथ्याभिमानस्तु सम्यग्ज्ञानेन निरस्तम् । मिथ्याभिमाने सम्यग्ज्ञानेन बाधितेत न्निमित्तं सशरीरत्वमपि बाधितमिति प्रत्येतव्यम् । अत एव भाष्यकारैरध्यासभाष्ये सत्यानृते मिथुनीकृत्येत्युक्तम् । सत्यम् आत्मा अनृतं शरीरं तयोर्मिथुनीकरण-मेव अध्यासः ॥

अथ एवोक्तं भाष्यकारैः (बृह. १-४-९) 'विद्याकालानन्तरितत्वात् फलस्य' इति। 'अहं सशरीरी' इति मिथ्याज्ञानं यदासीत् तत् 'अहंब्रह्मास्मि' इति सम्यग्यज्ञानेन बाध्यते इत्यर्थः। अविद्वत्पुरुषैस्तु 'अहं शरीरी' इत्येव ज्ञायते। छान्दोग्येऽपि (६-४-२) 'तस्य तावदेव चिरं यावन्न विमोक्ष्येऽथ संपत्स्ये' इति। मूलाविद्यावादिनां मते भिन्नाधिकरणस्थयोर्ज्ञानाज्ञानयोर्ज्ञानेनाज्ञानबाधोऽसङ्गत एव, मूलाविद्याया ज्ञानविरोधित्वमपि असङ्गतम्॥

ब्रह्मविदः जीवनादिप्रयोजनभावेऽपि प्रवृत्तफलानां कर्मणामवश्यमेव फलोपभोगः स्यादिति। भाष्ये – मुक्तेषुवत्तस्य तावदेव चिरमिति युक्तमेवोक्तम् इति यथोक्तदोषचोदनानुपपत्तिः। ज्ञानोत्पत्तेरूर्ध्वं च ब्रह्मविदः कर्माभावं अवोचाम। 'ब्रह्मसंस्थोऽमृतत्वमेति' इत्यत्र। तच्च स्मर्तुमर्हसि। ज्ञानसमकालमेव ब्रह्मप्राप्तेरुक्तत्वात् मिथ्याज्ञानेन सशरीरी अभूत् मिथ्याज्ञानस्य सम्यग्ज्ञानेन बाधितत्वादहमशरीरी ब्रह्मैव इत्यनुभवं लभते। प्रारब्धकर्मणो वेगक्षयपर्यन्तं जीवतीति सिद्धम्। अतो ज्ञानोत्तरमपि देहपातपर्यन्तम् अविद्यालेशो वर्तते इत्येतन्निराधारमेव॥

मूलाविद्यावादिनां मते मूलाविद्या भूतभौतिकरूपेण परिणता देहरूपं प्राप्ता। अतो यावद्देहं तदुपादानभूता मूलाविद्या केनापि रूपेणाङ्गीकर्तव्या। नो चेत् कारणाभावे कार्याभावात् ज्ञानोत्पत्तिक्षण एव संपूर्ण अविद्याबाधाङ्गीकारे शरीरपतनमेव स्यात्। तन्निवारणार्थं शरीरस्थित्यर्थं अविद्यालेशोऽङ्गीकर्तव्यः। ज्ञानेन अविद्याबाधोऽपि अङ्गीकर्तव्यः इत्युभयथा सङ्कटप्राप्तिः। तत्परिहारार्थं अविद्यालेशः अङ्गीकर्तव्यत्वेन प्राप्तः, तेन अद्वैतसिद्धिकारैरुक्तप्रकारेण विदेहताकालीन एव मोक्षो मुख्यो मोक्षः जीवन्मुक्तिस्तु गौणी इत्यकामेनापि वक्तव्यम्। जन्मरहिताया अविद्यायाः नाशो वक्तव्यः। स च प्रमाणविरुद्धः। सृष्टेः पूर्वमात्मैकत्वस्य हानिः इत्यादिदोषाश्च अपरिहार्याः। अध्यासवादिनां तु– शरीरम्, शरीरसंबन्धः भूतभौतिकप्रपञ्चः सर्वोऽप्यध्यासकल्पितः अध्याससत्त्वे सर्वस्यापि सत्त्वम्। ज्ञानेन अध्यासबाधे सर्वस्यापि बाध एव॥

अत एव भगवद्गीतायां (४–२४) 'ब्रह्मार्पणं ब्रह्महविः ब्रह्माग्नौ ब्रह्मणा हुतम् । ब्रह्मैव तेन गन्तव्यं ब्रह्मकर्म समाधिना ॥' इति ॥

यस्यैव अविद्यावतः अर्पणादिषु अर्पणादिबुद्धिरासीत् तस्यैव अध्यासरूपाविद्यापगमे अर्पणादिषु ब्रह्मबुद्धिरेव भवतीत्यर्थः । तस्मादज्ञानी आत्मव्यतिरिक्तः प्रपञ्चः अस्तीत्येव विजानाति । ज्ञानेन अज्ञाने बाधिते अध्यासरूपाज्ञानकल्पितस्सर्वोऽपि बाधितो भवति । सर्वं ब्रह्मैवेति ज्ञानमुत्पद्यते इत्यर्थः ॥

निरासाकारैस्तत्त्वा एते दोषा अपरिहार्या एव –

१) भाष्ये दर्शिताः प्रकृतिमायादिशब्दाः अविद्याकल्पिते अनिर्वचनीये संसारप्रपञ्चबीजभूते नामरूपे एव अभिलपन्ति, न पुनर्मूलाविद्याम् ।

२) अविद्यामायाशब्दयोरर्थः भिन्न एव ; अविद्या – मिथ्याज्ञानरूपा, माया – अविद्याकल्पितनामरूपबीजात्मिका । सकलसंसारहेतुः आत्मानात्माध्यासरूपाविद्या । न तदतिरिक्ता मूलाविद्या नाम काचित् ।

३) क्वचिन्माण्डूक्यादौ भाष्ये अध्यासहेतुतया निर्दिष्टं अज्ञानं तत्त्वाग्रहणमेव, न भावाविद्या । गीताबृहदारण्यकभाष्ययोर्विवेकाभाव-ज्ञानाभाव-शब्दाभ्यां तस्यैवार्थस्य वाचोक्तेः ।

४) अग्रहण-विपरीतप्रत्ययसंशयाख्याविद्यात्रयात् अन्या न काचिदपि चतुर्थी भाष्ये वार्तिके वा परिगण्यते ।

५) जगदुपादाननिमित्तभूता अनिर्वचनीया भावाविद्या भाष्ये वार्तिके वा कुत्रापि विवरणे इव न विचारिता ।

६) केवलसाक्षिमात्रवेद्ये अविद्याविषये प्रत्यक्षादिप्रमाणोपन्यासो निरर्थको विरोधी च ।

७) 'सुखमहमस्वाप्सम्', 'न किञ्चिदवेदिषम्' इत्यादिसौषुप्तानुभवपरामर्शोऽपि न मूलाविद्यां विषयीकरोति । अपि तु ज्ञानाभावमेव । अतोऽपि तन्न प्रमाणम् ।

८) प्रस्थानत्रये भाष्ये सुषुप्तौ सर्वथा अविद्यानिराकरणेन तद्विनिर्मुक्तं आत्मस्वरूपमद्वैतमेव दर्शितम् । तत्राप्यविद्यास्वीकारे अद्वैतासिद्धिः ।

९) तत्त्वज्ञानेन अविद्यानिवृत्तौ न कोऽपि दृष्टान्तः ।

१०) अनिर्वचनीयरजतोत्पत्तिरपि न भाष्यसंमता ; सर्वथा भाष्ये तन्निराकरणात् । अतो अनिर्वचनीयरजताद्युत्पत्तिहेतुरपि न भावाविद्या ; तन्निवृत्तौ वा न शुक्तितत्त्वज्ञानं दृष्टान्तं संभवति ।

११) आत्मवदवस्थात्रयेऽपि अनपायिन्याः भावाविद्यायाः नित्यायाः विद्ययापि न निवृत्तिर्भाविनी ।

१२) तत्त्वज्ञानोत्तरमपि अविद्यालेशाङ्गीकारो भाष्यविरोधी ।

१३) 'मूलाविद्या आत्माश्रया-नान्तःकरणाश्रया' इति वादो भाष्यविरुद्धः ।

१४) भावाज्ञानस्वरूपासिद्धिः ।

१५) व्यावहारिक्यपि मूलाविद्या स्वापे न स्वीकार्या ।

१६) द्वैतस्य मिथ्यात्वे हेत्वभावः ।

– इत्यादिदोषाः सुस्थिरा एव भवन्ति मूलाविद्यावादे ॥

'आत्मन आकाशः संभूतः' इत्यादि श्रुत्युक्तं प्रत्यक्षादिप्रमाणसिद्धं अचेतनात्मकं विकारि अनित्यं सावयवं च जगत् दृष्ट्वा अस्य जडात्मना नित्येन केनचिदुपादानकारणेन भवितव्यम्, यथा घटादेर्मृदादि-इत्यालोच्य सुप्रसिद्धदर्शनकाराः स्वस्वविचारशक्त्यनुसारेण भिन्नं भिन्नं जगतः उपादानकारणं कल्पयामासुः । तद्यथा – नैयायिकवैशेषिकास्तु परमाणुं अचेतस्य जगतः उपादानकारणमिति निर्णयामासुः । साङ्ख्ययोगदर्शनकारास्तु-प्रधानं सत्त्वरजस्तमोगुणसाम्यरूपमचेतनस्य जगतः उपादानकारणमिति जगुः । पूर्वमीमांसकाश्च प्रकृतिं कारणमिति प्रतिपादयामासुः । उत्तरमीमांसकेषु विशिष्टाद्वैतिनः श्रीमद्रामानुजाचार्याः सूक्ष्मा अचित् परिणाम्युपादानकारणमिति प्रतिपादयामासुः । माध्वद्वैतिनस्तु प्रकृतिमुपादानकारणमिति निर्णयं चक्रुः । इमे सर्वेऽपि अचेतनरूपजगतस्सत्यत्वमेव वदन्ति, किन्तु अनित्यत्वं वदन्ति ।

जगदनृतत्ववादिनः आधुनिकाद्वैतवेदान्तवादिनोऽपि ईश्वराधीनभूतां नामरूपबीजभूतां अनिर्वचनीयां ज्ञानबाध्यां अचेतनरूपामविद्यां जगदुपादानकारणमिति प्रतिपादयन्ति । तन्मूलकैव ब्रह्मणो जगत्कारणत्वोक्तिरित्यपि वदन्ति । किञ्च तस्याः ईश्वराधीनत्वात् ज्ञानबाध्यत्वमपि वदन्ति । श्रीमद्रामानुजाचार्यैरपि सूक्ष्मचितः परमात्माधीनत्वमङ्गीकृत्यापि तस्याः ज्ञानबाध्यत्वं नोक्तम् । ज्ञानं वस्तुनः कीदृशस्यापि बाधकं न भवति, यतः यादृशं वस्तु वर्तते अनिर्वचनीयं वा निर्वचनीयं वा भवतु तादृशमिति वस्तुनः प्रकाशकमेव ज्ञानम्, न तु तद्बाधकमित्यतः इदं वस्तु परमात्माधीनमित्येव ज्ञापयति, न तु तत् बाधयति । यदि मूलाविद्या उपादानकारणत्वेन अङ्गीक्रियते, तदनन्यत्वाधिकरणन्यायेन उपादानकारणीभूता मूलाविद्यैव परमार्थभूता इत्येव खलु निर्णयः संभवति । तथा च ब्रह्मणः गतिसामान्यत्वं नास्तीत्येव वक्तव्यं भवति ॥

किञ्च वस्तुनः ज्ञानबाध्यत्वाभावात् ईश्वराधीनापि ज्ञानबाध्या न भवतीति हेतोर्द्वैतमेव परमार्थमिति संपद्यते ॥

किञ्च, मूलाविद्याया प्रपञ्चस्य उपादानकारणत्वेन अङ्गीकारे प्रपञ्चान्तर्गतस्य देहस्यापि उपादानकारणत्वात् देहपातपर्यन्तं सर्वथा ज्ञानबाध्यत्वमसंभवमेव स्यात् । कार्यसत्त्वे कारणस्य असत्यत्वासंभवात् । देहपातादूर्ध्वमेव मूलाविद्याया नाशः स्यात्, न ज्ञानसमकाले अतः 'अत्र ब्रह्म समश्नुते' इति श्रुतिविरोधः । यत्कालं ब्रह्मज्ञानं तत्कालं ब्रह्मप्राप्तिः इति भाष्य वाक्यस्य च विरोध एव भवति । मूलाविद्यानाशानन्तरमेव 'एकमेवाद्वितीयं ब्रह्म' इति वक्तव्यं स्यात् ; सर्वदा एकमेव ब्रह्म इति वक्तुं अशक्यं भवति । एतत्सर्वं समाधानचित्तैर्विचार्य मूलाविद्या ग्राह्या वा अग्राह्या वा – इति निर्णेतव्या । किञ्च मूलाविद्या ब्रह्माश्रिता ब्रह्मविषया ; ज्ञानं तु जीवस्य अन्तःकरणनिष्ठम् ? भिन्नाधिकरणयोर्ज्ञानाज्ञानयोर्ज्ञानबाध्यत्वमपि न संभवति । मूलाविद्यायाः अस्तित्वे श्रुतिस्मृतिप्रामाण्यं नास्ति । भाष्यकारैरुक्तमिथ्याज्ञाननिमित्तः इति पदस्य मिथ्या च तदज्ञानं च मिथ्याज्ञानमिति पदच्छेदं कृत्वा मिथ्याशब्दस्य अनिर्वचनीयार्थकत्वमुक्त्वा अज्ञानपदस्य जडशक्तिरिति साहसेन

अर्थं कृत्वा निमित्तपदस्य उपादानार्थकत्वं प्रकल्प्य मिथ्याज्ञाननिमित्तः इत्यस्य अनिर्वचनीयभावरूपजडशक्तिः इति पञ्चपादिकाकाराः अर्थं कल्पयामासुः। एतदेव मूलाविद्यायास्सत्त्वे प्रमाणं नान्यत्प्रमाणं विद्यते। भामतीकारास्तु-मिथ्याज्ञानं-अध्यासः, निमित्तः-निमित्तः एवार्थः इति अध्यासनिमित्तः इत्येव अर्थं वर्णयामासुः॥

'गति सामान्यात्' (१-१-१०) इति सूत्रभाष्ये। 'समानैव हि सर्वेषु वेदान्तेषु चेतनकारणावगतिः इत्यात्मनः कारणत्वं दर्शयन्ति सर्वे वेदान्ताः॥' इति चेतनकारणत्वं प्रतिपादितम्। 'जन्माद्यस्य यतः' (सू. १-१-२) इति सूत्रभाष्ये 'अस्य जगतः ........ जन्मस्थितिभङ्गं यतः सर्वज्ञात् सर्वशक्तेः कारणाद्भवति तद्ब्रह्म' इति ब्रह्मण एव कारणत्वं प्रतिपादितम्।

सू. १-४-२३. 'प्रकृतिश्च प्रतिज्ञादृष्टान्तानुपरोधात्' इति सूत्रभाष्ये उपादानकारणं च ब्रह्म अभ्युपगन्तव्यं निमित्तकारणं च इति ब्रह्मण एवोपादानकारणत्वं निमित्तकारणत्वं च प्रतिपादितम्। एवं स्थिते उपादान-कारणं मूलाविद्या तन्मूलकमेव ब्रह्म कारणमिति मूलाविद्यावादिनः वदन्ति। तत्कथं संगच्छते?

भाष्यवार्तिककारास्तु ब्रह्मैव अद्वितीयं परमार्थवस्तु, कालदेशकार्य-कारणधर्माधर्माद्यतीतं अखण्डं सच्चिदानन्दस्वरूपं तत्। तदतिरिक्तं किञ्चन नास्त्येव। त्रिष्वपि कालेषु देशकालादीनामभावेऽपि तद् ब्रह्म अव्यभिचरित-स्वरूपं अद्वयं शिवं शान्तं सर्वेषामात्मभूतं च वर्तते इति प्रतिपादयन्ति॥

जगत् प्रमाणसिद्धं सर्वैरनुभूयते। भूमौ स्थित्वा भूमिर्नास्तीति वदतां वचनं अप्रमाणमित्याद्याक्षेपे प्राप्ते प्राहुर्भगवन्तो भाष्यकाराः (अध्यास-भाष्ये) 'कथं पुनरविद्यावद्विषयाणि प्रत्यक्षादीनि प्रमाणानि शास्त्राणि च इति? उच्यते। देहेन्द्रियादिषु अहंममाभिमानरहितस्य प्रमातृत्वाद्यनुपपत्तौ प्रमाणप्रवृत्त्यनुपपत्तेः। न हि इन्द्रियाण्यनुपादाय प्रत्यक्षादिव्यवहारः संभवति। न चाधिष्ठानमन्तरेण इन्द्रियाणां व्यवहारस्संभवति। न चानध्य-स्तात्मभावेन देहेन कश्चिद्व्याप्रियते। न चैतस्मिन् सर्वस्मिन्नसति असङ्गस्यात्मनः

प्रमातृत्वमुपपद्यते । न च प्रमातृत्वमन्तरेण प्रमाणप्रवृत्तिरस्ति, तस्मादविद्यावद्विषयाण्येव प्रत्यक्षादीनि प्रमाणानि शास्त्राणि च ' इत्यध्यासरूपाविद्यावानेव प्रत्यक्षादीनां प्रमाणत्वं वदति । अविद्यावता दृष्टः प्रपञ्चः परमार्थो न भवति, बाधिताविद्यः प्रपञ्चं न पश्यति । ब्रह्मैव सर्वमिति पश्यति – इति प्रतिपादयामासुः । तत्र का नाम सा अविद्या इति प्रश्नस्य उत्तरत्वेन ' तमेतमेवंलक्षणमध्यासं पण्डिता अविद्येति मन्यन्ते ' इति आत्मानात्मनोरितरेतराध्यासं सर्वानुभवसिद्धं सर्वव्यवहारकारणं सर्वशास्त्रीयव्यवहारस्यापि कारणं मोक्षशास्त्रव्यवहारस्यापि कारणमित्यध्यासस्यैव कारणत्वं प्रदर्श्य, इदमध्यासरूपाज्ञानं नैसर्गिकम् इत्यप्युक्तम् ' अन्योन्यस्मिन् अन्योन्यात्मकतामन्योन्यधर्मांश्चाध्यस्य ' इत्यनेन सर्वानुभवसिद्धोऽयमध्यासः न प्रमाणान्तरसाध्यः प्रमाणानां प्रमाणत्वमध्यासानुग्रहसिद्धमिति प्रदर्श्य 'एवमयमनादिरनन्तो नैसर्गिकोऽध्यासो मिथ्याप्रत्ययरूपः कर्तृत्वभोक्तृत्वप्रवर्तकः सर्वलोकप्रत्यक्षः' इत्यनेन अध्यासस्यानादित्वमनन्तत्वं कर्तृत्वभोक्तृत्वप्रवर्तकत्वं सर्वानुभवसिद्धत्वं अनाद्यनन्तत्वं च प्रतिपाद्य ' अस्यानर्थहेतोः प्रहाणाय आत्मैकत्वविद्याप्रतिपत्तये सर्वे वेदान्ताः आरभ्यन्ते ' इत्युद्घोषयामासुः । अनेन आत्मैकत्वविद्याबाध्या अध्यासरूपाविद्यैव । अध्यासस्य अनुभवरूपत्वाद्व्यवहारे अग्रहणान्यथाग्रहणसंशयग्रहणरूपत्वात् । तद्बाधार्थमनुभवपर्यन्तमेव आत्मैकत्वज्ञानमपेक्षितम् इति प्रतिपादयामासुः । तस्मात् अध्यासरूपाविद्यैव अनर्थरूपसंसारकारणं अनुभवपर्यन्तात्मैकत्वविद्यैव तस्याः बाधकम् । बाधिते तु अध्यासे अग्रहणरूपनिमित्तेन सह इहैव इदानीमेव ज्ञानप्राप्तिक्षण एव ब्रह्मप्राप्तिः । ब्रह्मप्राप्त्यनन्तरं ब्रह्मव्यतिरिक्तं किञ्चिदपि न दृश्यते जगत् सर्वं ब्रह्मैव भवति । तदानीं अस्य जगतः कारणप्रश्नादीनामनवसरः । ज्ञानी अद्वितीयात्मानन्दरूपेणैवावतिष्ठते ॥

ब्रह्मात्मैकत्वज्ञानात्पूर्वम् अध्यासस्याबाधितत्वात् सर्वोऽपि व्यवहारः अप्रतिहत एव दृश्यते । यथा आकाशस्य एकत्वेऽपि निरवयवत्वेऽपि अखण्डत्वेऽपि आकाशः एक एव निरवयवः अखण्डः इति ज्ञानात्पूर्वं

घटाकाशकरकाकाशमहाकाशादिभेदव्यवहारो औपाधिको दृश्यते, तथा ब्रह्मात्मैकत्वज्ञानात्पूर्वं अहं जीवः परिच्छिन्नः कर्ता, भोक्ता, कर्मफलभोगार्थं स्वर्गनरकादीन् प्रति गन्ता। दासः किङ्करः ध्याता उपासकः, परमात्मा तु सर्वव्यापी, मत्तो भिन्नः सर्वज्ञः सर्वशक्तः कर्मणां फलदाता सर्वात्मना सेव्यः ध्येयः उपास्यः ज्ञेयश्च इत्यादिभेदव्यवहारः सन्ततो वर्तते। अतोऽस्याध्यासस्य सर्वव्यवहारास्पदस्य बाधार्थं मुमुक्षुः कामचार-कामवाद-कामभक्षणादिनिषिद्ध-कर्माणि त्यक्त्वा शास्त्रीयं कर्म श्रद्धाभक्तिपुरस्सरमनुतिष्ठन् तदपि कर्म सङ्गत्रय-परित्यागपूर्वकम् ईश्वरार्पणबुद्ध्या ह्यनुतिष्ठन् सर्वात्मानं सर्वेश्वरं परमात्मानमेव सन्ततं ध्यायन् भक्तिपुरस्सरं उपासनां कुर्वन् शुद्धचित्तस्सन् देहादिषु अहं ममेत्यादिरूपमध्यासं अहं ब्रह्मास्मीत्यनुभवरूपज्ञानेन विधूय ब्रह्मनिष्ठो भूत्वा सुखी भवेदित्येष एव सर्वोपनिषदां सिद्धान्तः ॥

अध्यासवादिनोऽपि अद्वैतं परमार्थमिति वदन्ति। मूलाविद्या-वादिनोऽपि परमार्थं अद्वैतं वदन्ति। उभयपक्षेऽपि फलं एकमेव। प्रक्रियाभेदे को दोषः? ग्रामप्राप्तिर्मुख्या। मार्गभेदस्तु सह्यः। किमर्थं मूलाविद्या-वादिनः अध्यासवादे दोषं आरोपयन्ति? अध्यासवादिनः मूलाविद्यावादे दोषमुद्घाटयन्ति? यदि फलविषये विवाद स्यात् तर्ह्येव दोषारोपणं समञ्जसं स्यात्। न हि फलविषये विवादोऽस्ति–इति शङ्कायां इदमुत्तरम् ॥

मूलाविद्यावादे जगदुपादानकारणभूता मूलाविद्या अनादिसिद्धा। वर्तमानकालेऽपि आत्मैकत्वज्ञानोत्पत्तिपर्यन्तं मूलाविद्या वर्तते, तत्कार्यभूत-प्रपञ्चोऽपि वर्तते। ज्ञानोत्पत्त्यनन्तरं मूलाविद्या यदा ज्ञानबाध्या भवति, तदनन्तरं मूलाविद्या तत्कार्यभूतप्रपञ्चोऽपि न भविष्यतः सर्वमद्वैतात्मस्वरूपं भवति इति वदन्ति। आत्माधीनायाः अनादिभूताया वस्तुभूतायाः मूला-विद्याया ज्ञानबाध्यत्वप्रतिपादनं अदृष्टचरं असंभाव्यं च ॥

ज्ञानस्वरूपं भगवत्पादाः एवं जगुः (सू. भा. ४-१-१३)। 'पूर्वसिद्धकर्तृत्वभोक्तृत्वविपरीतं हि त्रिष्वपि कालेषु अकर्तृ अभोक्तृत्वस्वरूपं

ब्रह्माहमस्मि । नेतः पूर्वमपि कर्ता भोक्ता अहमासम् । नेदानीं नापि भविष्यत्काले इति ब्रह्मविदवगच्छति ' ॥

मूलाविद्यावादे पूर्वमपि अविद्यापरिणतं शरीरमभूत्, जगदप्यभूत कर्तृत्वं भोक्तृत्वमपि अभूत् । इदानीमपि ज्ञानोत्पत्तिपर्यन्तं सर्वं वर्तत एव । अन्ते ज्ञानेन बाध्यते इति ॥

कथं विद्यमानस्यैव अभावः संगच्छते ? विद्यमानस्य वस्तुनः ज्ञान-बाध्यत्वं कथमिति प्रश्नः इदानीं मास्तु । ज्ञानबाध्यत्वाङ्गीकारेऽपि तत्पूर्वं कथं नासीदिति प्रश्नस्योत्तरं वक्तुमशक्यम् । ' एकमेवाद्वितीयं ब्रह्म ' इति तु ज्ञानोत्तरकाले स्यात् । ज्ञानोत्पत्तेः पूर्वं मूलाज्ञानं वर्तते, तत्कार्यमपि वर्तते । कथं किमपि नासीदिति वक्तुं शक्यम् । श्रुतिस्तु नासीत्, नास्ति न भविष्यति ' ब्रह्मैव एकं सत्यम् ' इति वदति । तस्मादात्मैकत्वज्ञानोत्पत्तिपर्यन्तं द्वैतमेव, ज्ञानोत्पत्त्यनन्तरमेव अद्वैतं परमार्थसत्यम् इति वक्तव्यं स्यात् । तदा जन्य-स्याद्वैतस्य नित्यत्वं न सिध्यति । तस्मादयं मूलाविद्यावादः दुष्टः अश्रौतः अमङ्गलकरः ॥

अध्यासवादे तु अध्यासरूपभ्रान्तिकल्पितः प्रपञ्चः । भ्रान्तिसत्त्वे प्रपञ्चस्य सत्त्वम् । आत्मानात्मनोरितरेतराध्यासरूपभ्रान्त्यभावे प्रपञ्चाभावः सुषुप्तिसमाध्योर्दृष्टत्वात् । भ्रान्तिकल्पितः प्रपञ्चः तन्मूलकप्रासक्तृत्व-भोक्तृत्वरूपः संसारः कदापि नासीदिति वक्तुं शक्यम् । यत्र यदध्यासः तत्कृतेन दोषेण गुणेन वा अणुमात्रेणापि आस्पदभूतं ब्रह्म न संबध्यते इत्यतः ब्रह्म एकमेवाद्वितीयं परमार्थभूतमिति वक्तुं शक्यते – इति अध्यासवादः निर्दुष्टः अनुभवप्रधानः श्रौतः मङ्गलकरः एतदर्थप्रकाशनायैव इयं प्रवृत्तिरिति सुधीभिर्ज्ञेयम् ॥

सत्यम् ! शिवम् ! सुन्दरम् !

# पूर्वोक्तमुख्यविषयाणां संग्रहवाक्यानि

१) भाष्यवार्तिककारैरविद्याशब्दः अग्रहण-अन्यथाग्रहण-मिथ्याग्रहणार्थकत्वेनैव प्रयुक्तः । तत्रापि भाष्यकारैः मुख्यवृत्त्यान्यथाग्रहणार्थकत्वेन, वार्तिककारैरग्रहणार्थकत्वेन प्रयुक्तः, अनिर्वचनीयनामरूपबीजभूतमूलाविद्यार्थकत्वेन कुत्रापि नैव प्रयुक्तः । वार्तिककारैरग्रहण-अन्यथाग्रहण-संशयग्रहणव्यतिरिक्ता अविद्या नास्तीति स्पष्टमुक्तम् ॥

२) भाष्यकारैर्वार्तिककारैश्च प्रतिपत्तिक्रमेण अग्रहणमेव अन्यथाग्रहणस्य कारणमित्युक्तम् ।

अन्यथाग्रहणरूपाध्यासस्य अनादित्वात् उपादानकारणापेक्षैव नास्ति ; अतः मूलाविद्या अध्यासोपादानकारणं न भवति, अध्यासस्य अकार्यत्वात् ॥

३) सर्वश्रुतिषु सत्, ब्रह्म, आत्मा इत्यादिशब्दप्रतिपाद्यं ब्रह्म एकमेव सृष्टेः पूर्वमासीत् इति उद्घोषितम् । अनादिमूलाविद्यायास्सत्त्वाङ्गीकारे सर्वश्रुतिविरोधः अपरिहार्यः ॥

४) अनादिभूतमूलाविद्यायाः ज्ञानबाध्यत्वाङ्गीकारे अनादेरन्तवत्त्वमुक्तं भवति । भाष्यकारैरनादेरन्तवत्त्वं न्यायविरुद्धमिति गीताभाष्ये (१३-२) उक्तम् । किञ्च जनिमतो नाशो दृष्टः ; अनादिभूतायाः कथं नाशः ? किञ्च सू. भाष्ये (१-४-९) परमेश्वरादुत्पन्ना भूतग्रामस्य प्रकृतिभूता इयं अजा प्रतिपत्तव्या – इत्युक्तम् । कथं तस्याः अनादित्वमुच्यते ?

५) भाष्यकारैर्ज्ञानं तु ज्ञापकम् । न कारकमित्युक्तम् । (बृ. १-४-१५) मिथ्याज्ञाननिवर्तकत्वव्यतिरेकेण अकारकत्वं ज्ञानस्य इत्यप्युक्तम् । तस्मादनाद्यनिर्वचनीयप्रपञ्चबीजभूता मूलाविद्या ज्ञानबाध्या न भवति । अग्रहणसंशयग्रहणमिथ्याग्रहणव्यतिरिक्तत्वात् । उपादानकारणत्वात् परमार्थैव भवति तदनन्यत्वाधिकरणन्यायेन ॥

६) ईश्वराधीना मूलाविद्या ज्ञानबाध्या न भवति। ज्ञानं तु इयं मूलाविद्या ईश्वराधीना वर्तते इति ज्ञापयति ; न तु तां नाशयति, ज्ञानस्य अकारकत्वात् ॥

७) यदि मूलाविद्या जगदुपादानकारणीभूता, स्वकार्ये अन्विता तर्हि स्वकार्ये देहेऽपि अन्वितैव। तस्माद् ज्ञानेन मूलाविद्या बाधितापि देहस्थितिपर्यन्तं देहान्विता मूलाविद्या अस्त्येवेति देहपातोत्तरमेव सर्वथा मूलाविद्यानाशश्शक्य इति विदेहताकालीन एव मोक्ष इत्यकामेनाप्यङ्गीकर्तव्यः। स तु भाष्यविरुद्धः। भाष्ये (बृ. १-४-१०) आत्मविषयं विज्ञानं यत्कालं तत्काल एव तद्विषयाज्ञानतिरोभावः इत्युक्तम्। किञ्च .... कार्ये देहे सति उपादानभूतमूलाविद्यायाः नाशोऽपि असंभवः। घटे विद्यमाने तत्कारणीभूतमृदो नाशः असंभवः खलु ॥

८) वार्तिककारैरुक्तं अध्यासस्य कारणं प्रतिपत्तिक्रमेण अग्रहणमेव। अनाद्यध्यासस्य उपादानकारणापेक्षा नास्त्येव ॥

९) भाष्यकाराः (सू. भा. १-४-२) 'तद्धेदं तर्ह्यव्याकृतमासीत्'। (बृ. १-४-७) इत्यत्र 'इदमेव व्याकृत नामरूपविभिन्नं जगत्प्रागवस्थायां परित्यक्तव्याकृतनामरूपं बीजशक्त्यवस्थं अव्यक्तशब्दयोग्यं भवति' इति। बृहदारण्यकोक्त अव्याकृतशब्दस्य सूत्रभाष्योक्त (१-४-२) अव्यक्तशब्दस्य च एकार्थकत्वं प्रतिपाद्य अव्यक्तस्य अविद्यात्मकत्वं वर्णयामासुः। तेन च बृहदारण्यकोक्ताव्याकृतस्यापि अविद्यात्मकत्वमुक्तमभूत्। अविद्यात्मकशब्दस्य अविद्याकल्पितत्वार्थकत्वेन भाष्यवाक्योदाहरणेन मया पूर्वमेव प्रतिपादितम्। तस्माद्बृहदारण्यकोक्ताव्याकृतशब्दः मूलाविद्यां द्योतयतीत्युक्तिरसमञ्जसैव। अव्याकृतं अविद्याकल्पितम्। मूलाविद्या तु अध्यासरूपाविद्योपादानकारणीभूता इति संमतवादिभिरुच्यते। तयोर्भिन्नत्वात् अव्याकृतशब्देन मूलाविद्या उच्यते इत्युक्तिर्निराधारा ॥

१०) सुषुप्तौ अस्फुटमूलाविद्यास्तित्ववचनं श्रुतिभाष्यवार्तिकविरुद्धं अनुभवविरुद्धं च।

स्वयंप्रकाशब्रह्मज्ञानं अस्फुटरूपेण विद्यमानायाः मूलाविद्याया अस्तित्व-दर्शने विज्ञाने च असमर्थं किम् ? न असमर्थम् ; यस्मान्नास्ति मूलाविद्या ततो न पश्यति ताम् । वार्तिकोक्तात्माविद्याशब्दः आत्माग्रहणमेव बोधयति । न मूलाविद्याम् । वार्तिककारैरेव आत्माविद्यायाः आत्माग्रहणस्य च समानार्थकत्वेन प्रयुक्तत्वात् ; आत्माविद्या आत्माग्रहणमेव ॥

११) सत्तात्रयाङ्गीकारः भाष्यविरुद्धः । सूत्रभाष्ये (२–१–१६) एकं च सत्त्वमित्युक्तम् । भ्रान्ताः जगतस्सत्त्वं पश्यन्ति । तत्र सत्त्वं नास्ति । यदि सत्त्वं स्यात् विद्यावद्भिरपि दृष्टं स्यात् । नैव ते ब्रह्मव्यतिरिक्तं किञ्चन वस्त्वन्तरं पश्यन्ति । किञ्च भाष्यकारैरेव जगतः (गी. भा. १३–२६) । मायानिर्मितहस्तिहर्म्यादिसमत्वम्, स्वप्नदृष्टवस्तुसमत्वम्, गन्धर्वनगरादि-समत्वं च उद्घोषितम् । तस्मात् तस्य व्यावहारिकसत्यत्वं भ्रान्तिमूलकमेव । भ्रान्ताः जगदस्ति प्रमाणसिद्धम् इति व्यवहरन्ति । वस्तुतः गन्धर्वनगरसममेव ; तत्र सत्त्वं नास्त्येव । तथैव यदि प्रातिभासिकसत्ता रज्जुसर्पादिषु स्यात् । इयं रज्जुरिति ज्ञानवद्भिरपि सा सत्ता दृष्टा भवेत् ; ते तु न पश्यन्ति । बाधात्पूर्वमपि नासीदित्येव ते जानन्ति । तस्मात् ज्ञानमात्रमेव, न तु तत्र सत्ता विद्यते ॥

१२) जगत्कारणं शुद्धं निष्क्रियम् अद्वितीयं ब्रह्मैव, एतादृशं ब्रह्मैव उपादानकारणं निमित्तकारणं च । ब्रह्म उपादानकारणमपि सत् न विकारं भजते । कुतः ? जगत् अध्यासरूपाविद्यया ब्रह्मणि कल्पितम् । कल्पितं वस्तु परमार्थतो नास्त्येव । अतः ब्रह्मणः कारणत्वमपि कल्पितमेव । यथा कल्पितस्य रज्जुसर्पस्य उपादानकारणं निमित्तकारणं च रज्जुरेव तथैव कल्पितस्य जगत आस्पदभूतं शुद्धं ब्रह्मैव उपादानकारणं निमित्तकारणं च । अत एव भाष्यकारैः सूत्रभाष्ये जिज्ञासितव्यस्य शुद्धब्रह्मण एव लक्षणं 'जन्माद्यस्य यतः' (१–१–२) इत्युक्तम् । इदं तु शबलब्रह्मणः लक्षणमित्युक्तौ जिज्ञास्य-शुद्धब्रह्मणः लक्षणं नोक्तमिति स्यात् । भाष्यकारैः जिज्ञास्यब्रह्मणः लक्षणमिदमित्युक्तम् । तस्माच्छुद्धं ब्रह्मैव जगत्कारणमिति सिद्धम् ॥

१३. सुषुप्तौ चेतनाचेतनात्मकजगतः अज्ञातब्रह्मस्वरूपापत्तिं वक्ष्यन्ति श्रुतयः भाष्यवार्तिकवाक्यानि च । सूत्रभाष्ये तु (३-२-७) ब्रह्मैव सुप्तिस्थानम्

इत्युक्तम् । यस्मादज्ञात्वा तं प्रविशन्ति ततः तस्मादेव आगच्छन्ति इत्युक्तम् (छां. ६-९-३), (बृ. ४-३-२१). एकत्वान्न विजानाति । (छां. ६-८). 'सुषुप्ते एव स्वं देवतारूपं जीवत्वविनिर्मुक्तं दर्शयिष्यामीत्याह — स्वप्नान्तं मे विजानीहि इति'। अविद्याकामकर्माणि सुषुप्तौ न सन्ति । अविद्याकामकर्मविनिर्मुक्तमेव तद्रूपं यत्सुषुप्ते आत्मनो गृह्यते । सुषुप्ते अग्रहणम् एकीभावाद्धेतोः (बृ. ४-३-२२) इत्युक्तम् । तस्मात् सुषुप्तौ अस्फुटमूलाविद्याया अवकाशो सर्वथा नास्तीति ज्ञेयम् ॥

१४. मूलाविद्यायाः प्रमाणवाक्यमिदम् । 'मिथ्याज्ञाननिमित्तः' सू.अ.भा.) इति । अस्य प्रतिपादनक्रमवैचित्र्यं पश्यन्तु विद्वांसः । मिथ्या च तदज्ञानं च मिथ्याज्ञानम् । मिथ्याशब्दः अनिर्वचनीयार्थकः अज्ञानं नामरूपबीजभूतं अनिर्वचनीयवस्तु । निमित्तशब्दस्तु उपादानार्थकः एवं च अध्यासादिसर्वजगदुपादानभूता भावभूता अनिर्वचनीया मूलाविद्या इति मूलाविद्या भाष्यवाक्यप्रमाणसिद्धा । एवं क्लेशेन व्याख्यानकरणे किं किं न सिध्येत् ? मिथ्याज्ञाननिमित्तः भ्रान्तिरूपाध्यासनिमित्तः इत्येवार्थः समीचीनः । श्री भामतीकारैः मिथ्याज्ञानम् अध्यासः निमित्तः— निमित्तः इत्येवार्थः कृतः ॥

'परोऽविवेको भूतानामात्माविद्येति कथ्यते' इति वार्तिककारैः जीवानां तत्त्वग्रहणाभावरूपोऽविवेको आत्माविद्या इत्युक्तम् । अत्र परमात्माश्रया परमात्मविषयका अविद्या नोक्ता । केवलजीवानामविवेक एव आत्माविद्येत्युक्ता । अतः अत्रोपयुक्तात्माविद्याशब्दस्य मूलाविद्यार्थकत्वोक्तिरसंभवा ॥

शङ्करभगवत्पादैरध्यासस्य अनाद्यनन्तत्वमुक्तम् । तत्तु सर्वानुभवसिद्धम् । तस्य कार्यत्वं न केनापि दर्शयितुं शक्यम् । य एव दर्शयिता स एव अध्यस्तः । अध्यासं विना न किमपि व्यवहर्तुं शक्यते इत्येतत् सुविदितमेव । अध्यासस्य कार्यत्वाभावात् तस्य उपादानकारणापेक्षैव नास्ति । अतः 'अध्यासस्य उपादानकारणीभूता मूलाविद्या' इत्युक्तिरसंभवैव । तस्मादस्य सर्वानर्थहेतुभूतस्य अध्यासस्य प्रहाणाय आत्मैकत्वविद्याप्रतिपत्तये सर्वे वेदान्ताः प्रारब्धाः । अतो विवेकिनो आत्मैकत्वज्ञानेन अध्यासं निरस्य ब्रह्मनिष्ठासुखिनो भवन्तु इति प्रार्थये ॥

---

५००, २०-१०-१९७५. अध्यात्मप्रकाशमुद्रणालयः, होळेनरसीपुरम् (५७३२११)

# अध्यात्मप्रकाशकार्यालये प्रकाशिताः संस्कृतग्रन्थाः

१. **ईशावास्योपनिषद्भाष्यम्** – शाङ्करभाष्ययुतम् – सटिप्पणम् जिज्ञासूपयोगिपीठिकाशब्दसूच्यादियुक्तं च ।

२. **केनोपनिषत् - सभाष्या** – श्रीसच्चिदानन्देन्द्रसरस्वतीसंयमिकृत टिप्पण्यादिसंयुक्ता, पदभाष्यवाक्यभाष्यगतोपदेशतुलनात्मकविमर्शोऽपि टिप्पण्यां पीठिकायां च संयोजितोऽत्र ।

३. **काठकोपनिषत् - सभाष्या** – अत्रापि भाष्यं केनभाष्यवत् टिप्पण्यादिसर्वपरिकरोपेतम् ।

४. **मुण्डकोपनिषत् - सभाष्या** – इदमपि भाष्यं केनभाष्यवदेव सर्वपरिकरोपेतम् । पीठिकायां भाष्यतट्टीकाकारयोः मतभेदविमर्शनं च कृतम् ।

५. **तैत्तिरीयोपनिषत् - शीक्षावल्ली - सभाष्या** – भाष्यं टिप्पण्यादिसमलङ्कृतं प्राग्वत् ।

६. **तैत्तिरीयोपनिषत् - आनन्दवल्ली भृगुवल्ली च – सभाष्या** – श्रीसच्चिदानन्देन्द्रसरस्वतीनिर्मित 'भाष्यार्थविमर्शिनी' व्याख्यासहिता । व्याख्यायां भाष्याक्षरानुक्रमेणैव विषयोपपादनं कृतम् । भाष्ये अर्वाचीन-मतान्तरप्रविष्टवेदान्तिभिरुत्थाप्यमानशङ्कानां निरसनपूर्वकं विशुद्धशाङ्कर-प्रक्रियायाः श्रैष्ठ्यं च सम्यगाविष्कृतम् ।

७. **माण्डूक्यरहस्यविवृतिः** – श्रीसच्चिदानन्देन्द्रसरस्वतीनिर्मिता माण्डूक्योपनिषत्कारिकाव्याख्या । अन्वर्थाभिधानायामस्यां व्याख्यायां माण्डूक्योपनिषदि गर्भीकृतानि नैकानि रहस्यानि श्रीगौडपादसंमतवेदान्त-प्रक्रियानुसारेण विवृतानि ।

८. **सुगमा** – शाङ्करीयाध्यासभाष्यव्याख्या । व्याख्यानानां भिन्न-भिन्नप्रस्थानावलम्बनत्वात् शाङ्करदर्शनं कीदृशम् अविवादम् अविरुद्धं च स्यादिति सन्दिहानानां जिज्ञासूनां कृते प्रस्थानत्रयैककण्ठ्यमादर्शयन्तीयं व्याख्या निर्मितास्ति ।

९. **सूत्रभाष्यार्थतत्त्वविवेचनी** (प्रथमो भागः) – जिज्ञासाधिकरण-भाष्यस्य नूतनेयं व्याख्या। शङ्करभगवत्पादसंमतवेदान्तप्रक्रियायाः असाधारण-धर्माः सुविशदमाविष्कृताः ।

१०. **सूत्रभाष्यार्थतत्त्वविवेचनी** (द्वितीयो भागः) – जन्माद्यधि-करणभाष्यव्याख्या । जिज्ञासाधिकरणव्याख्यावदेव शुद्धशाङ्करप्रस्थानशरीर-प्रकाशिनी । परिशिष्टचिन्तायां तु जगत्कारणसतत्त्वविमर्शः, अभिनव-वेदान्तिसम्मतपरिणामवादपरीक्षा – इत्यादिविषयाः सङ्कलिताः ।

११. **सूत्रभाष्यार्थतत्त्वविवेचनी** (तृतीयो भागः) – शास्त्रयोनि-त्वाधिकरण-समन्वयाधिकरणभाष्ययोर्व्याख्या । पूर्ववदेव शुद्धशाङ्करप्रक्रिया-प्रकाशिनी । परिशिष्टचिन्तायां शास्त्रप्रामाण्यसतत्त्वविमर्शः, श्रवणादीनां स्वरूपकृत्यादिगता चिन्ता – इत्याद्याः विषयाः सङ्कलिताः ।

१२. **वेदान्तप्रक्रियाप्रत्यभिज्ञा** (स्वतन्त्रग्रन्थः) – सर्वत्र वेदान्तेषु अध्यारोपापवादन्यायाख्या एकैव प्रक्रिया वेदान्ताभियुक्तैः परिगृहीतास्तीत्ये-तदादर्शितम् । एतत्प्रक्रियातः प्रच्युतेरेव हेतोः सर्वेऽपि वावदूकाः वेदान्तोपदिष्ट-मात्मैकत्वमनुभवारूढमापादयितुं नाशक्नुवन् इत्येतच्च स्फुटीकृतम् ।

१३. **शुद्धशाङ्करप्रक्रियाभास्करः** (१-२) – वेदान्तसिद्धान्तनिर्णयः, शाङ्करसंप्रदायनिर्णयश्चेति किरणद्वयमस्ति ।

१४. **शुद्धशाङ्करप्रक्रियाभास्करः** (३-४-५) – शाङ्करवेदान्त-मर्यादम्, शाङ्करवेदान्तप्रक्रियास्वरूपम्, अध्यारोपापवादप्रक्रियाविशेषांश्च विशदयत्किरणत्रयमत्र चकास्ति ।

१५. **शुद्धशाङ्करप्रक्रियाभास्करः** (६-७) – शाङ्करप्रस्थानस्य प्रस्थानान्तरेभ्यो वैलक्षण्यम्, बौद्धमतसाम्यशङ्कापरिहारं च प्रकाशयत्किरण-द्वयात्मकः ।

१६. **वेदान्तडिण्डिमः** – भावबोधिनीव्याख्यासहितः । व्याख्यायां ललितया शैल्या श्रुतिप्रमाणवचनोदाहरणपूर्वकं मूलश्लोकाः विवृताः ।

१७. **वेदान्तबालबोधिनी** – भगवत्पादविरचित 'प्रातःस्मरणस्तोत्र'स्य प्रश्नोत्तररूपं व्याख्यानम् । भाष्यकारोक्तीनां सरणिमेवानुसृत्य वेदान्त-सिद्धान्तोऽत्र जिज्ञासूनां हृदयंगमितः ।

१८. **वेदान्तविद्वद्गोष्ठी** – भाष्यव्याख्यानप्रस्थानयोर्वैलक्षण्यमधिकृत्य एकादशविद्वत्प्रकाण्डानामभिप्रायाः अत्र दत्ताः । विविधाभिप्रायसंग्राहिकया आंग्लभूमिकया च समलङ्कृतास्ति ।

१९. **पञ्चपादिकाप्रस्थानम्** – अत्र पञ्चपादिकाप्रस्थानं भाष्यप्रस्थानेन तुलितमस्ति । येनावलोकितेनेदं निश्चीयेत यत् सर्वथापि प्रस्थानान्तरमेवावलम्बितं पञ्चपादिकाकारैः भाष्याक्षराणि तत्र तत्रान्यथायोजनेन स्वाभ्युपगतप्रमेयपराणीव वाक्यानि नीतानि चेति ।

२०. **नैष्कर्म्यसिद्धिः ( 'क्लेशापहारिणी' व्याख्यासहिता )** – व्याख्यानकर्तारः श्रीसुरेश्वराचार्यैः प्रमाणीकृतोपदेशसाहस्रीतः वार्तिकद्वयतश्च श्लोकान् समुद्धृत्य वार्तिकप्रस्थानविशुद्धसंप्रदायमाविरकार्षुः । सत्वरं जिज्ञासुभिरवलोकनीया व्याख्येयम् ।

२१. **गीताशास्त्रार्थविवेकः** – अत्र सांख्य-योग-कर्मध्यानादिपदार्थविवेकपूर्वकं कर्मयोग-ध्यानयोगादीनां परस्परसंबन्धो निरूपितः । गीताशास्त्रस्य सांख्ययोगदर्शनाभ्यां वैलक्षण्यं च स्फुटीकृतम् ।

२२. **विशुद्धवेदान्तसारः** – अत्र जिज्ञासुजनचित्तभूमिकाविशेषानुसारेण अनुभवप्रधानदृष्ट्या, मनःप्रधानदृष्ट्या, इन्द्रियप्रधानदृष्ट्या चेति वेदान्तोपदेशस्त्रेधा विभज्य प्रदर्शितः ।

२३. **विशुद्धवेदान्तपरिभाषा** – ब्रह्म, जगत्, जीवश्च इति पदार्थत्रयस्य सतत्त्वम्, जगद्ब्रह्मणोः जीवब्रह्मणोः संबन्धश्च सांप्रदायिकपरिभाषाजातमवलम्ब्य अत्र निरूपितः ।

२४. **ब्रह्मविद्यारहस्यविवृतिः** – सगुणनिर्गुणब्रह्मविद्याविवेकेन जिज्ञासूनां निरायासप्रवेशः ब्रह्मणि यथा लभ्येत तथा श्रीचरणैः छान्दोग्योपनिषदो अष्टमोऽध्यायोऽत्र व्याख्यातः ।

२५. **शाङ्करं वेदान्तमीमांसाभाष्यम्** ( स्वयंव्याख्यातम् ) – गीर्वाणांग्लभाषाद्वयविवरणसहितम् । श्रीचरणानां चरमो ग्रन्थः ।

**अध्यात्मप्रकाशकार्यालयः, होळेनरसीपुरम्.**

**(हासन जिल्ला, कर्नाटक प्रान्तः, दक्षिण रेल्वे. पिन् कोड् नं. ५७३२११.)**

ADHYATMA PRAKASHA KARYALAYA
HOLENARSIPUR. (573211)
(HASSAN DISTRICT, KARNATAKA STATE)

## OUR ENGLISH BOOKS

1 **Avasthatraya** *or* **The Unique Method of Vedanta**

A valuable Introduction to the study of Vedanta as pure Philosophy.

2 **Minor Works of Sri S'ankaracharya**

Here are 16 of the most popular [illegible] to translated S'ankara with English translation. [illegible] interpret [illegible]

3 **How to Recognize the Method of Vedanta ?**

The first sustained attempt to reduce all the seeming various methods of the Upanishads to the only comprehensive one. Contains a brief account of the History of Vedantic thought upto the time of Sarvajñātma Muni.

4 **Vedanta** *or* **The Science of Reality**

By Sri K. A. Krishnaswamy Iyer, B.A., With a Foreword by Dr. S. Radhakrishnan, M.A. This is a work dealing with the immediate Realization of Brahman by pure reflection the witness of the three states. All Systems of Thought, Eastern and Western, are examined to prove the truths of Vedanta. Second Revised Edition by Sri Swami Satchidanandendra Saraswati.

5-7 **S'uddha-S'āṅkara-Prakriyā-Bhāskara** ( Parts I, II & III )

( Light on the Vedantic Method according to S'ankara )

Determining the real doctrine of the Upanishads according to the tradition of S'aṅkara's school.

**Salient Features of S'ankara's Vedanta**

Presents matter and method of genuine S'āṅkara-Vedanta in a small compass. The references to original Texts and classification and consolidation of the most important Upanishadic teachings, would make this little book a usefull companion to the *Suddha-S'āṅkara Prakriyā-Bhāskara* of the same author.

**9 Collected Works of ' ., ishnaswamy Iyer**

This contains Le .ures and Articles contributed to various periodicals different occasions as well as the unpublished writir of the author of "*Vedanta or The Science of Reality*".

**10 S'ankara's .cation of Certain Vedantic Concepts**

This ok tains a systematic account of the clarification of .rtain edantic concepts as presented in S'aṅkara's classical writings, especially in his Sūtra-Bhāshya.

**11 Vedanta**

connected account of the important and the eas in the 'Vedantas' or the Upanishads and the nod of approach adopted in placing them before the enquirer.

**The Vision of Atman**

The book contains the following subjects: (1) The Atman to be seen (2) Reflection and Reason. (3) Nididhyāsana as the continued practice of S'ravaṇa and Manana. (4) Manana further explained. (5) Nididhyāsana, Upāsana and Yoga. (6) Are S'ravaṇa and other means enjoined? (7) Relative Importance of the three means.

**13 Ishāvāsyopanishad**

With the commentary of Sri S'aṅkarāchārya. English Translation by Sri Swami Satchidanandendra Saraswati, with Introduction, Notes, Appendix and an Index.

**14 Intuition of Reality**

"Another masterpiece from the pen of Sri Swami Satchidanandendra Saraswati. The Swami has very ably illustrated how Vedantic knowledge is not mere subtle intellectualism, but it is an intuition of Reality, arising through Divine Grace. The writer has incidentally refuted the oft-repeated assertion that S'aṅkara's Philosophy is an out-and-out Rationalistic system and that he has provided no place for Īsvara in his Advaita Philosophy.

A very valuable addittion to the lore of Advaita Vedanta, in English." — *Kamakoti Vani*.

**15 Mis-Conceptions about Shankara**

" It is the lot of supermen to be misunderstood. Their thoughts are too subtle to be clearly comprehended by lesser lights. The author of this small book has done a big job, bringing together the several misconceptions about S'aṅkara and showing how these misconceptions arise and in what ways the misconceptions are quite unsound. Useful excerpts from original texts are given where they will serve the elucidation. To earnest students of S'ankara this book is found to be of much help in the task of rightly grasping S'aṅkarite ideas. The author rightly advis[illegible] Vedanta students to read the original in preference [illegible] matter and follow the principle, 'Let S'ankara [illegible] S'ankara' and be convinced that S'ankara's teaching comp[illegible] hends, assimilates and transcends all genuine truths of Dwaitic systems.

Quite a number of Vedantic points on which faulty ideas persist in students get touched upon and rendered clear in this very serviceable book." — *Vedanta Kesari.*

**16 The Upanishadic Approach to Reality**

" In this book the author describes in seven short chapters, the Wisdom of the Upanishads, quoting extensively from the Principal Upanishads and the Bhashyas (commentaries) of S'ankara whom he follows closely in his interpretations. In the last chapter the author refers briefly to Post-S'ankara Vedantins and their divergence on certain points - such as the locus of *avidyā* (ignorance), the nature of *Moksha* (liberation) etc., from the teachings of S'ankara. The book is written in a lucid style and is easily understandable." — DR. N. L. SHRINIVASA,
*Retd. Profr. of Philosophy, Ujjain.*

*For current price list please apply to :*

**ADHYATMA PRAKASHA KARYALAYA**

**HOLENARSIPUR (573211)**

(Hassan Dist., Karnataka, Southern Railway)

# The Adhyatma Prakasha Karyalaya,

( ESTABLISHED 1920 )

HOLENARSIPUR-573211. (Hassan District)

( BANGALORE BRANCH )

No. 68, II Block, Subbarama Chetty Lay-out,
THYAGARAJANAGARA — BANGALORE-560028.

An Institution to help the interpretation of Indian Culture by stimulating the study and practice of the Adhyātma Vidyā — Philosophy and Religion in its universal aspect — especially as revealed in the Upanishads and allied literature.

1. Has so far published more than ONE HUNDRED AND SIXTY BOOKS in Kannada, English and Sanskrit.

2. Arranges for frequent DISCUSSIONS, DISCOURSES and PUBLIC LECTURES; VEDANTA CLASSES in the morning form a regular feature.

3. Has a free-lending LIBRARY and a READING ROOM for the public.

4. Conducts a Kannada Monthly Magazine called the "ADHYATMA PRAKASHA", devoted to Jñāna, Bhakti and Vairāgya.

5. Maintains a VEDANTIC COLLEGE for training up model students for the dissemination of Vedantic ideas.

*For fuller information please apply to the Secretary.*